कृत्यप्रदीपः

महामहोसन्मिश्रवाचस्पतिविरचितः

सम्पादकौ

१ प०श्री जयमन्त मिश्रः

२ प०श्री धर्मनाथ झा

कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयः

दरभंगा

(मूल्यम् २४/- चतुर्विंशति रुप्यकाणि

08

JACL-KRC

010408

16408

केन्द्रीय संस्कृत विद्यापीठ, जयपुर
पुस्तकालय
पुस्तक संख्या 10408
वर्गीकरण संख्या

केन्द्रीय संस्कृत विद्यापीठ, जयपुर

पुस्तकालय

राष्ट्रिय संस्कृत संस्थान
जयपुर परिसर, जयपुर
पुस्तकालय
क्रमांक 10408

वर्गीकरण सं०...............

पुस्तक सं०..................

दिनाङ्क..............

यह पुस्तक नीचे अङ्कित तिथि या उससे पूर्व लौटा दी जानी चाहिये। यदि पुस्तक निर्धारित तिथि से अधिक समय तक पाठक अपने पास रखेंगे तो 5 पैसे प्रतिदिन के हिसाब से विलम्ब शुल्क देय होगा।

12.2.4

C/o Niranjana Publ. & Bo...
DELHI—7

SV-2024

SV-2024

म० म० वाचस्पति ग्रन्थावल्यां

प्रथमं पुष्पम् ।

कृत्यप्रदीप:

महामहोपाध्यायसन्मिश्रवाचस्पतिविरचितः

प०श्री जयमन्त शर्म-

प०श्री धर्मनाथ शर्मभ्यां

सम्पादित:

संशोधक:

प०श्री कृष्णानन्द झा उपाचार्यः (रीडर)

कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालयः, दरभङ्गा

प्रकाशकः

कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयः

दरभंगा

वसन्तपञ्चमी

१९८३ ई०

सर्वाधिकारः प्रकाशकाधीनः

प्रथमसंस्करण—१०००

प्रकाशन वर्ष—१९८३

सम्पादक

१. डॉ० जयमन्त मिश्र

२. प० श्री धर्मनाथ झा

संशोधक

प० श्री कृष्णानन्द झा

प्रकाशक

कामेश्वरसिंह दरभंगा संस्कृत

विश्वविद्यालय, दरभंगा

JACL-KRC

010408

मूल्य 25/- ~~[illegible]~~

मुद्रक

रमणप्रेस, बंगलागढ़ दरभंगा

आमुखम्

अथायं प्रकाश्यते पद-वाक्य-प्रमाणपारावारीणेन मैथिलमहीसुरवंशावतंस-महामहोपाध्यायपरमगुरुवाचस्पतिमिश्रेण विरचितः कृत्यतत्त्वप्रकाशकः कृत्य-प्रदीपो नामग्रन्थः।

सुविदितमेवैतद् विदितवेदितव्यानां लोकद्वयसाधनीभूत-भारतीय संस्कृतिसमुपासकानांयत् सर्वार्थसाधनमपि ज्ञानं न भवति प्रशस्तं नवा कार्यंसाधकं यदीदं कर्मरहितंभवति, अतः परस्परोपकारकतयैव उभयोः साफल्यम्। एतच्च—

"विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥
उभाभ्यामेवपक्षाभ्यां यथा खे पक्षिणोगतिः।
तथैव ज्ञानकर्मभ्यां प्राप्यते शाश्वती गतिः॥ इति

श्रुति स्मृतिभ्यामपि समुद्घोष्यते।

इत्येतदालक्ष्य तत्त्वविदां शिरोमणिना परमगुरुणा वाचस्पतिमिश्रेण कृत्य-प्रदीपो व्यरचयाञ्चक्रे।

महतीं समुपयोगिताञ्चास्यग्रन्थस्य समवलोकयता मया प० श्रीधर्मनाथझा महोदयेन सह सम्पादनं विधाय प्रकाश्यतामानीय विपश्चितांपुरतः समुपस्थाप्यते।

अस्य ग्रन्थस्य प्रस्तावनालेखकः संशोधनकर्ताच विद्यावारिधि झोपाह्व प० श्रीकृष्णानन्दशर्मा भूयासंधन्यवाद मर्हति।

विद्वन्मूर्धन्य वाचस्पतिमिश्रविरचितं ग्रन्थरत्नमिदं जायताम् जिज्ञासूनां जिज्ञासा-समाधानाय विवेकिनां ज्ञानाय जगन्मङ्गलायचेतिशम्।

विदुषां वशम्वदः
जयमन्त मिश्रः,
कुलपतिः
कामेश्वर सिंह दरभङ्गा संस्कृत
विश्वविद्यालयः, दरभङ्गा

माघशुक्लपञ्चमी
१९-१-१९८३

प्रस्तावना

श्रीजनकजापदपङ्कजरागेण, अमरभारत्या अनुरागेण, कलाकमलिनीनां परागेण, वसुधाधिपानां विदेहानां विरागेण च सविशेषङ्कमपि महिमानमाश्रयन्ती विश्रुत-महर्षिगौतमयाज्ञवल्क्यजैमिनिकणाददितपोनिधाना, तीरभुक्त्यपराभिधाना मिथिलेयमशिथिलाचारविबुधानां द्यौरिवाधिधरातलं विद्योतते। यथा च यथार्थताऽस्याः प्रकटिता पुराणैः—

कौशिकिन्तु समारभ्य गण्डकीमधिगम्य वै।
योजनानि चतुर्विंशद् व्यायामः परिकीर्तितः॥
गङ्गाप्रवाहमारभ्य यावद्धैमवतं वनम्।
विस्तारः षोडश प्रोक्तो देशस्य कुरुनन्दन॥
मिथिला नाम नगरी तत्रास्ते लोकविश्रुता॥
(बृहद्विष्णु पुराणम्)

आसीद् ब्रह्मपुरी नाम्ना मिथिलायां विराजिता।
तस्यां विराजते नित्यं गौतमो नाम तापसः॥
(स्कन्दपुराणम्)

तथैव स्मृतिकारैरपि—

मिथिलास्थः स योगीन्द्रः क्षणं ध्यात्वाऽब्रवीन्मुनीन्।
यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधत॥
(याज्ञ स्मृतिः, २)

तुष्टाव चैनामेवं कवि कुमुदानन्दो गङ्गानन्दः—

गङ्गातीरावधिरधिगता यद्भुवो भृङ्ग, भुक्ति-
र्नाम्ना सैव त्रिभुवनतले विश्रुता तीरभुक्तिः।
भूमिं भित्वा समजनि सखे, सीरकेतोस्तपस्या-
वल्ली यस्याममृतफलदा जानकी कैतवेन॥
(भृङ्गदूतकाव्यम्)

'धर्मस्य निर्णयो ज्ञेयो मिथिलाव्यवहारतः।'—इति प्रसिद्ध्या व्यवहारैर्धर्मनिर्णायिका चेयं भूमिः। यदधिष्ठातृतयाऽन्वीक्षिकीसमीक्षणविलक्षणेक्षणा

विचक्षणा परमात्मानमपि संसाध्य वोधयन्ति, तस्याखिललोकानुकूलप्रतिकूल प्रतीतिजनकस्य, जनकस्येव सुदृष्टप्रभावस्याप्यदृष्टस्य सुप्रथित प्रथमभेदो धर्मो नामाशेषपुरुषार्थपूर्त्तिः साक्षादेव देवमूर्तिः। यस्य च—

'धारणाद् धर्म इत्याहुर्धर्मो धारयते प्रजाः।'
'यतोऽभ्युदयनिश्श्रेयससिद्धिः स धर्मः।'
'चोदनालक्षणोऽर्थो धर्मः।'
'वेदबोधितेष्टसाधनताको धर्मः।'—इत्यादिना स्वरूपनिरूपण-पूर्वकमभियुक्तै रेवमुपवर्णित परम प्रभावः।

ऊर्द्ध्वबाहुर्विरौम्येष नच कश्चिच्छृणोति मे।
धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ॥'

'धर्मेण हन्यते व्याधिर्धर्मेण शुभदा ग्रहाः।
धर्मादर्थश्च कामश्च यतो धर्मस्ततो जयः।'

'धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।

'आहारनिद्राभयमैथुनञ्च
सामान्यमेतत् पशुभिर्नराणाम्।
धर्मो हि तेषामधिको विशेषो
धर्मेण हीना पशुभिः समानाः ॥'

सकलकामनाकल्पतरोरेवंविधस्य धर्मस्य मूलं सदाचारमामनन्ति मनीषिणः। तथा हि—

'वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥'
(मनुस्मृतिः)

'श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
सम्यक्सङ्कल्पज कामो धर्ममूलमिदं स्मृतम् ॥'
(याज्ञ० स्मृ० ७)

'सर्वस्य प्रभवो विप्राः श्रुताध्ययनशीलिनः।
तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योऽप्यध्यात्मवित्तमाः॥
न विद्यया केवलया तपसा वाऽपि पात्रता।
यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितम्॥'
(याज्ञ० स्मृ० १९९,२००)

'यस्तु क्रियावान् पुरुषः स विद्वान्।'

'श्रुतिर्विभिन्ना स्मृतयो विभिन्ना
नैको मुनिर्यस्य मतं न भिन्नम्।
धर्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः॥'

किम्बहुना, सदाचारविहीनस्य वेदादिज्ञानमपि विनिन्दितम्—

'आचारहीनं न पुनन्ति वेदाः
यद्यप्यधीताः सह षड्भिरङ्गैः॥' (वसिष्ठस्मृतिः)

'ऊषरे वापितं बीजं यच्च भस्मनि हूयते।
क्रियाहीनेषु यद्दत्तं न च तत्प्रेत्य नो इह॥'
(व्यासः)

इत्थं सर्वथाऽभिनन्दितोऽयं सदाचारः प्रथमं श्रुतिभिस्ततः स्मृतिभिर्मन्वादिभिस्ततः पुराणोपपुराणैः पश्चाच्चानुशीलितवेदादिशास्त्रैस्सुविचक्षणैः स्वकृतिषु समाहृत्य प्रमाणानि, यथाक्रमं वर्णाश्रमानुसारेण देशाचारानुरोधेन च समुपपाद्य नित्यनैमित्तिककाम्यकर्ममर्मप्रकाशनैः समेधितोऽनेकशाखो वटवृक्ष इव विशालतमो विराजते।

तत्र महामहोपाध्यायपरमगुरुपदाङ्कितवाचस्पतिमिश्रप्रणीतः 'कृत्यप्रदीपो' निगूढ़तत्त्व प्रकाशनेन कमपि परं प्रथिमानमाधत्ते।

अयमत्रभवान् मिश्रवाचस्पतिः षड्दर्शनव्याख्यातुर्विश्वविख्यातवैदुष्याद्-बृद्धवाचस्पतिमिश्रात् स्थितिकालकुलादिभिर्भिन्नो मिथिलालङ्कार-मीमांसकशिरोमणिशुशोभितसुकृतपरायणपालिवाड़समौलिमूलकविप्रवरवंशावतंस वलाइनग्रामनिवासिसदुपाध्यायगिरिपतितनयः षोड़शविक्रमशताब्द्याः प्रथम-

पादे (१४५० ई०) स्वस्थितया मिथिलामलञ्चकारेति ऐतिह्यविदां सम्मतम्। ओइनवारविप्रवंशविभूषण-मिथिलामहीपतिभैरवसिंहस्य भगिनीपतिरसौ तस्य राज्ञो धर्माध्यक्षपदे नियुक्तोधर्मकर्मव्यवस्थां सम्पादयामासेति 'मिथिलातत्त्वविमर्श' नामकाद् ग्रन्थाद् विज्ञायते। अनेन स्वयमपि स्ववंशादिप्रसंगे 'कृत्यप्रदीपो' पक्रमे प्रोक्तम् —

वंशेजात⌒कलुषरहिते कर्ममीमांसकाना
मन्वीक्षायां गुरुकरुणया लब्धतत्त्वावबोधः।
श्रीमान् वाचस्पतिरहमिह प्रीतये पुण्यभाजां
नत्वा नत्वा कमलनयनं कृत्यदीपन्तनोमि ॥

व्याकरणादिसकलशास्त्रपारङ्गतेनामुनैकोनपञ्चाशद् ग्रन्था विविधशास्त्रेषु प्रणीता इतिश्रूयते। स्वकृतपितृभक्तिरङ्गिण्यामनेनैकचत्वारिंशतो ग्रन्थानामुल्लेखो विहितः। तथा हि—

शास्त्रे दश स्मृतौ त्रिंशन्निवन्धा येन यौवने।
निर्मितास्तेन चरमे वयस्येष विनिर्ममे ॥

आचारचिन्तामणिः, विवादचिन्तामणिः, शुद्धिचिन्तामणिः, व्यवहारचिन्तामणिः, तीर्थचिन्तामणिः, श्राद्धचिन्तामणिः, षोड़शमहादाननिर्णयः, कृत्यमहार्णवः, कृत्यप्रदीपः, द्वैतनिर्णयः, पितृभक्तितरङ्गिणीत्येते ग्रन्था एतत्कृतिरूपेण 'मिथिलातत्त्वविमर्शे' समुल्लिखिता विलसन्ति।

एषु कृत्यप्रदीपोऽयं सदाचारतत्त्वजिज्ञासूनां परमोपादेयतां भजमानो वितश्रुवैदुष्यैः सद्ग्रन्थसम्पादनबद्धपरिकरै⌒कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयकुलपतिपदमलङ्कुर्वद्भिः डॉ० श्रीजयमन्तमिश्रमहानुभावैः, दार्शनिकप्रवर झोपाख्यपण्डितश्रीधर्मनाथशर्म्मभिश्च सुसम्पाद्य विज्ञेभ्यः समुपहृत⌒कल्पतां जगन्मङ्गलाय—

विद्वज्जनानुचरः
कृष्णानन्द झा
उपाचार्यः
स्नातकोत्तरव्या० भा० वि० विभागे
का० सिं० द० सं० वि० विद्यालयः

तिथिः—माघकृष्णचतुर्थी,
२०३९ वि० १९८३ ई०

★ श्री गणेशाय नमः ★

अथ–कृत्यप्रदीपः ।

"वंशेजातः कलुषरहिते कर्ममीमांसकानाम् ।
अन्वीक्षायाङ् गुरुकरुणया लब्धतत्त्वावबोधः ।
श्रीमान्वाचस्पति रहमिह प्रीतये पुण्यभाजाम् ।
नत्वा नत्वा कमलनयनङ्कृत्य दीपन्तनोमि" ।

अथाचारः । तत्रादौ ब्राह्मे मुहूर्त्ते उत्थाय रात्रिवासस्त्यक्त्वा धोतोत्तरीयंपरिधाय, चक्षुषी प्रक्षाल्यद्विराचम्य शयनस्थाना द्दक्षिणा न्नैऋताम्वा दिशाङ्गत्वा - उपवीतं हारवत्कृत्वा ततः पृष्ठलम्बितम्विधाय उदङ्मुखीभूय वाससाचात्मानं वेष्टयित्वा वर्त्म भस्म गोव्रज फालदृष्ट वीजितशस्यपूर्णक्षेत्र खल स्मशान शाद्वल महावृक्षतल यज्ञवृक्षोषरपरा शुच्युद्यान समीयोदकसमीप चतुष्पथे राजपथ तुषाङ्गार कपालदेवगृह गोष्ठ गोमय वद्धयाकाश चत्वरोपद्वारशुभ्र विल यज्ञभूमि वल्मीक जलचिति पर्वतमस्तक जीर्णायतन समत्वगर्तक विषात्यन्तनदी निकट पल्वलोपजीव्य छायावर्जमकाम्यस्थानेसम्भूते ऽयज्ञिया नार्द्रकाष्ठ पत्र तृणान्यतमलोष्ठं वेणुदन्डं मृण्मयम्भाजन म्वा आस्तीर्य मौनी, गो वाय्वग्नि विप्रजलादि पश्यन्, गो सन्ध्याग्नि चन्द्र सूर्य जलस्थां विप्र वाय्वनभिमुखः प्रातस्सङ्गव मध्याह्नापराह्न सायाह्नभेदैः पञ्चधा विभक्तस्याह्नः प्रातर्भागे मध्याह्ने सन्ध्ययोश्च उदङ्मुखः सङ्गवे पश्चिमाभिमुखः सायाह्ने रात्रौ च दक्षिणाभिमुखः उभयादौयथामुखमुखः ग्रीवाशक्त मृत्पात्रीको दक्षिणकर क्रीन कमण्डलुः अनुपानत्कः शुचि रासीनोऽयज्ञिय शुष्कतृण काष्ठाद्यु परि मूत्रोच्चारंकुर्यात् ।

एकवासाश्चेत्तदा हारवदुपवीतं दक्षिणकर्णे ऽवलम्बयेत्, ततो मूत्रोच्चारे समाप्ते शुष्क काष्ठादिना लिङ्गं गुदे वारद्वयं प्रमृज्य केवल जलेनप्रक्षाल्य अन्तर्जल गृहलेप मृषिकोकेरोषर कर्दमपांशुल वल्मीक वर्त्मा सम्वन्धिनीं श्लक्ष्णां परशौचावशिष्टां शुचिदेशस्थाम् अन्तष्प्राश्य सामेकतां मृत्तिका मादाय उदङ्मुखः शौचं कुर्यात् ।

तथा हि—लिङ्गं जलमात्रेण प्रक्षाल्य ततस्त्रिपर्वी प्लवक मृज्जलाभ्यां प्रक्षालयेत्। ततो गुदमपि जलमात्रेण प्रक्षाल्य वामहस्ते अर्द्ध प्रसृतिमितां मृदं कृत्वा दक्षिणहस्तधृतेन कमण्डलुना तावज्जलं दद्या द्यावन्मृत्तिकाक्षयोभवेत्, ततस्तन्मृत्तिकार्द्ध मृतिकाभ्यां वारद्वयं शौचंकृत्वा वामहस्तं वहुजलेन क्षालयेत् तत उत्थाय वासष्परिधायौपवीतीकृत्वा स्थानान्तरंगत्वा त्रिपर्व पूरिकाभिर्द्दशभि मृर्द्भिर्वामहस्त क्रोडम्, ततस्तादृश षड्भिस्तत्पृष्ठम्, तत स्तादृशीभिस्सप्तभिः पाणी ततोहस्तनखान् संशोध्य मृत्त्रयेण हस्तौ प्रक्षाल्य ततस्तादृशीभिस्तसृभिर्द्दक्षिणपादम्, ततस्तादृशीभिर्वामपादं प्रक्षालयेत्,अस्यार्द्धं निशि तदर्द्धमध्वनि आर्त्तोयथाशक्तिः, स्त्रीशूद्रानुपनीताना न्तु गन्धलेप क्षयकरमात्रम् शौचम्, नतुसंख्याया नियमोपि ।

केवल मूत्रोत्सर्गे तु लिङ्गे एकं वामकरे तिस्रः करयोर्द्वे पादयोष्प्रत्येक मेकैकां मृदं दद्यात्। ततः शौचस्थानं वारिणा क्षालयेत्, ततः शोधक द्रव्येणकमण्डलुं प्रक्षाल्य जलान्तरेण द्विराचम्य विष्णुं स्मरेत्। तद्यथा बद्धशिख उपवीती प्राङ्मुख उदङ्मुखऐशान्याभिमुखो वा अन्तरुर्वोररत्नीकृत्वा आजानु क्षालित पादयुग्मनामणिबन्ध क्षालितहस्तद्वयो येन केनापिसिद्ध द्विवास स्त्वशुचौ देशे अप्रसारित समस्तृत पादयुगः सुमनास्तन्मनाप्रणतः भूमिष्ठ पादो ऽनासनस्थोभूत्वासनस्थोपिजलस्थो जानूर्द्ध जले तिष्ठन् वा अनपावृत शिरस्कन्धः केशनीव्यधः कायावली रपृशन् तत्स्पर्शेतु क्षालित हस्त अजल्पन् अहसन् अगच्छन् अप्रौढ़पादः कमप्यस्पृशन् अचलन् क्वचिदप्यनावर्जितदेहदिश. आत्मान ञ्चा नवलोकयन्, अरथ्यास्थोऽत्वरः वामहस्तास्पृष्टमफेल मविवर्ण मविरस सद्गुर्गन्धिअचुद्बुदं शूद्रा शुच्येकया प्येनावर्जितं वर्षधारातिरिक्तं पादप्रक्षालन शेषातिरिक्तं तच्छेष ञ्चे त्तदा भूमिशूावितास्त्रम् अग्निप्रोक्षणार्थं जलशेषातिरिक्तं हस्तानालोलितम् अप्रदरभवं प्रदरभवमपि गोतृप्तिक्षमम्, अतप्तंरोगिन स्तप्तमपि अकलुषं वीक्षितं घनाङ्गं नीला गोकर्णाकृतिना दक्षिण हस्तेन त्रिश्चतु र्वा-

ब्राह्मेण क्षतादिना तदवरोधे कायेत्यतदवरोधे दैवेन ब्राह्मणो हृद्‌गामि क्षत्रिय कण्ठगामि वैश्य स्तालुगामि जलमाचमेत्।

शूद्र स्सर्वेव च स्त्री मुखाभ्यन्तर प्राप्तिक्षमंयथोक्तमेव जलं सकृदाचमेत्, ततस्संवृत स्यावान्तराधरौष्ठः मुखमंगुष्ठमूलेन द्विःप्रमृज्य पाणिं प्रच्छाल्य तर्जनी मध्यमा नामिकाभ्रस्तादृशमेव मुखमोष्ठे स्मश्रुतोऽधः स्यारा दुपविद्विरुप स्पृशेत्। ततोहस्तं प्रक्षाल्य वामयाणिपादौशिरश्चाभ्युक्ष्य तर्जन्यङ्गुष्ठाभ्यां सोदकाभ्यां नासापुटेततोङ्गुष्ठानामिकाभ्यां सोदकार्थामक्षिणी, छन्दोगश्चेत् तदा आदावक्षिणी इति विशेषः।

ततोङ्गुष्ठानामिकाभ्यां सोदकाभ्यं श्रोत्रे, ततष्कनिष्ठाङ्गुष्ठाभ्यां सोदकाभ्यां नाभिं स्पृष्ट्वा पाणिप्रक्षाल्य, करतलेन हृदयं, सर्वाङ्गुलीभिः शिरः। अङ्गुल्यग्रेणांशद्वयं स्पृशेत्, छन्दोगश्चेत्तदा परिमार्जनोपस्पर्शनयोर्मध्ये पाण्यभ्युक्षणमपि इति विशेषः। ततः शेषंजजं किञ्चिद्वामहस्ते देयमिति। इदमाचमनं द्विराचमने पादप्रक्षालनवर्जं मखिल मावर्त्तते।

"रेतो मूत्र शकृत्त्यागे भोजने ऽध्व परिश्रमे"।
द्विराचमनं श्रोत वन्दनमेव, अन्यत्रत्वनियमः।

भोमनोपक्रमाचमने सकृदोष्ठेस्पर्शः तथा द्विजातीनामपि पुनराचमने ओष्ठस्पर्शन मात्रम्। "प्रत्युपस्पृस्यान्ततः शुचिर्भवतीति" गोभिलगृह्यादिति केचित्।

अथाचमन निमित्तानि।
निद्रा द्यूतं भोजनं निष्ठीवनं अनृतवचनाभिधानम्। जलपानम्, अध्येष्यमानता मैत्रं मूत्रम् अभ्यङ्गः। पादप्रक्षालनम्, अशुचिसम्भाषणम्, आचमनकरणस्याचमन निमित्तस्य सन्देहः, सिखोन्मोकः यज्ञोपवीतत्यागः, उष्णस्पर्शः वायसस्पर्शः। चाण्डाल दर्शनं रौद्र पित्र्यासुराभिचारिकान्यतममन्त्रपाठः, स्वकीयस्तवः, भोजनार्थितास्नानं वा सन्ध्याविधानम्। अस्नेह पञ्चनखास्थि स्पर्शः। चाण्डाल सन्तारणम् एतत्सम्भाषणम्, दन्तधावनम्, उच्छिष्टमानव स्पर्शः, अशुचि जलार्द्रभूमिस्पर्शः, मूत्रलेपान् उद्वर्त्तनादि लेपांश्चरेत्, ततो लेपान् तच्छेष लेपांश्च स्पृष्ट्वा पादप्रक्षालन पूर्वक माचमनं सिंहानिकालम्भः।

केकानाम् अग्नेः गवां ब्राह्मणस्य स्त्रिया वा स्पर्शः । महापथगमनम् अमेध्य-स्पर्शः, अप्रयतमानव स्पर्शः, नीवींपरिधानं रिक्तपाणेर्वयसे । उद्यमनम्, अङ्क्य उत्थानम् । अप्सुप्रवेशञ्च नद्याद्युत्तीर्य चर्मकारस्य रजकस्य चेणस्य धीवरस्य मौद्रिकस्य जालिकस्य मुखे भगस्य वेश्यायाः नटस्य वा स्पर्शः । दन्तश्लिष्टत्यागः अधरीयवायुत्यागः । स्यावान्तपर्यन्तौष्ठ स्पर्शः । उच्छिष्ठ स्मश्रु स्पर्शः, "चक्री ध्वजी सौणिक श्च, ग्राम्य कुक्कुर शूकरौ । एभिश्शिला न्याङ्गस्पर्शे तत्क्षाल-नाचमने" । नान्यधः प्रवाहो वा मद्य विष्वणादि स्पर्शे मृत्तौयैस्तत् क्षालना-चमने ।

अथ-द्वितीयाचमन निमित्तानि ।

भोक्ष्यमाणता सूत्रस्य पुरीषस्य गाढ़श्लेष्मणो वा त्यागः । निष्ठीवनं-पुरुष भाषणम्, उत्काशः श्रमादिजन्यः । श्वासातिरेकः श्मशानस्य चा क्रमणं स्नानं पानं द्यूतंस्वप्नं भोजन ञ्च रथ्यायाः भूतवलिस्थानस्य चा क्रमणं वस्त्रपरिधान ञ्च द्विराचमनान्तरं विष्णुस्मरणम् । कर्मस्थस्य च द्यूते निष्ठावी ते घूर्णाया परिधाने अश्रुपातने दक्षिण श्रवणस्पर्शनं दन्तश्लिष्टे अनुपलम्यमानाचमे उत्थाय फूत्कृते त्यागादेव शुद्धिः ।

मुखाज्जल विप्लुषो भूमौपतिताश्चरेणेनाक्रान्ताअपि नाशौचाय ततोपि क्षुद्रा अङ्गे पतितानाशौचाय द्वि रोम क्लेदिकाया न्तु अङ्गस्पर्शः सकृदाचमनाय । उच्छिष्टं स्पृशन्न व्यवहार्यं हस्तस्तद्भूमौ निधाय प्रोक्ष्यस्वयमाचमेत् । अनव्य-वहार्यंहस्त स्तु धावय न्नाचमेत् । द्रव्यहस्तो मैत्रादि कृत्वा तद्भूमौनिधाय पाद प्रक्षालनाचमने कृत्वा तदभ्युक्ष्य गृह्णीयात् । पृथुकादिहस्तः पुरीषादिकृत्वा तदनु भूमौघृत्वाचम्य तद्वस्तुस्पृशेत्, तेन तद्वस्तु शुद्धिः । पुष्पादिहस्तः उच्छि-ष्टादिस्पृक्, तद्भूमौनिधायः प्रक्षाल्याचम्य तद्वस्तु प्रोक्षयेत् । तैजसपात्रं धाव-मन् यद्युच्छिष्ट स्पृक्स्यात्, तदा तद्भूमौ घृत्वाचम्याद्भिः प्रोक्ष्य गृह्णीयात् ।

अथ—अन्नेनोच्छिष्टेन स्पृष्टस्या त्तदाप्येवम् । अथोच्छिष्टेन जलेन स्पृष्टःस्या त्तदाप्येवम् । अथोच्छिष्टेन जलेन स्पृष्टःस्या त्तदा वस्त्वादाया-चम्य प्रोक्ष्यगृह्णीयात्, वानस्पत्ये तु विकल्पः । पादयो राचमनं मधुपर्के सोमे ऽपोशाने फले मूले ताम्बूले इक्षौ कर्पूर खदिरादौ भुक्त स्नेहानु लेपने च नोच्छिष्टोभवति ।

अथ—दन्त धावनम् ।

एत त्तु प्रातः स्नानात्प्राक् श्रुतमपि स्वतन्त्रं नत्वङ्गम् । पुरुष संस्कारुप फलवत्वात् । अतएव दन्तान्प्रक्षाल्य स्नायादिति श्रुतिरपि कालार्थ संयोगपरा । अथैतत्प्रयोगः । हस्तौ पादौ प्रक्षाल्य द्विराचम्यप्राङमुख उदङमुख-ऐशान्याभिमुखो वा । "ओं आयुर्वलं यशोवर्चः प्रजापशु वसूनि च ब्रह्म प्रज्ञाञ्च मेधाञ्च त्वन्नो धेहि वनस्पते" । इति मन्त्रेण दन्तधावनं कुर्यात् । तद्यथा आम्र, आम्रातक, विल्व अपामार्ग शिरिख खदिरतित्तिनी वेणुपृष्ठ वट आसन अर्क करञ्ज करवीर शाल विट खदिर मालती, अर्जुन, कदम्व, निम्व, उदुम्वर काष्ठानि विहितानि । विहित निषिद्धानि तु करञ्ज तिन्तिनी निम्व शालवटकाष्ठानि ।

निषिद्धानि तु ।

पलाश कोविदार श्लेष्माचक तिन्दुक शाकवृक्ष सिन्दुरालिका शिखण्डी वेणुगर्भ प्लक्ष माषक वदरी शमी शिंशपा कपित्थ हरीतकी अश्वकर्ण आमलक विभीतक धन्वन, पिप्पल इङ्गुद, गुग्गुल, शोभाञ्जन, पारिभद्रक, कदली शाल्मलि, काष्ठानि । अन्यान्यपिमधुराणि अम्लानि च विहितेष्वपि, ओष्ठस्पर्शग्रग्थिकं वृक्षशुष्कं सच्छिद्रं पूतिगन्ध अचूर्णिताग्रंचिक्कणं त्वग्विहीनं पाटितं सद्यस्छिन्नं सपत्रकम् अपरिचित ञ्च निषिद्धम् ।

अत्र चेयं व्यवस्था ।

विहित मुपादेयम्, तदलाभे विहित निषिद्धम् । तदलाभे अविहित निषिद्धम् । निषिद्ध न्तु सर्वथानोपादेयम् । दन्त काष्ठानामलाभे निषिद्धदिने च अपां द्वादश गन्डषै र्मुख क्षालनम् । निषिद्धदिनानि तु पञ्च पर्वाणि, प्रतिपत्, षष्ठी, नवम्यः उपवासदिनं श्राद्धदिन ञ्च, अत्र पत्रादिना दन्तधावनमिति तु योगीश्वरः । अत्र, द्वादशाङ्गुलं मुख्यम् । तदसम्भवे नवाङ्गुलम्, तदसम्भवे ऽष्ठाङ्गुलं दन्तकाष्ठं पोथिताग्रं तेन दन्तान् धर्षयेत् । ततस्तत्प्राक्षाल्य भक्त्वा शुचौदेशोत्यजेत् । द्वादशाङ्गुलं ब्राह्मणस्य । नवाङ्गुलं क्षत्रियस्य, अष्ठाङ्गुलं वैश्यस्य षड़ङ्गुलंशूद्रस्य चतुरङ्गुलं स्त्रीणामिति स्मृति मञ्जूषा ।

अनिषिद्धदिने दन्तकाष्ठ मकृत्वा ये विष्णोःपूजादिकं कुर्यात् । तेन सर्वकालकृता विष्णुपूजा विनाशिताय त्वञ्जन सहचरितं दन्तधावनं तदितो भिन्न मेव । किन्तु मङ्गल्यन्तदिति ।

अथ—प्रतस्नानादि:।

स्नान सम्वर्द्धनीय व्याधिरहित: पुमान् अरुणोदयवेलायां प्रातःस्नानं कुर्यात्। तच्च गङ्गायान्तदलाभे, नदी मात्रे, तदलाभे, प्रस्रवणे, तदलाभे परकृतोत्सृष्टे, तदलाभे उद्धृतोदकेनापि, रुग्णश्चेत्तदा उष्णोदकेनापि, यथा-मध्याह्नस्नान सन्ध्यातर्पणानि, कातीयकल्प प्रयोगविधि सिद्धानि। तथा-प्रातरपीति। "यथाहनि तथाप्रात रितिवचनात्"।

यत्तु—कातीयकल्प प्रयोगविधिर्मध्याह्नविषयतया प्रातरसन्ध्यावन्दन तर्पणात्पश्चादिति सभ्रम:। स्नानविधिरेष इत्यनेन मध्याह्निक स्नानेति कर्त्तव्यतायाः प्रातः स्नानेप्यतिदेशात्। अतएव—"यथाहनि तथा प्रातरिति"। स्नानाशक्तौ तु—शिरोवर्जजलसंयोग:। तत्राप्यशक्तौ, आर्द्रेणवाससाङ्ग सम्मार्जनम्, यदा तु कातीय कल्पोक्तं स्नानंकृतं तदा तत्कल्पोक्तमेवतर्पणमपि आरभ्याधीनत्वात्। एवं पद्मपुराणादिकल्पे। यदि तु नरसिंह पुराणोक्तं स्नानं विधीयते, तदा—तस्यापि, वैधस्नानतया तर्पणाङ्ग कत्वेनियते, पद्मपुराणादि तर्पणस्यारभ्याधीततया तन्निराकांक्षत्वेन विष्णुपुराणीयन्तर्पणं मत्वेति, उभयोस्साकांक्षत्वात्, नष्टाश्वदग्धरथन्यायात्।

तच्च देवेभ्यो ऽञ्जलित्रयं, ऋषिभ्योञ्जलित्रयम्, ततः प्रजापतये एक्रोञ्जलिरित्येवंरूपम् "त्रिरपः प्रीणनार्थाय, देवानामपिवर्जयेत्। ऋषीणाञ्च यथान्यायं, सकृच्चापि प्रजायते"। रिति विष्णुपुराणात्, व्याख्यादिवशा दुष्णोदकादिना स्नान करणे स्नानाङ्ग तर्पणाभावादिदमेव तर्पणङ्कार्यम्। "तर्पण न्तु शुचिः कुर्यात्, प्रत्यहं स्नातको द्विजः। देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम्"। इतिवचनात्। एवं तर्पणान्तङ्कर्मंकृत्वा गुरूनभिवाद्य वेदानधीयीताध्यापये च्च। तथान्यायमीमांसेअपि तद्वत्, यातु-वासुदेवादीनां पूजाकाम्या सा पूर्वाह्ने, यांतु नित्या सा प्रहरद्वयोपरितत्ते विष्णुगृहं व्रजेदित्यभिधानात्। प्रातः स्नाने तु साग्निना गायत्रीजपो न कार्यो होमलोप प्रसङ्गात्। निरग्निना तु स कार्यः। "सहस्र परमान्देवी मित्यादि" स्मरणात्। सन्ध्यावन्दने तु, उद्वय, मुदुत्यं, चित्रं, तच्चक्षु, रिति मन्त्र चतुष्टयेत्योपस्थानम्। सन्ध्यात्रयेप्यावश्यकम्।

विभ्राडित्यनुवाक् पुरुषसूक्त शिवसङ्कल्पः। मण्डल ब्राह्मणै स्तु यदुपस्थानं तत्सायं सन्ध्यायान्नास्त्येव, किन्तु, मध्याह्नसन्ध्यायां तदापिकाम्यं "मध्याह्न उदयेवापि, विभ्राडा दीच्छयाजपेत्"। इति छन्दोग परिशिष्टात्। उदयेइत्यह: स्नानपरमिति पारिजात:।

यत्तु—संहिता मात्राभिज्ञा विभ्राडित्यनुवाक्पुरुषसूक्त शिवसङ्कल्पाना मन्यतमेनोपस्थानमाचरन्ति, तदयुक्तम्। विभ्राडादीच्छया जपेदित्यनेन चतुर्णां मिलितानामेव काम्यतया प्राप्तत्वात्। प्रातः स्नाने तु गायत्रीजपभूम्ना सवितु र्यदि ते कृतेनाङ्ग तर्पणे न नित्य तर्पणस्यापि प्रसङ्गात्सिद्धौ, वैधस्नानाकरणे तद्दिने पुनस्तर्पण न्न कार्यम्।

स्नान न्तु यत्प्राक् कथित न्तच्छूद्र खाते, अनुत्सृष्ट परखाते उत्सृष्टानुत्सृष्ट स्व खाते न कार्यम्। उत्सृष्ट परखाते तु पुष्करिण्यां पञ्च, तड़ागे सप्त, कूपे परकीये त्रीन्घटानुद्धृत्य कार्यम्। निवद्धासु नदीसु जलान्तरेषु वा निरुद्धेषु पिण्डत्रयोद्धार:। अत्र स्नानार्थ पिण्डोद्धारेणैव तर्पणार्थक पिण्डोद्धारस्यापि सिद्धिः। प्रयोगैक्यात्। अत्र तु स्नानमकृत्वा तर्पणकरण पक्षे तर्पणादव्यवहित प्रागेव स कार्यइति।

अथ—स्नानप्रयोगः।

तत्र—माध्यन्दिनीयानां कात्यायनोक्त कल्पेन स्नानं मुख्यम्, तदनवगमे याज्ञवल्क्योक्तेन, तद्यथा—अघमर्षण सूक्तेन त्रिः पठितेन जलाभिमन्त्रणम्, तत स्तथैव तीर्थ परिकल्पनम्। ततस्तेनैवाचमनं तत स्तेनैवमार्जनम् ततस्तेनैवान्तर्जल जपः। ततस्त्रिपठित्वा स्नानम् अत्र च कल्पे कात्यायनोक्तमेव तर्पणम्, अयन्तुविशेषः। ऋषितर्पणानन्तरमत्र तपोधन तर्पणमधिकम्।

ऋषि तर्पणानन्तर न्तु वसु रुद्रादित्यानान्दिव्य पितृणा न्तर्पणं, यम तर्पण न्तु नास्त्येव, वसु रुद्रादित्यानान्तर्पणे स्वधानम इति स्वीयषट्पुरुषाणान्तर्पणे, अमुकगोत्रोऽस्मत्पिताअमुकशर्मा तृप्यता मिदन्तिलोदकं तस्मैस्वधानम इति कल्पतरुः। सपदास्मत्पदे विहायैवमेवेति रत्नाकरः। सकारमपहाय यथाकल्पतरु प्रयोग इति वर्द्धमानाह्निकम्। अस्मत्पदं सकार न्नमष्पद ञ्चापहाय श्रीदत्ताह्निकम्। मातरमुपक्रम्य तर्पणे तु स्वधाकारमात्रमिति सर्वानुमतम्। तर्पणे कातीयकल्पे याज्ञवल्कीय कल्पे च, मन्त्रान्वय स्तु सर्वानुमतएव।

पद्मपुराणीय तर्पणे तु मन्त्रान्वयो वर्द्धमानाह्निके लिखितोऽस्मदाद्यनुमतश्च तत्र च केचिद्दर्वी होमाधिकरण विरोधमाहुः, ते भ्रान्ताः। देवतर्पण न्तु माध्यन्दिनीयैः प्रागग्रकुशत्रयोपरि सयवोदकेन ऋजु कुशत्रयेण वामान्वारब्धदक्षिणकरेण कार्यम्। मनुष्य तर्पण न्तु निवीतिना अञ्जलिना प्रजापति तीर्थेन कार्यम्।

ऋषि तर्पण न्तु देववत्, पितृतर्पण न्तु प्राचीना वीतिना दक्षिणामुखेन वामजानु पृष्ठभुवा मोटक सहित तिलोदकेन अञ्जलिनापितृतीर्थेनादाय पितृतीर्थेनत्याज्यम्। अयन्तुविशेषः षट्पुरुषाञ्जलिसु प्रथमोञ्जलिर्दशाङ्गुल पर्यन्त मूद्ध्वं करणीयः। द्वितीयस्तु एकादशाङ्गुलपर्यन्तं, तृतीय न्तु, द्वादशाङ्गुल पर्यन्तम्। पितृतर्पण जलेषु वा। कर्पूर कुङ्कुमादीनां प्रक्षेपः करणीयः। पात्रेणापि तर्पणे क्रियमाणे अञ्जलि व करणीय एव, अञ्जलि पात्रयो र्विकल्पानभिधानात। मोटक न्तु पात्राद- धोहस्तस्योपरि धार्यम्। नतु पात्रोपरि अङ्गुष्ठेन यन्त्रेण तीर्थाविरोधस्या- त्तर्पणजलं तथा त्याज्यं यथा पितृतीर्थंस्पृशन्ताति, स्नान शाटया न्तु अपसव्येनैव मृत्त्रयदानं प्रक्षालन ञ्च तेनैव ततस्तेनैव तर्पणम्। सोयं प्रतिपत्तियागः अत्र ब्रह्मतर्पणाञ्चलिपर्यन्तमेकमेकं एव प्रयोगः। अत्र च स्थल एव वा जल एव वा जलत्यागो नतु द्वयोर्विकल्पः। उभयस्याशास्त्रार्थत्वात्। व्रीहियवयोरिव।

अथ—कातीय स्नानकल्पः।

तदित्थं कातीय स्नान प्रयोगः। प्राचीनि मृत्तिकार्द्र गोमय कुश कृष्णतिल सुरभि पुष्पाण्युपादाय जलसमीपङ्गत्वा तत्तीरे शुचौ वस्त्रादौ पृथक् पृथक् प्रतिष्ठाप्य मृज्जलाभ्यां सकृद्दक्षिणं ततो वामं पादं तथापाणी प्रक्षाल्य परितोपग्रहपाणि राचम्य। "ओं उरूहि राजा वरुणश्चकार सूर्याय पन्था मन्वेतरा उँ। अपदेपादा प्रति धातवै करुतापवक्ता हृदया विधश्चित्। नमोवरुणायाभिष्ठितो वरुणस्य पाशः"। इतितोयमामन्त्र्य, ओं येते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः, तेभिर्नोऽद्यसवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः। इति प्रदणिणं जलमावर्तयेत्। ओं सुमित्रियान आप ओषधयस्सन्तु इति अञ्जलिनाजलमादाय, ओं दुर्मित्रिया स्तस्मै सन्तु योस्मान् द्वेष्टि यञ्च वयन्द्विष्मः इति द्वेपात्प्रतिसिञ्चेत्। ततः कटिवस्थि मूरुजंघे चरणौकरौ प्रत्येकं त्रि स्त्रि

मृ द्वारिकाभ्यां प्रक्षाल्य एक:पादं स्थले अपरं पाद: जले निधायाचम्य उदकंनम-स्कृत्य, "ओं इदं विष्णुर्विचक्रमे त्रेधानिदधेपदम्। समूढ़मस्य पांसुरे"। इति-मन्त्रेण मृत्तिकया गात्राण्यालिप्य, नाभिमात्रं जलं प्रविश्य।

"ओं आपो अस्मान्मातर: शुद्धन्तु घृतेन नोघृत: पुनन्तु। विश्वंहि विप्रं प्रवदन्ति देवी:"। इति मन्त्रेण प्रवाहे प्रवाहाभिमुखो ऽन्यत्र सूर्याभिमुखोम-ज्जेत्। ततः "ओं उदिदाभ्य: शुचिरापूतएमि"। इतिमन्त्रेणोन्मज्जेत्। रत्ना-करमते द्वाभ्यांमन्त्राभ्यां मज्जनमेव क्रियते।

अथ तूष्णीं पुनर्निमज्योन्मज्य, ततोद्विराचम्य, "ओंमानस्तोकेतनये मान आयुषिमानोगोषुमानो अश्वेसुरीरिष:। मानोवीरान्नुद्रभमिनो वधिर्हविष्मन्त: सदमित्वाहवामहे"। इति मन्त्रेण गोमयेन गात्राण्यालिप्य। "इमम्मे वरुणश्रु धीर्हवमद्या च मृड़य। त्वामवस्यु राचके, ओं तत्वायामि ब्रह्मणावन्द्यमानस्तु-दाशास्त यजमानो हविर्भि:। अहेड़मानोवरुणे हवोध्युरुशं समान आयु: प्रमौषी:"। "ओं त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवया सिसीष्ठा:, यजिष्ठो वह्नितम: शोशुचानो विश्वाद्वेषां सि प्रमुमुग्ध्यस्मत्"। ओं सत्वन्नो अग्ने वमोभवोतीने दिष्ठो अस्या उषसोव्युष्टौ अवय क्षणो वरुणं रराणो व्रीहि मृड़ीकं सुहवोन एधि"। "ओं मापो मौषधीर्हि सीर्द्धाम्नो धाम्नो राजं स्ततो-वरुण नो मुञ्च"। यदाहुरुग्न्या इति वरुणेतिशपामहे। ततो वरुण नो मुञ्च। ओं अवमृथनिचूम्पुण निचेरुरसिनि चुम्पुण:। अवदेवैर्द्द्वक्तमेनो यामिव मवमर्त्ये र्मर्त्यक्कतं पुरु राह्णोदेव विषंपाहि"। "ओं उदुत्तमं वरुणपाश मस्मद बाधमं विमध्यमंश्रथाय। अथावय मादित्यव्रते, तवानागसो अदितये स्याम"। "ओं मुञ्च न्तु मा पश्यादथो वरुण्यादुत। अथोयमस्य पड्वीशा सर्वस्मादेव किल्विषात्"। इत्यष्टभिर्मन्त्रै: प्रत्येकं हस्तेन जलं क्षिपेत्। तत: तुष्णीन्निमज्जेत्। ततो द्विराचम्य, तत: प्रणव व्याहृति सहितया गायत्र्या, तत:-"ओं आपो हिष्ठा मयोभुव स्तान ऊर्जे दधातन। महेरणायचक्षसे। ओं योव: शिव तमोरस स्तस्य भाजयतेहन:। उशतीरिव मातर:। ओं तस्मा अरङ्ग मा-मवो यस्य क्षयाय जिन्वथ आपो जनयथाचन:। तत:—"ओं इदमाप: प्रवहता, च मुञ्च मलयञ्च यत्। यच्चाभि दुद्रोहा नृतं यच्च शेते अभीरुणम्, आपो मा तस्मादेनस: पावमानो रमुञ्च तु"। तत "ओं हविष्मती रिमा आपो हविष्माँ"।। आविरासति "हविष्मान्देवो आध्वरो हविष्माँ"।। अस्तुसूर्य:।

ततः "ओं देवी रापो अपान्न पाद्योव ऊर्मिहविष्य इन्द्रिया वान्मदिन्तमः। तन्देवेभ्यो देवतादत्तशुक्र पेभ्यो येषाम्भागस्त्रिस्वाहा"। ततः ओं कार्षिरसि समुद्रस्यत्वा क्षित्या उन्नयाभि। समापो अद्भिरग्मतसमौषधीभिरोषधीः"। ततः ओं "आपोदेवा मधुमती रगृभ्णन्तूर्यस्वती राज लुञ्चितानाः याभिर्मित्रा वरुण वभ्यषिञ्चन्याभिरिद्र मनयन्नत्यरातीः"।

ततः "ओं द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव। पूतं पवित्रे णैवाज्य माप श्शुन्ध न्तु मैनसः। ओं शन्नोदेवी रभिष्टय आपोभवन्तु पीतये। संयोरभि स्रवन्तु नः। ओं अपां रसलमुद्वय संसूर्ये। सन्त समाहितम्, अपां रसस्य यो रसस्तम्वोगृह्णास्युन्तम्। ओं आपोदेवी रूपमृज मधुमती च यद्ध-र्मयिप्रजाभ्यः तासा मास्थानादुर्जिहता मोषधयः स्वपिप्पलाः। ततः ओं "पुनन्तु मा पितरः सोन्यासः तुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः पवि-त्रेण गतायुषाः। ओं पुनन्तु मा पितामहाः पुनन्तुप्रपितामहाः। पवित्रेण शता-युषा विस्व आयुर्व्यषणवै। ओं अग्ने आयुषि परम आसुवोर्ज मिषञ्चनः। आरे-वाधस्व धुच्छुनाम्"। "ओं पुनन्तु मां देवजनाः पुनन्तु मनसाधियः। पुनन्तु विस्वभूतानि जातवेद ष्प्रनीहिमां। उपवीतेन पुनीहि मा शुक्रेण देवदीव्यत्"। अग्नेक्रत्वाक्रतुम्। मनुः। तत उ यते पवित्र मर्चिष्यग्ने त्रितत मन्तरा। ब्रह्म तेन पुनातु मा। उपरमानः सो अद्यनः। पवित्रेण विचर्षाणिः। यः पोता स पुनातु मां। उभाभ्यां देव सवितः पवित्रेण सवेन च। माम्पुनीहि विस्वतः। ओं वैस्व-देवी पुनती देव्यागद्यन्यासि मावाह्यस्तन्नोवीतपृष्ठाः। तयामदन्तः मधमा तद-स्व। वयं श्यामपतयो रयीणाम्"। तत ओं "चित्पति र्मा पुनातु छिद्रेण पवि-त्रेण सूयस्य रस्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छके-यम्। ओं वाक्पति र्मा तुनातु छिद्रेण पवित्रेण सूर्यस्य रस्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्"। "ओं देवोना सविता पुना-त्वच्छिद्रेण पवित्रेण सूर्यस्य रस्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्"। ततः प्रणव व्याहृतित्रय सहितया मार्जनम्। इति कुशत्र-येण चतुर्विंशति मार्जनानि कुर्यात्। ततः पूर्ववत्—इमम्म मन्त्राष्टकेन हस्तेना-ष्टकृत्वःशिरसि जलं क्षिपेत्। ततो जले मग्नः सन् अघमर्षण सूक्तस्याघमर्षण ऋषि रनुष्टुप्छन्दोभाववृत्तोदेवता अस्वमेधा वभृथे विनियोग इतिस्मृत्वा ओं ऋतञ्च सत्यञ्चा भीद्धा तपसो ध्यजायत ततो रात्र्यजायत, ततस्समुद्रोअर्णवः

समुद्रादर्णवादधि सम्वत्सरो अजायत, अहोरात्राणि विदध द्विस्वस्य मिषतो-वशी। सूर्या चन्द्रमसौधातायथापूर्वं मकल्पयत्। दिवञ्च पृथिवीञ्चान्तरिक्ष-मथोस्वः। इति त्रिः पठेत्।

अथवा त्रिद्रूयादाम् - अथवा - आयङ्गौरितित्र्यचंत्रिः भूरित्यादि स्वरो मित्यन्त मन्त्रेण त्रिरावृत्तेनप्राणायामं वा त्रिः कुर्यात् प्रणवं वा त्रिः पठेत्। परमात्मरुपं वा विष्णुं स्मरेत्। तत उत्तीर्य धौत वाससी परिधाय मृदो करौ-प्रक्षाल्याचम्य। आचारा त्तिलक करणम्।

अथ – सन्ध्याप्रयोगः।

ततोपवीती वद्धशिख आसने कुशोपरि ऐशान्याभिमुख उपविष्टः पादौ प्रक्षाल्य वामपाणौ सपिञ्जलान् समूलान् गोकर्ण मात्रान् नातिदीर्धान्वा कुशान् कृत्वा दक्षिणे यथोक्त पवित्रन्निधायासनन्त्यक्त्वा द्विराचम्य, अघमर्षण सूक्तस्याघ-मर्षण ऋषिरनुष्टुप्छन्दो माववृत्तो देवता अस्वमेधा वभृथेविनियोगः इतिस्मृत्वा ऋतञ्च सत्यञ्चाभीद्धा तपसो ध्यजायत। ततोरात्र्यजायत ततस्समुद्रो अर्णव स्समुद्रा दर्णवादधि सम्वत्सरो अजायत अहोरात्राणि विदध द्विस्वस्य मिषतोवशी सूर्याचन्द्रमसौ धाता यथापूर्वं मकल्पयत्, दिवञ्च पृथिवीञ्चान्तरिक्ष मथोस्वः।

इत्यपोमिस्सं मन्त्र्य द्विराचमेत्। इदानींप्रणवेण व्याहृतिभिर्गायित्र्या अ ङ्गेन सामगानामिवास्माकमपि मार्जन चतुष्टयमितिबृद्धाः। ततः प्रातर्गायत्री नाम्नीं रक्तां, मध्याह्ने सावित्री नाम्नींश्वेतां सायं सरस्वती नाम्नीं कृष्णां शू-स्त्र्याकारां सन्ध्यांधृत्वा ओं कारस्य ब्रह्म ऋषि र्गायत्री छन्दो ग्निर्देवता शुक्लो-वर्णंस्सर्वकर्मारम्भे विनियोगः। सप्तव्याहृतीनां प्रजापति ऋषि र्गायित्र्युष्णिग-नुष्टुप्बृहतीपंक्ति त्रिष्टूप् जगत्यस्छन्दां स्यग्नि वाय्वादित्य वृहस्पति वरुणेन्द्र विस्वेदेवा देवता अनादिष्ट प्रायश्चित्ते प्राणायामे विनियोगः। गायत्र्या वि-स्वामित्र ऋषि र्गायत्रीछन्दस्सवितादेवतोपनयने प्राणायामे विनियोगः। शिर-सः प्रजाप्रतिर्ऋषि रग्नि वायुसूर्या देवताः प्राणायामेविनियोगः। इति ऋष्या-दिकं स्मृत्वा, प्रागात्मानंवारिणा वेष्टयित्वा, कुशत्रयासनस्थो वद्धासनो निमी-लित नयनो मौनी प्राणायाम त्रयं कुर्यात्।

तत्र—वायोरादान काले पूरक नामा प्राणायामः। तत्र—श्याम श्चचतु र्भुजं विष्णुं नाभौ ध्यायेत्। धारणकाले कुम्भकः। तत्र-कमलासनं रक्तवर्ण-

चतुर्मुखं ब्रह्माणं हृदिध्यायेत्। त्यागकाले रेचकः। तत-श्वेतं त्रिनेत्रं शिवं ललाटे ध्यायेत् त्रिष्वप्येतेषु प्रत्येकं त्रिर्मानसो मन्त्रजपः। मन्त्र स्तु ओं भूः ओं भुवः, ओं स्वः ओं महः ओं जनः। ओं तपः ओं सत्यम्, ओं तत्सवितुर्वरेण्यं भर्गोदेवस्यधीमहि, धियोयोनः प्रचोदयात्। ओं आपोज्योतीरसोमृतं ब्रह्म भूर्भुवस्स्वरों। एवंरुपः। ततः सूर्यश्चमेति ब्रह्मऋषिः प्रकृतिस्छन्द आपोदेवता आचमने विनियोगः। इतिस्मृत्वा ओंसूर्यश्च मामन्युश्च मन्युपतयश्च मन्युक्तेभ्यः पापेभ्यो रक्षन्ताम्, यद्र्यात्र्या पापमकार्षम्मनसावाचा हस्ताभ्यां पद्भ्या मुदरेण शिश्नारात्रिस्तद वलुम्पत। यत्किञ्चि द्दुरितम्मयि इदमहम्मा ममृत योनौसूर्ये ज्योतिषि जुहोमि स्वाहा। इति प्रात स्सन्ध्यायामाचमेत। आपः पुनन्त्विवति विष्णुऋषि रनुष्टुप् छन्द आपोदेवता आचमने विनियोगः। इति स्मृत्वा - ओं आपः पुनन्तु पृथिवीं-पृथिवीपूता पुनातुमाम्। पुनन्तु ब्रह्मण स्पति र्ब्रह्मपूता पुनातु माम्। यदुच्छिष्ट मभोज्यं यद्वा दुश्चरितं मम। सर्वं म्पुनन्तु मामापोअसताञ्च प्रतिग्रहं स्वाहा। इति मध्याह्न आचमेत्।

अग्नि श्चमेति रुद्रऋषिः प्रकृतिस्छन्द आपोदेवता आचमेन विनियोगः। इतिस्मृत्वाओं अग्निश्च मामन्युश्च मन्युपतयश्च मन्युक्तेभ्यः पापेभ्यो रक्षन्ताम्। यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्या मुदरेणशिश्ना अहस्तद वलुम्पत। यत्किञ्चिदद्दुरितंमयि इदमहम्मा ममृत योनौ सत्ये ज्योतिषिजुहोमि स्वाहा, इति सायमाचमेत्।

तत—आपोहिष्ठेत्यादि त्र्यृचस्य सप्तभिः पदैः शिरसि अष्टमेन भूमौ नवमेन शिरसि कुशत्रयेण जलं क्षिपेत् तद्यथा आपोहिष्ठेत्यादि त्र्यृचस्य सिन्धुद्वीप ऋषि गायत्री छन्द आपोदेवता मार्जने विनियोगः। ओं आपोहिष्ठा मयोभुवः ओं तान ऊर्जेदधातन—ओं महेरणायचक्षसे ओं योवः शिव तमोरसः। ओं तस्य भाजयतेहनः ओं उशतीरिव मातरः। ओं तस्मा अरङ्ग मामवो यस्यक्षयाय जिन्वथ—ओं आपो जनयथाचनः। ततोञ्जलिना जलमदाय वारत्रयं द्रुपदां पठित्वा तज्जलं शिरसिक्षियेत्।

तथाहि—द्रुपदादिवेति कोकिलोराज पुत्रऋषि रनुष्टुप् छन्द आपोदेवताः सौत्रामण्यवभृथे विनियोगः, इतिस्मृत्वा—ओं द्रुपदादिवमुमुचानः स्विनः स्नातो

मलादिव । पूतंपवित्रेणैवाज्य मापश्शुन्धन्तु मैनसः । ततोदक्षिणकरेण जलमादाय घ्राणन्तत्रासज्य, आयतालुरनायतालुर्वा ऋष्यादिकं स्मृत्वा त्रिस्सकृद्वाघमर्षणसूक्तं जपेत्, तच्चोक्तम्, अन्तश्चरसीति तिरश्चिन ऋषि रनुष्टुपछन्द आपोदेवता अपामुपस्पर्शने विनियोगः । ओं अन्तश्चरसिभूतेषु गुहायां विस्वतोमुखः त्वं यज्ञ स्त्वंवषट्कारआपोज्योती रसोमृतम् इत्याचमेत् ।

तत-उत्थाय प्रणव व्याहृतित्रय गायत्र्यासूर्यामिमुखं सपुष्पाञ्जलिं क्षिपेत् । ततो भूम्यलग्नोभयगुल्फतल भागो भूमिलग्नैकपादो वा भूमि लग्नार्द्धपादो वा सायं प्रातवद्धाञ्जलिर्मध्याह्न ऊर्द्ध वाहुः सदा सूर्याभिमुखः सूर्यमुपतिष्ठेत् । उद्वयमिति हिरण्यस्तुप ऋषिरनुष्टुप्छन्दःसूर्योदेवता सूर्योपस्थाने विनियोगः । इतिऋष्यादिकं स्मृत्वा, ओं उद्वयन्तमसः परिस्वःपश्यन्त उत्तरम् । देवन्देवत्रा सूर्यमगन्मज्योतिरुत्तमम् । उदुत्यमिति प्रस्करण ऋषि र्गायत्रीछन्दः सूर्योदेवता सूर्योपस्थाने विनियोगः ।

ओं उदुत्यञ्जातवेदसं देवं वहन्तिकेतवः । दृशे विस्वाय सूर्यम् । चित्रमिति कौत्स ऋषिस्त्रिष्टुप् छन्दः सूर्योदेवता सूर्योपस्थाने विनियोगः । ओं चित्रन्देवाना मुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्राद्यावापृथिवी अन्तरिक्षं सूर्य आत्माजगतस्तस्थुषश्च । तच्चक्षुरिति दध्यङ्ङाथर्वणऋषिरक्षरातीतपुर उष्णिक् छन्दः सूर्योदेवता सूर्यो पस्थाने विनियोगः ।

ओं तच्चुर्द्देवहितं पुरस्ताच्छुक्र मुच्चरत् । पश्येम शरदश्शतम्, जीवेम शरदश्शतग्वं श्रृणुयाम शरदश्शत प्रब्रवाम शरदश्शत मदीनाः स्याम शरदः शतम्भूयश्च शरदश्शतात् । सर्वानुपक—मण्यांउद्वयं सौरी, अनुष्टुप प्रश्नत्वस्य उदुत्यं प्रस्कणुः । सौरी—गायत्री कुत्स—आङ्गिरसः त्रैष्णुभं सौरी, तच्चक्षुपुर उष्णीक सौरी । तथा च आद्यायाजलादुत्क्रमणे विनियोगः । मध्ययोर्द्दक्षिण होमकरणे, चतुर्थ्या महावीर शान्तिकरणे विनियोगउक्तः । तेन-उद्वयमित्यस्यप्रस्करण ऋषि रनुष्टुप छन्दः सूर्योदेवता जलादुत्क्रमणे विनियोगः । उदुमित्यस्य प्रस्करणऋषि र्गायत्री छन्द सूर्योदेवता दक्षिणहोमे विनियोगः । चित्रमित्यस्य कुत्स आङ्गिरस ऋषिस्त्रिष्टुप्छन्दः सूर्योदेवता दक्षिणहोमे विनियोगः ।

तच्चक्षुरित्यस्य पुर उष्णिक्छन्दःसूर्यो देवता महावीर शान्तिकरणे विनियोगः। ततः प्रातर्मध्याह्न उद्धर्वजानुः सायमुपविष्टःप्रत्यङ्मुखः ओं हृदयायनमः, ओं भूः शिरसेस्वाहा, ओं भुव शिखायैवषट्, ओं स्वः कवचायहूँ, ओं भुर्भुवस्वः नेत्राभ्यां वौषट्, ओं भुभुवः स्वःअस्त्रायफट्, इत्यङ्गानि त्रिरावृत्य ओंकारस्य ब्रह्मऋषिर्गायत्री छन्दो ग्निर्देवता जपेविनियोगः।

व्याहृति त्रयस्य प्रजापतिर्ऋषि र्गायत्र्युष्णि गनुष्टुप् छन्दांस्यग्नि वाय्वादित्यादेवता जपेविनियोगः। गायत्र्याविस्वामित्र ऋषिर्गायत्रीछन्दः सवितादेवता जपेविनियोगः, इतिऋष्यादिकं स्मृत्वा- तेजोसीति देवाऋषयआज्यन्देवता आज्यावेक्षणे विनियोगः, इतिस्मृत्वा ओं तेजोसि शुक्रमस्य मृतमसि धामनामासिप्रियन्देवाना मनाधृष्टन्देव यजनमसि इति गायत्री मावाह्य परोरजस इति त्रिमलऋषि रनुष्टुप् छन्दः परमात्मादेवता गायत्र्युप थाने विनियोगः। ओं गायत्र्यस्येकपदीद्विपदी त्रिपदी चतुष्पद्य पदसि नहिपद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसेमावदोमा प्रापदिति, ब्राह्मणोगायत्री मुपस्थाय गायत्रीन्ध्यात्वा, दक्षिणानामिकायां कुशत्रयसुवर्ण रजतानि धृत्वा रूद्राक्षादन्यतम मालया शतकृत्वः सहश्रकृत्वो वा दशारभ्य यथाशक्तिञ्जपेत्।

ततः कामनापक्षे विभ्राड़ित्यनुवाकेन पुरुषसूक्तेन शिवसङ्कल्पेन मण्डल ब्राह्मणेन च उपस्थाय, प्रदक्षिणीकृत्य नमस्कृत्य तूष्णीं विसर्जयेत्। ततो दर्भेषूपविश्य दर्भपाणिः अधीतवेदस्यपूर्वाहपठितम्भागं त्यक्त्वा तत्सन्निहित पठित मुपक्रम्य, ब्रह्म यज्ञ सिद्धयर्थम्पठेत्।

ततः पूर्वाभिमुखः ओं विस्वेदेवा सआगच्छत शृणुताम इमंहवं इदम्बर्हि र्निषीदत। ओं विश्वेदेवाः हवम्मे ये अन्तरिक्षे यउपद्यविष्ट ये अग्नि जिह्वा उतवायजता आसद्यस्मिन्वर्हिषि मादयध्वम्। इत्यावाह्य, सयव जलेन वामान्वारब्ध दक्षिणकरेण दर्भेषु दर्भः पूर्वाग्रेषु देवानृषीन् तर्पयेत् तद्यथा ओं ब्रह्मा-तृप्यताम्, ओं विष्णुस्तृप्यताम्, ओं रुद्रस्तृप्यताम्, ओं प्रजापति स्तृप्यताम्। ओं देवास्तृप्यन्ताम्, ओं छन्दांसि तृप्यन्ताम्। ओं वेदास्तृप्यन्ताम्, ओं ऋषयस्तृप्यन्ताम्, ओं पुराणाचार्यास्तृप्यन्ताम्, ओं गन्धर्वास्तृप्यन्ताम्। ओं इतराचार्यास्तृप्यन्ताम्, ओं सम्वत्सरम्मावयवस्तृप्यन्ताम्। ओं देव्यस्तृप्यन्ताम्, ओं

अप्सरसस्तृप्यन्ताम्, ओं नागास्तृप्यन्ताम्, ओं सागरास्तृप्यन्ताम्, ओं पर्वतास्तृप्यन्ताम्, ओं सरित स्तृप्यन्ताग्। ओं मनुष्यास्तृप्यन्ताम्।

ओं यक्षास्तृप्यन्ताम्, ओं रक्षांसि तृप्यन्ताम्, ओं पिपासा स्तृप्यन्ताम्, ओं सुपर्णा स्तृप्यन्ताम्, ओं भूतानितृप्यन्ताम्, ओं पशव स्तृप्यन्ताम्, ओं वनस्पतय स्तृप्यन्तां। ओं ओषधय स्तृप्यन्ताम्, ओं भूतग्राम श्चतुर्विधः तृप्यन्ताम्, ओं मरीचि स्तृप्यताम्, ओं अत्रिस्तृप्यताम्, ओं अङ्गिरास्तृप्यताम् ओं पुलस्त्य स्तृप्यताम्, ओं पुलह स्तृप्यताम्, ओं क्रतु स्तृप्यताम्, ओं वशिष्ठ स्तृप्यताम्, ओं भृगुस्तृप्यताम्, ओं नारदस्तृप्यताम्।

ततो निवीती प्रजापति तीर्थेन आचारादुदङ्मुखः, केवल जलेन —ओं सनक स्तृप्यताम्, ओं सनन्द स्तृप्यताम्, ओं सनातन स्तृप्यतां, ओं कपिलस्तृप्यताम्, ओं आसुरि स्तृप्यताम्, ओं वोढु स्तृप्यताम्, ओं पंचशिष स्तृप्यताम्। ततःप्राचीनावीती सव्यञ्जान्वा दक्षिणाभिमुखः दक्षिणाग्रेषुकुशेपु प्रत्येकं सतिलाञ्जलित्रयेण पितृतीर्थेनतर्पयेत्, ओं कव्यवान स्तृप्यता मिदन्तिलोदकन्तस्मै स्वधानम्ः। ओं नल स्तृप्यता मिदन्तिलोदकंतस्मै स्वधानम्ः। ओं सोम स्तृप्यता मिदन्तिलोदकंतस्मै स्वधानमः। ओं यम स्तृप्यता मिदन्तिलोदकंतस्मै स्वधानमः। ओं अर्यमा तृप्यता मिदन्तिलोदकं तस्मै स्वधानमः।

ओं अग्निष्वात्ता स्तृप्यता मिदन्तिलोदकंतेभ्यः स्वधानमः। ओं सौम्या स्तृप्यत्तामिदंतिलोदकं तेभ्यः स्वधानमः। ओं हविष्मन्त स्तृप्यन्तामिदं तिलोदकं तेभ्यः स्वधानमः। ओं उष्मपास्तृप्यन्ता मिदं तिलोदकं तेभ्यः स्वधानमः। ओं वर्हिषद स्तृप्यता मिदं तिलोदकं तेभ्यः स्वधानमः। ओं आज्यपास्तृप्यन्ता मिदं तिलोदकं तेभ्यः स्वधानमः।

ओं यमायनमः ओं धर्मराजायनमः, ओं मृत्यवेनमः, ओं अन्तकायनमः, ओं वैवस्वतायनमः, ओं कात्यायनायनमः, ओं सर्वभूतक्षयायनमः, ओं औदुम्वरायनमः, ओं दध्नायनमः, ओं नीलायनमः, ओं परमेष्ठिनेनमः, ओं वृकोदरायनमः ओं चित्रायनमः, ओं चित्रगुप्तायनमः। "ओं ऊशन्तस्त्वा निधीमह्यु-सन्त स्समधीमहि। ऊशन्त शत आवह पितॄन् हविष्ये अत्तवे"।

"ओं आयन्तुनः पितरो सोम्यासोग्निष्वात्तापर्थिभिर्देवयानैः। अस्मिन्यज्ञे स्वधया मदन्तोधि बुवन्तुतेव न्त्वस्मान्। ओं आगच्छन्तु मे पितर इमं गृह्ण न्त्वपोञ्जलिम्"। इति पितृ्नावाह्य। "ओं उदीरता ममर उत्परास उन्मध्यमाः पितरः सोम्यासः। असुं य इयू रवृका ऋतज्ञा स्तेनोवन्तु पितरो हवेषु"। ओं अद्यामुकगोत्रो ऽस्मत्पिता ऽमुक शर्मा तृप्यतामिदंन्तिलोदकं तस्मै स्वधानमः। इति प्रथमं। "ओं अङ्गिरसोनः पितरो नवग्वा अथर्वाणो भृगवस्सोम्यासः। तेषांवयं सुमतौ यज्ञियाना मपिभद्रे सौमनसेस्याम"। इति मन्त्रेण वाक्ये। नच द्वितीय मञ्जलिम्। "ओं आयन्तुनः पितरस्सोम्यासोग्निष्वात्ताः पथिभिर्द्देवयानैः अस्मिन्यज्ञे स्वधया मदन्तोधि ब्रुवन्तुतेवन्त्वस्मान्"। इति मन्त्रेण वाक्येन च तृतीय मञ्जलिं पित्रे दद्यात्। तत— "ऊर्जम्वहन्ती रमृतंघृतं पयष्कीलालं परिश्रुतम्। स्वधास्थ तपर्यतमे पितृन्"। ओं अद्यामुकगोत्रो ऽस्मत्पितामुक शर्मा तृप्यता मिदंतिलोदकं तस्मै-स्वधानमः। इति प्रथमं। ओं पितृभ्यः स्वधानमः, पितामहेभ्यः। स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः। "अक्षन् पितरोमीमदन्तपितरोतीर्दषन्त पितरः पितरः शुन्धध्वम्"। इति मन्त्रेण वाक्येन च द्वितीय मञ्जलिम्। "ओं येचेह पितरो ये च नेहयांश्च विस्वयाम्। ओं चलप्रविद्यत्ववंण्येमपिते जातवेदस्स्वधाभिर्यज्ञं स्वकृत्प्रेषस्व"। इति मन्त्रेण वाक्येन च तृतीय मञ्जलिं पितामहाय दद्यात्। "ओं मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः माध्वीर्णः सन्तोषधीः"। ओं अद्यामुक गोत्रो ऽस्मात्पितामहोऽमुक शर्मा तृप्यता मिदन्तिलोदकं तस्मै स्वधा इति प्रथमं। "ओं मधुनक्त मुतोषसो मधुमत्पार्थिवं रजः।

मधुद्यौरस्तुनः पिता"। इति मन्त्रेण वाक्येन च द्वितीय मञ्जलिं। "मधुवान्नो वनस्पतिर्मधुमां अस्तु सूर्यः माध्वीर्गावो भवन्तुनः"। इति वाक्येन च प्रपितामहाय तृतीय मंजलिंदद्यात्। तत—ओं तृप्यध्वं तृप्यध्वं तृप्यध्वं इति मिलितम्पित्रादिक मुद्दिश्याञ्जलि त्रयन्दद्यात्।

"ओं नमोवः पितरो रसाय नमोवः पितरः शोषाय नमोवः पितरो जीवाय नमोवः पितरः स्वधायै नमोवः पितरो घोराय नमोवः पितरो मन्यवे,

नमोवः पितरः पितरो नमो वो गृहान्नः पितरो दत्तसतो वः पितरो द्वेष्म'' इति मन्त्रं पठित्वा। ओं अद्यामुकगोत्रो ऽस्मन्मातामहो ऽमुकशर्मातृप्यता मिदन्तिलोदकं तस्मै स्वधानमः। इति मातामहायाञ्जलित्रयन्दद्यात्। तत्र वाक्यं प्रत्यञ्जलिमित्यन्ये। एवमेव प्रमातामहो बृद्धप्रमातामहयोरपि। श्रीदत्ताह्निकादौ तु स्वधान्तमेवोच्चार्य वाक्यमिदं लिखितम्। तत ओं अद्यामुक गोत्राऽस्मन् माता ऽमुकीदेवी तृप्यता मिदन्तिलोदकं तस्यैस्वधा इति सकृन्मातरम्। एवमेव पितामही प्रपितामही मातामही प्रमातामही बृद्धप्रमातामही स्तर्पयेत्।

ततः प्रपियामहा दूद्ध् वंमपि यावतान्नाम ज्ञायते तावदेकैकांजलिना नाम गोत्रे उच्चार्यस्वधाकारै स्तर्यंयेत्। तत—आचार्यगुरु, मातृपक्ष सम्वन्धि वान्धव सुहृद स्तथैव तर्पयेत्। तपोपसव्येनैव—ओं ये चास्मत् उदकमिच्छन्ति तान्तर्पयामीदञ्जल न्तेभ्यस्स्वधा —इत्यवसानाञ्जलिन्दद्या दिति प्रदीपः।

ततः सव्येन, ''ओं देवा स्सुरा स्तथा नागा यक्षगन्धर्वराक्षसाः। पिचाश गुह्यका स्सिद्धा कूष्माण्डा स्तरवः खगाः। जले चरा भूतनिलया स्वधाकाराश्च जन्तवाः। प्रीतिमेते प्रयान्त्याशु मद्दत्ते नाम्वुना खिलाः। नरकेषु समस्तेषु याचनासुच येस्थिताः। तेषा माप्यायनो यैत द्दीयते सलिलम्मया। ये वान्धवा ऽवान्धवा वा ये ऽन्यजन्मनि वान्धवाः। ते तृप्तिमखिला यान्तु ये वा स्मत्तोभिवाञ्छति''। इदञ्च, काम्यतर्पणमेभिरेव श्लोकै र्द्विवविधिनाकर्त्तव्यम्। ततः कृतापसव्यः शुक्लवासा मृत्त्रयेणाधरीयवस्त्रं प्रक्षाल्य भूमौ कुशत्रयोपरि पितृनामानुद्दिश्यसतिलं वस्त्र निष्पीड़नोदकं पितृतीर्थेन दक्षिणाभिमुखो येचास्काकमित्यादि मन्त्रेण दद्यात्। अत्र च येन कल्पेन स्नानंकृत न्तर्पणमपि तेनैवकार्यम्, स्नानाङ्गत्वात्। उपस्थानादेर्भिवेदनांन्तस्य च स्नानत्वात्। विजातीय प्रयोगस्य व्यवधायकत्वादिति।

अथ—तर्पणोत्तर कर्म।

''आचम्य प्रयतोदद्यात्सूर्याय सलिलाञ्जलिम्। नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे। जगतसवित्रेशुचये सवित्रे कर्मदायिने''। इतिमन्त्रेण।

अथ—पुष्पै र्ब्रह्मादीन् पूजयेत, तत्रायंक्रमः। "ओं ब्रह्म यज्ञानं प्रथमं पुरस्ता द्विसीमत स्सुरुचोत्यवेन आवः। सवुध्न्याम्यासा अस्या विष्ठाः सतश्च योनि रसतश्च रिव। ओं ब्रह्मणेनमः। "ओं इदंविष्णुर्विक्रमे त्रेधानिदधे-पदम्। समूढ़ मस्य पां सुरे" ओं विष्णवेनमः। "ओं नमस्तेरुद्रमन्यव उतोत इषवेनमः। वाहुभ्यां मुततेनमः। ओं रुद्रायनमः। ओं आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्यं ञ्च। हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्"। ओं सवित्रेनमः। "ओं मित्रस्य चर्षिणी धृतो वो देवस्य मानसि"। द्विम्नाञ्चित्रश्रवस्तमम्" ओं मित्रायनमः। ओं इमम्मे वरुण श्रुधी ह मघाद्य च मृड़य।

त्वामवस्य वाचके"। ओं वरुणायनः। इति ब्रह्मादीनुद्दिश्य प्रतिदैवतं पुष्पं जले क्षिपेत्। तत उत्थाय, ओं "अदृश्य मस्य केतवोग्विस्मयो जलास्य-अनुभाजन्तो अग्नयोऽथा। ओं हंसः शुचिषद्वसुरन्तरिक्षं सद्धोता वेदिषद-तिथिर्द्दरो न सत्। दृषद्वर सदृत सन्ध्यो मम दज्ञानो जातजा अदृजातवृहत्"। इत्याभ्यां सूर्य मुपस्थाय प्रदक्षिणी कृत्यादित्याय नम इति नमस्कृत्य, ओं दि-ग्भ्योनमः।

ओं देवताभ्योनमः। ओं ब्रह्मणेनमः। ओं अग्नयेमः। ओं पृथिव्यैनमः। ओं औषधी भ्योनमः। ओं वाचेनमः। ओं वाचस्पतयेनमः। ओं विष्णवेनमः। ओं महद्भ्योनमः। ओं अद्भ्योनमः ओं अपां पतयेनमः। ओं वरुणायनमः। इति नमस्कृत्य, "ओं संवर्चसा पयसा मन्त नृहि वसान्महिमनसा सागवं शिवेन त्वष्टा मुदत्रो विदधातु वायोनुमा चेत्वन्नो यद्विशिष्टमिति" जपन्, करद्वयेन मुखं संस्पृश्य। "ओं देवागातु दिदोगातु वित्वागातु मित। मनस्पत इमन्देव यग्यं स्वाहा वातेधाः"। इति पूजितदेवता विसर्जयेत्। देवाजातु अङ्गि, सर्वादौ सूर्यस्य, सर्वशेषे विष्णोः। तस्यैव ब्राह्मणेष्टदेवतात्वात्। शिवादें स्तु मध्ये। अत्र शिवपूजा सर्वदोदङ्मुखेन, पूजान्तर न्तु प्रातः पूर्वाभिमुखेन, तत उदङ्मुखेन। सायं पश्चिमाभिमुखेन। रात्रौ तु सर्वदेवपूजा उदङ्मुखेनैव, पञ्चदेवतापूजाया न्तु प्रथमोग्निस्सूर्यपूजा तु नास्त्येव। पूजातु, काम्या ष-ड्विधा, तत्राद्या - पञ्चोपचारा। साच गन्धादितो नैवेद्यान्ता, अत्रचइदमनु-

लेपनं ओं विष्णवेनमः इति, त्रिः पुष्पाणि। एष धूपः एष दीपः ओं विष्णवेनमः। इदं नैवेद्यं ओं विष्णवेनमः। नैवेद्य न्तु अप्रोक्षितं सर्वथा न देयम्। अपिवादशोपचारात्, तद्यथा—अर्धःपाद्यं आचमनीयम् मधुपर्कञ्च पुनः आचमनीयं गन्धादि पञ्चक ञ्च। अत्र—पाद्यं प्रथममित्यन्ये।

षोड़शोपचारः।

"आसनं स्वागत ञ्चार्धं, पाद्यमाचमनीयकम्।

मधुपर्काचमनस्नान, वसनाभरणानि च।

गन्धपुष्पौ धूपदीपौ नैवेद्यञ्चन्दनन्तथा"।

अष्टादशोपचारः। आसनम्, आवाहनम्, अर्धः, पाद्यम्, आचमनम्, स्नानम्, वस्त्रम्, यज्ञोपवीतम्, भूषणम्, गन्धम्, पुष्पम्, धूपः, दीपः, तर्पणम्, माल्यम्, अनुलेपनम्, संस्कारः विसर्जनम्।

अपरा षट्त्रिशोपचारा।

आसनम्, अभ्युङ्गः, उद्वर्त्तनं, निरूक्षणं, सम्मार्जनंस्नपनम्, आवाहनं, पाद्यं अर्घ्यम्, आचमनीयम्, स्नानीयम्, मधुपर्कः, पुनराचमनीयं वस्त्रं यज्ञोषवीतम्, अलङ्कारः, गन्धं, पुष्पम्, धूपः, दीपः, ताम्वल, नैवेद्यम्, पुष्पम् माल्यम् अनुलेपनम्, शय्या, चामनं, व्यजनम्, आदर्शदर्शनम्, नमस्कारः, नर्तनं, गीतं, वाद्यं दानं, स्तुतिः, होमः, प्रदक्षिणम्, दन्तकाष्ठम्, देवविसर्जनम्, पूजा च सर्वदा दक्षिण हस्तेन देवतीर्थेन।

अ जनि पूजने यद्याचारोपि न सप्रमाणमिति व्युत्क्रमाचार चिन्तामणौ। पूजाया ञ्चतुर्णां वर्णाना मधिकार श्च देवार्चने कर्त्तव्ये सर्वत्र भूतशुद्धिरङ्ग मित्यागमिकाः। साचैवं सोहमिति मन्त्रेणजीवात्मानं नाभितो हृदिस्थे परमात्मनि संयोज्य ततः पृथिवीं जले जलं तेजसि ततस्तेजो वायौ ततो वायु राकशे प्रवेश्य यमिति वायु वीजेन षोड़शवार जप्तेन देहं सशोध्यत्वमिति वह्नि वीजेन चतुःषष्ठिवार जप्तेन देहन्दाहयित्वा रमीति चन्द्रवीजेनद्वात्रिंशद्वार जप्तेन चन्द्रमण्डलादमृतं स्रान्वयिता तेन तद्भस्मान्यादाय पुन र्नवी भूतं देहं चिन्तयित्वा भूतानि व्योमादिभ्यो वहिःकृत्वा हं स इति मन्त्रेण परमात्मतोजीवं नाभिपद्मे न्यसे दिति।

स्मार्त्ता स्तु।

अदीक्षितोपि शुचिः शुचिनी चासन उपविष्टःशुचिवस्त्रद्वयधरो मौनी ध्यानपरायणः काम राग भय क्रोध मात्सर्य द्वन्द्वरहितस्तन्मनाः शुचौ सुलिप्ते ऽनिष्ट गन्ध

शब्द रहिते देशे दक्षिणपार्श्वे पुष्पम्, वामपार्श्वे जलम्, अन्यच्च पूजोपकरणंयथा सन्निवेशमासाद्य जल पूर्णपात्रमग्रतोधृत्वा, यथालाभं वस्त्रालङ्कार यज्ञोपवीतादीनि धृत्वा अर्घपात्रस्थजले नात्मान न्द्रव्याणि च प्रोक्ष्य गन्धादिनात्मान मभ्यर्च्य सम्वोधनान्तेन देवतानाम्ना आगच्छेति देवतामावाह्य स्थापयित्वा पाद्यार्घाचमनीयादि दत्वा स्नपयित्वा पूजयित्वा च यथालाभं वस्त्र यज्ञोपवीतालङ्कार गन्ध पुष्प धूप दीप नैवेद्यानि दत्वा प्रदक्षिणीकृत्य प्रणम्य स्तुत्वा भगवन् भगवति क्षमस्वेति विसर्जयेत् ।

देवतापूजा प्रतिमायां प्रशस्ता साच प्रतिष्ठिता प्रतिष्ठिती पूजयेदिति विधिश्रुतेः । ऊद्ध्वंदृष्टि स्तिर्यग्दृष्टिः व्यङ्गमानोन्मानहीना च प्रतिमा निषिद्धा, सजटागृहे निषिद्धा, सप्तङ्गुलाद्द्वादशाङ्गुलपर्यन्तं गृहे प्रतिमा धार्या, चतुर्भुजा देवीगृहे उद्ध्वंस्थितापि धार्या ।

अष्टभुजा तु तादृशीगृहे निषिद्धा । सजटागृहे निषिद्धा, पाषाणजागृहे न पूज्या । विष्णु शिवयोः पूजाकाले द्वयोरभेद श्चिन्त्यः । तथा श्रीगौर्योरपि । अष्टाङ्गुलादारम्य षड्विंशदङ्गुलपर्यन्त मर्घपात्रङ्कार्यम् । दिवा प्रतिमासु सर्वदेवतापूजा रात्रावग्नौ, प्रातः प्राङ्मुखः, सायं पश्चिमाभिमुखः । रात्रावुदङ्मुखोदेवता पूजयेत् । देवता च स्व स्वानस्था पूज्या । वराहपुराणे । 'अभावे वेदमन्त्राणां पंचरात्रो दितोविधिः' । पंचरात्रं वशिष्ठादि पंचरात्रि संहिता ब्रह्मयामलविष्णुयामल स्वरूपा वेदमन्त्रानधिकारिणा, अनेन वशिष्ट पंचरात्रादिना देवतापूज्या । विस्वामित्र पंचरात्र न्तु रामागमः तेन राजसी त्रैलोक्य सुन्दरी प्रभृतिस्तामसी काली प्रभृतिः । स्वल्प प्रयोजनार्थिभिः पूज्या । 'कौलोजन विधानेन पूजयेत्सुरसुन्दरी मिति' रुद्रयामलवचनात् । यमः 'देवता पुष्पदानेन जायते श्री समन्विता । ऊद्ध्वंङ्गति मवाप्नोति यश्चधूप प्रदोनरः । लोके प्रकाशोभवति चक्षुषा चैव दीपदः' । विष्णुधर्मे । 'फलन्दत्वा तु देवेभ्यः सफलां विन्दते श्रियम् । गीत वाद्य प्रदानेन सौख्यं प्राप्नोत्यनेत्तमम् । प्रेक्षणीय प्रदानेन रूपवानभि जायते' । प्रेक्षणीयं—नृत्यादिः दानं—तत्समीपेः करणमात्रम् । 'तथा वस्त्र प्रदानेन लोकेस्मिन्, स्ववेशस्वभिजायते' । कुङ्कुम विल्व, तण्डुल, पुष्प, दधि, दुर्वा कुशः श्य तिलै सहितेन जलेन देवतानां सामान्योर्घः पादद्रव्याणि जातीफल लवङ्ग कङ्कोलफलानि आचमनीयं पुनराचमनीय

ञ्च अथ पञ्चोपचाराः। सामान्यतः चन्दनागुरुकर्पूर कुङ्कुमानि अनुलेपने-पुष्पाणि अरण्य पर्वत स्वारामसंभवानि तान्यपि विकशितानि केश कांश रहितानि अपर्युषितानि अच्छिद्राणि सुरभीनि प्रोक्षितानि विहितानि पत्राणि च। याचितं क्रयक्रीतं च पुष्पं निष्फलम्। अभिवादनकाले अभिवाद्यभिवादकान्यतर करस्थंनिषिद्धम्।

अत्र-भागत्यागात्प्रोक्षणा च्च तदपि कर्मण्यं देवोपरिधृतं मस्तकोपरि-धृतम्, अन्तर्जलक्षालित्अधोवस्त्रधृतञ्ल पुष्पं हरिभक्ति नाम्नि निबन्धे निषिद्धतथा लिखितम्। नित्यपूजा न्तु परवाटिका पुष्पं तददत्तमपि न निषिद्धम्।

तुलस्यां पर्युषितता दोषो नास्ति। "सर्वं पर्युषितं त्याज्यं, पत्रं पुष्पं फलं-जलम्। अत्याज्यं जाह्नवीतोय मत्याज्यं तुलसीदलम्"। इति गङ्गामाहात्म्य-लिखनात्। विल्वपत्र जलत्रयोरपि न पर्युषितत्व दोष इति प्रवादः, पर्युषितेष्वपि मालाकार गृहेस्थितेषु न दोष इति शैवागमः। अथ सूर्यपूजा। तत्फलन्तु।

मेरुमन्दारतुल्य पापराशिक्षयः षण्मासार्चने पुरुषोत्तमत्वमू, एकार्चने-वेद-पारग ब्राह्मणसम्प्रदानक दोग्ध्रिगवां लक्ष्यदानजन्य फलम्। अस्यार्घः क्षीर कुशपत्रत्रय घृत दधि मधु रक्तकरवीरत्रय रक्तचन्दनसहिता आपः अनुलेपनं चन्दनम् अगुरुकर्पूरं कुङ्कुमं उशीरं पद्मकाष्ठं कृष्णागुरु रक्तचन्दनंसिन्दूर-कञ्च।

अथ पुष्पाणि।

अर्क जवापुष्प करवीर विल्वपत्र पद्मवक कुशपुष्प शमीपुष्प नीलोत्पल रक्तकरवीर कुसुम्भ जाती वकूल पाटला श्वेतमन्दार सितपद्म नागेसर चम्पक पुन्नाग, विचकिल, मल्लिका मालती दूर्वाकाश माधवी जवाकुशुम, तगर कर्णिकार, कुरुन्टक कुन्द वाण वर्वर मल्लिका अशोक तिलक लोध्र आटरुषक शतपत्र अगस्त्य किंशुक शमीपत्र भृङ्गराजपत्र तमालपत्र श्यामतुलसीपत्र केतकीपुष्प केतकीपत्राणि अन्यान्यपि गन्धवर्ण युतानि देयानि।

सौवणपद्मेन सूर्यपूजने चतुर्द्दशेन्द्र पर्यन्तेन्द्रासना वस्थितिः फलम्। अथ-धूपः। तत्र—सघृतगुग्गुलु कुन्दरु कृष्णागुरु सघृत महिकाख्य गुग्गुल श्रीवास

सघृत विल्व देवदारु सौगन्धिक तुरुष्कागुरु नमेरु कस्तूरी कर्पूरयुक्तागुरु कुन्दरुः शन्तकीरसः श्रीवासः सरलद्रवः सौगन्धिकः सुद्धेन इति प्रसिद्धः। तुरुष्कः—सित्तकः। नमेरुः—छायाप्रधानो वृक्षविशेषः। अथ दीपः। सघृता स्तदभावे सतैलाः, दीपाधिकारे भविष्य पुराणे।

'तांञ्च दत्वा न हिंसेत नच तैल विवर्जितान्।
कुर्वीत दीपहस्ताच, मूखकोद्धार जायते'।

अथ नैवेद्यानि। तत्र—संयाव कृशरापूप पायस गुड़संयुत मोदक रसाला शालि तण्डुलौदनप्रस्तषष्ठिकौदन यव गोधूम तिल मुद्ग माष मांस पक्वफल पानकादीनि सिद्धान्न न्तु वैस्वदेवानन्तरपूजापक्षे देयम्। पाकादग्र मुद्धृत्य जुहुयादितिवाक्येन पाकाग्रस्य वैस्वदेवहोमे विनियोगात्। दण्डप्रणामे क्रतुशत फलम्। रवेः स्नपनलंघने रौरवपातः तस्य वर्त्मादौ प्रक्षेपणे तामिस्रपातः।

अथ दुर्गापूजा।

दुर्गापूजायाः अग्निहोत्रपर वेद वेदाङ्ग पारगब्राह्मणसम्प्रदानक शतसुवर्ण दानजन्यफलम्। दुर्गाशतपत्र यव दधि तण्डुल महाश्वेत सषप दूर्वा कुङ्कुम रोचना मधुसहिता आपः एष द्वादशाङ्गोर्घः महाभट पोव इति प्रसिद्धः। गन्धा श्चन्दनागुरु कर्पूरकुङ्कुमानि। पुष्पाणि। अवन्तिका जाती कुञ्जक सितवक्र नीलपाण्डर पद्म किंशुक तगर किङ्किरात चम्पक वकुल मन्दार कुन्द तिवीटक करवीर अर्क सिंशपा अपराजिता पुष्पाणि सित पीत रक्त कृष्ण चतुर्विधा अपराजिता धुस्थरक अतिमुक्तक वन्धूक अगस्त्य दमन निन्दूरवार सुरभी मरुवक दूर्वा कुश मञ्जरी विल्वपत्राणि अनुक्तान्यपि जलजानि स्थलजानि गन्धवर्त्ययुतानि धान्यपत्राणि सर्वाणि तिरोटकोलोध्रः सुरभीशल्लकी केतकी अतिमुक्तक चन्धूक वकूलकर्णिका कदम्व सिन्दुवार पुन्नाग चम्पक यूथिका मल्लिका तगर अर्जुन मल्लिका वृहती शतपत्रिका सुरमा वर्वरी भद्रा सुरभीरण सुरमा—तुलसी विशेषः। एतानि केचक्यादीनि मरुवकान्तानि पुष्पान्तर दानजन्य पुण्य शतगुण पुण्यजनकानि।

मल्लिका उत्पल पद्मशमी पुन्नाग चम्पक अशोक कर्णिका द्रोणपुष्प करवीर कुङ्कुम नागकेशराणि एतानि च दत्वा ऽखिलकामना मवाप्य च त्रिकानुचरो भवति।

अथ धूपाः ।

'सर्वेषामेव धूपानां दुर्गाया गुग्गुलप्रियः ।
घृतयुक्तो विशेषेण सततं प्रीतिवर्द्धनः' ।
अगुरुं धूपमावेद्य राजपेय फलं लभेत् ।
सित्यगुरु नरो दत्वा गोसहस्र फलं लभेत्' ।

सित्यगुरुः—कृष्णगुरुः ।

'महिकाष्यं घृताक्त न्तु दत्वा विल्व मथापि वा ।
वाजपेय फलंप्राप्य सूर्यलोके महीयते ।
सकृष्णागुरु धूपेन प्रीणिता सर्व मङ्गला ।
शोखयेत्पाप कलिलं तुषाग्निरिवकाञ्चनम्' ।
'कृष्णागुरुं सकर्पूरं चन्दनं सिक्तकन्तथा ।
भगवत्यै नरो धूप मिमन्दत्वा नराधिप ।
इहकामा नवाप्यग्रान् दुर्गालोके महीयते ।
गुग्गुलुं सघृतन्दत्वा दुर्गायै भरतर्षभ ।
मासार्द्धं विधिवद्भक्त्या गोसहस्र फलं लभेत्' ।

अयमर्थः—गुग्गुलुधूपो दुर्गा प्रीत्यै सघृत गुग्गुलुधूपो ऽतिप्रीत्यै अगरुधूपो वाजपेयफलप्रदः । कृष्णागुरुधूपो गोसहस्रफलप्रदः । पापकलिल ध्वंसको वा । कर्पूरधूप ऐहिक वहुकामावाप्तिपूर्वक दुर्गालोक महितत्वप्रदः । दुर्गाप्रणामः सर्वयज्ञोपवास सर्वतीर्थंजन्यफल समफलः ।

अथ शिव पूजा ।

तत्र—लिङ्गे शिवार्चनस्य शिवसायुज्यंफलं निर्वाण म्वा । स्व वर्णधर्मत्यागिन स्तु नात्राधिकारः । ब्राह्मणस्य तादृशस्याप्यधिकारः शिवार्चन न्तु सदोदङ्मुखेनैव कार्यम् । पर्थिवलिङ्गं शुभवेदिकं निर्माय सकृत्पूजयेत् ऐहिक धनवत्व श्रीमत्वान्तकालिक रुद्रत्वभवनं फलम् । सौवर्ण रत्नघटितंवा शिवलिङ्गं सकृत्पूजयेत् शिवलोकमहितत्वं फलम् । मृदा भस्मना गोमयेन वा कृत्वा ताम्रेण कांस्येन वा कृतं शिवलिङ्गं सकृत्पूजयतो दिवि कल्पायुतवासः ।

काष्ठलिङ्गपूजा—वित्तप्रदा स्फाटिकलिङ्गपूजा—सर्वकामप्रदा नार्मद शिवलिङ्गपूजा - वाञ्छित फलप्रदा लिङ्गमतिकर्कशमतिक्षुद्रमतिस्थूलं चिपटा-

कारं पिण्डिकाहीनं पिण्डिका विषमवर्णं भग्नपिण्डिकं मानोन्मान पिण्डहीन ञ्च निषिद्धम्। पक्वजम्वु फलाकारस्त्वतिप्रशस्तम् ।

अथोपचाराः।

तत गन्ध चन्दनोगुरुणा कुङ्कुमेन कर्पूरेण शिवानुलेपने कल्पकोटि दिवि-वासः फलम् । अथ—पुष्पाणि पत्राणि चारण्यसम्भवानि स्ववाटिकासम्भ-वानि वा शस्तानि । अन्यवाटिका भवानि तु विहितजातीयान्यपि निषि-द्धानि ।

पुष्पाणामलाभे तद्वृक्षपत्रै स्तदलाभे तत्फलै स्तदलाभे शुद्धतृणैः ओषधी र्वा तदलाभे भक्त्या अर्कपुष्पं दशसुवर्णदान फलम्। करवीरं एतत्स्नेह सहस्रगुणम् विल्वपत्रं एतत्स्नेह सहस्रगुणम्। द्रोणपुष्पम् एतत्स्नेह सहस्रगुणम्। अपामार्गमेतत्स्नेह सहस्रगुणम् कुशपुष्प मेतत्स्नेह सहस्रगुणम्। शमीपत्रमेत-त्स्नेह सहस्रगुणम्। नीलोत्पलमेतत्स्नेह सहस्रगुणम् वकपुष्पमेतत्स्नेह सहस्र-गुणम् धुत्थुर मेतत्स्नेह सहस्रगुणम्।

शमीपुष्प मेतत्सहस्रगुणम् जातीवकुल-पाटलाः करवीरसमाः, श्वेतमन्दार पुष्प सितपद्मञ्ल करवीर समञ्। नागकेसर चम्पकपुन्नागाः करवीरसमाः, कुन्दन्तु वर्षंण्यापि शिवपूजायां व्रतरुपायां माघमासे विहितम्। अन्यथातु माघेपि निषिद्धम्। धुत्थुरकं कदम्व ञ्ल दिवा अवंचितम्, रात्रावपि शङ्कं वेदनार्हम्। अन्यानि दिवाञ्चितानि दिवैव दानार्हाणि। मल्लिका दिवावंचिताऽहोरात्रं पूजार्हा। अवंचयोत्तरं जाती प्रहर मात्रं कर्मार्हा। करवीरन्त्वहर्निशं। पुष्पा-लाभे पत्रै स्तदलाभे ओषधीभिः। तदलाभे भक्त्या शिवः पूज्यः।

यस्य पुष्पस्य यत्फल न्तस्मिन् ग्रथिते तद्द्विगुणं फलम्। अखण्ड विल्वपत्रैः शिवलिङ्ग,-पूजने सर्वपापविनिर्मुक्ति शिवलोकमहितत्व फलम्। वृहती विष्णोःकृत शिवार्चने गवायुत-दानफल प्राप्तिपूर्वक शिवलोक व्रजनं फलम्। अखण्ड विल्वपत्रत्रयेण शिवलिङ्गार्चने गोलक्ष-दानफलम्। अशोक मन्दार करवीर अर्क शमी-तगर केसर एतेषा मन्यतमेन शिवार्चने-सूर्यकोटि प्रतीकाश सार्वकालिक दोधूयमानचामर वहुविमानकरणक शिवलोक महीयमानत्वं फलम्।

करवीर वक अर्क धुत्थर पाटला वृहतीगिरि कर्णिका काशपुष्पा मन्दार अपराजिता शमीपुष्प कुब्जक शिखिनी अपामार्ग पद्म जातीपुष्प-चम्पक उशीर तगर नागकेसर पुन्नाग किङ्किरात्-द्रोण शिंशपा उदुम्वर जयमन्ती किंशुक विल्व-कुसुम्भ कुङ्कुम नीलोत्पल रक्तोत्पल स्थलजं जलजञ्च सर्वे, केसरं वकुलं गिरिकर्णिका कुब्जं-शिखिनी, रोकनं मोकनं उशीरं वीरणपुष्पम् किङ्करातं कुरुन्टकं जयाजयन्ती किंशुक: पलाश:—एतानि सर्वाण्यपि प्रशस्तानि, सर्वाणीति-निषिद्धोन्तर विषयम्। सर्वपूजायां व्रतरुपायां वैशाखे-पाटलया, ज्येष्ठे पद्मेन आषाढ़े विल्वकल्हार:।

श्रावणे नवमालिकया भाद्रे कदम्वै:। चम्पकै:, आश्विने पङ्कजेन मालत्या शतपत्रिकयाकार्तिके नीलोत्पलै: पौषे कुङ्कुमै: माघे कुन्दै:। फाल्गुने मरुवकै: चैत्रे शतपत्रै: शिवं पूज्येत्। सर्व यज्ञ दान फर्ललभेत्।

अथधूपा:।

घृत संयुक्त गुग्गुलु धूप: रुद्रलोकं गाणदत्यञ्चददाति कपित्थं विल्वस्वा घृतसंयुक्तेधूपे दत्वा अग्निष्टोमफलं लभेत्। अथदीपा:। शिवाय घृत-दीपदानेन सूर्यंकोटिसमप्रभ शतयोजन दिव्य विमानं प्राप्नोति।

अथ नैवेद्यम्।

गुड़खण्ड घृतानां भक्ष्याणां घृतपाचितानांनिवेदने शतगुणं फलमुपक्रमात्। तण्डुलादिदानेप्येतत्फलम्। सर्वदानेषु सर्वयज्ञेषु उपवासेषु यत्फलं-शिवेस्तुतौ उपहारे जप्ये च तत्फम्। नमस्कारस्याऽश्वमेध फलम्। दण्डप्रणामस्य ऋतु शत-जन्य गत्यधिकागति:। जानुभ्यां पाणिभ्यां शिरसा च प्रणामे सर्वकामावाप्ति:। तीर्थकोटि शतै फलावाप्ति र्वा फलम्। शिवायतनप्रदक्षिणे अश्वमेध सहस्रफलम्।

अथ विष्णूपूजा।

साच कामनया चेत्तदा तत्तत्काम्य प्रदा। मोक्षप्रदा च पूजाधार स्तु चक्रा-दिकं। पूजामन्त्र स्तु वेदज्ञस्य, पुरुषसुक्तम्, वेदानभिज्ञस्याष्टाक्षरमन्त्र:। अन्या च पञ्चरात्रपूजा वेदान्तविरुद्धा। अथ पूजा—तत्रासनं अर्घ्यं, पाद्यमाचमनीय म्वा सर्वपापै: प्रमुच्यते, तोयेन संस्थाप्य सर्वपापै: प्रमुक्तो विष्णुलोके महीयते।

अथ पञ्चोपचाराः।

तत्र—गन्धः कुङ्कुमेणागुरुणा श्रीखण्डेन वा विष्णुरनुलेपने कल्पकोटि दिवि वासः फलम्। चन्दनेन अगुरुणा कर्पूरेण कुङ्कुमेन उशीरेणपद्मकेन वा अनुलिप्तोहरिः सर्वान् भोगान् ददाति कालेयकं तुरुष्कं रक्तचन्दनञ्च अनुलेपनं पापक्षय हेतुः।

अथ पुष्पाणि—

तपश्शील गुणोपेत वेदपारगब्राह्मणसम्प्रदानक दश सुवर्णदानजं फलं द्रोणपुष्पे, एवं द्रोणपुष्यात्खदिरपुष्पे वहुसहस्रगुणंफलम्। खदिरपुष्पाच्छमी-पुष्पे वहुसहस्रगुणं शमीपुष्प सहस्रेभ्यो विल्वपत्रे वहुसहस्रगुणं विल्वपत्र सहस्रेभ्यो वकपुष्पे वहुसहस्रगुणं नन्द्यावर्त सहस्रात्करवीरे सहस्रगुणं रक्तकरवी-राच्छत करवीरे सहस्रगुणं श्वेतकरवीरात्किशुकेसहस्रगुणं, किंशुकात्कुशपुष्पे सहस्रगुणं कुशपुष्पात्वनमालायां सहस्रगुणं, वनमालाया श्चम्पके सहस्रगुणं, चम्पकादशोके सहस्रगुणम्।

अशोकात्सेवन्ती सहस्रगुणा सेवन्तीतः—अब्जकं सहस्रगुणम्, अब्जका-न्मालती सहस्रगुणा। मालतीतो रक्तत्रिसन्ध्या सहस्रगुणा रक्तत्रिसन्ध्यातः श्वेतत्रिसन्ध्याः सहस्रगुण। श्वेतत्रिसन्ध्यातः कुन्दं सहस्रगुणम्, कुन्दात् शतपत्रं सहस्रगुणम्, शतपत्रान्मल्लिका सहस्रगुणा, मल्लिकातो जातीसहस्रगुणा, जाती-पुष्पा सहस्र कृतान्मालांविष्णवे दत्वा कोटिसहस्राणि कल्पकोटिशतानि श्रीमा न्विष्णुतुल्य पराक्रमो भूत्वा विष्णुपुरे वसेत्।

पूर्वोक्त पुष्पाणामपि यथा यथा फलोत्कर्षः तथा तथा विष्णुलोके महिमा-नोत्कर्षः। अथ पत्राणिअपामार्गस्य भृङ्गराजस्य खदिरस्य शम्याः दूर्वायाः कुशस्य, दमनकस्य, विल्वस्य, तुलस्याश्च पत्रमुत्तरोत्तरं श्रेष्ठम्। किन्तु सर्वपाप विनिर्मुक्ति विष्णुलोक महित्वं सर्वेषां साधारणम्। कुङ्कुमः अतिमुक्तक जया अशोक पुन्नाग नागकेसर-अपामार्गपुष्प नानावर्ण पद्म नानावर्णोत्पलानि शस्ता-नि। वनमाला नवमालिका मालती, पीतजाती, नागकेसरः अतिमुक्तक माधवी-लता पाटला कुरुन्ट मल्लिका, तुरुष्कं रक्तचन्दनञ्च अनुलेपनं पापक्षयहेतुः। एतानि पुष्पाणि प्रशस्तानि।

तमालपत्रं केतकीपत्रं आमलकीपत्रमपिप्रशस्तम् । कुरुन्टकः पीतवाणः प्रशस्तः प्रशस्तरसगन्धवर्णानि । अन्यान्यपि विहितानि । सौगन्धिक कर्णिकार यूथी तगर फरहद वकुलएतान्यपि प्रशस्तानि । केतकीवर्जें सर्वाणि सुरभीणि, नवदलानि वर्हिषि प्रशस्तानि । सुवर्णजाती धवलजाती, जम्बु, जवापुष्पं अपराजिता, कुष्माण्डपुष्पं, शींश पुष्पं वन्धूक पुष्पञ्च प्रशस्तम् ।

अथधूपाः ।

जटामसी गुग्गुलः देवदारु, सिन्दकसा गूरुकर्पूर, नखी जातीपत्र माज्य शर्कर महिषाव्य गुग्गुलीनि । जीवजातन्तु कस्तूरिकादिनिमिद्धम् ।

अथदीपाः ।

घृतप्रदीप स्तिलतैल दीप स्सर्वपाप विनिर्मुक्तिपूर्वक सहस्रादित्य सन्निभ स्वीय ज्योतिष्मद्विमानकरणक महीयमानत्वं फलमस्य ।

अथापराधः ।

तथा हि—क्षत्रिय सिद्धान्न भोजनम् । अनिषिद्धदिने । दन्तकाष्ठमकृत्वा विष्णो रुपसर्पणम् । मैथुनंकृत्वाऽ स्नात्वा विष्णोः स्पर्शनम्, शवन्दृष्ट्वा ऽस्नात्वाविष्णुकर्मकरणम्, रजस्वलां स्पृष्ट्वा ऽस्नात्वा विष्णुसन्निधा ववस्थानम् । विष्णुं स्पृशतः पायु वायु प्रयोगः । विष्णोः कर्म कुर्वतः पुरीषत्यागः । विष्णुशास्त्र मनादृत्य शास्त्रान्तर प्रशंसा । अतिमलिनंवासः परिधाय विष्णुकर्माचरणम् । अविधानेनोपस्पृश्य विष्णुस्पर्शनम् । विष्णोरपराधंकृत्वा विष्णो रुपसर्पणम् ।

क्रुद्धस्य विष्णुस्पर्शनम् । निषिद्धपुष्पेण विष्णोरर्चनम् । रक्तंवासः परिधाय विष्णोरुपसर्शनम् । अन्धकारे विनादीपेन विष्णोः स्पर्शनम् । कृष्णवस्त्रं परिधाय विष्णोः कर्माचरणम् । वायसोद्धृत वस्त्रं परिधाय विष्णोः कर्माचरणम् । विष्णवे कुक्कुरोच्छिष्ट दानम् । वराहमांसं भुक्त्वाविष्णोरुपसर्पणम् । जानपादं भक्त्वा विष्णोरुपसर्पणम् । दीपं स्पृष्ट्वा हस्त मप्राक्षाल्य विष्णोः कर्माचरणम् । स्मशानङ्कृत्वा ऽस्नात्वा विष्णोरुपसर्पणम् । पिण्याकंभुक्त्वा

विष्णोरुपसर्पणम्। विष्णवे वराहमांस निवेदनम्। मद्यं स्पृष्ट्वा पीत्वावा विष्णुगृह प्रवेशनम्। परकीयेनाशुचिना वस्त्रेण परिहितेन विष्णुकर्माचरणम्। विष्णवेनवान्न मप्रदाय तद्भोजनम्। गन्धपुष्पे ऽप्रदायधूपदानम्। उपानहावारुह्य विष्णुस्थान प्रवेशनमु। भेरीशब्देनविना विष्णोः प्रवोधनम्। अजीर्णे सति विष्णोरुपसर्पणम्।

अथ नैवेद्यानि।

वदर खर्जुर आमलकी प्राचीनामलकी, आम्र पनस पुन्नाग वीजपूर कुष्माण्ड तालकदल, कर्कटी पटोलद्वय मृड़ालमूल शाक चुञ्चूशाक तिन्तिनीशाक यवान्न माष कृष्णतिल कुलत्थ, महामुदगर कृशाणि यवकाणि गव्य दधि दुग्ध घृत हरिणमांस छागमांस शशमांस रुरुमांस मयूरमांस लावकमांसवर्त्तकमांस हारीतमांस टिट्टिभमांस कुरवमांस वनकपोतमांस वहिस्संस्नुता यव गोधूम शालि तिल दुग्ध माष व्रीहय स्सर्वे हरिप्रियाः तथा भक्ष्यन्तद्देयम्।

अथ निषिद्धानि।

तत्र छागी मेषी महिषीणां दुग्ध दधि घृतानि गोरप्यनिर्द्दशाया स्तथा विवत्साया स्तथान्यवत्साया स्तथा स्यन्दिनीय मसृसम्वन्धिनीनां तथा अमेध्य प्रभः।

अथ महायज्ञाः।

तत्र वैश्वदेव होमो देवयज्ञः पितृवलिव्यतिरिक्तावलयो भूतयज्ञाः। स्वाध्याये ब्रह्मयज्ञः। कव्यवाड़ादि तर्पणं पितृवलिः नित्यश्राद्धं ञ्च वितृयज्ञः। मनुष्यायान्नदानं मनुष्ययज्ञः। वैस्वदेव वलिषु च विभक्तस्य जीवत्पितृकस्याधिकारः। कव्यवाड़ादि तर्पणे तु अविभक्त जीवत्पितृकस्याधिकारः।

एवं ब्राह्मणाय भिक्षादानेपि ब्रह्मयज्ञे तु ब्राह्मणमात्रस्याधिकारः। नित्य श्राद्धे तु प्रमीतपितृकस्य अविभक्तानाम्मध्ये ज्येष्ठस्य विभक्तानां सर्वेषामधिकारः। देवभूत पितृ ब्रह्म मनुष्याणामनुक्रमात्, महासत्राणि जानीयात्। एवंहि महामखा इति कर्मप्रदीपः।

अत्राद्यो देवयज्ञः ततो भूतयज्ञः ततः पितृयज्ञः श्राद्धतपः ततोमनुष्ययज्ञ इति छन्दोगाह्निकम्। याज्ञवल्क्यः।

"देवेभ्य श्च हुतान्दत्वाच्छेषाद्भूत वलिं हरेत्" ।
शातातपः—"भूतयज्ञ स्तथा श्राद्ध न्नित्यञ्चातिथि पूजनम् ।

क्रमेणानेन कर्त्तव्यम्" । इतिछन्दोगाह्निकेव्यक्तमिदम् । वैस्वदेव होमे तथा ब्रह्मयज्ञे तथाहन्तकार दाने सुवर्ण रजत ञ्च कुशत्रय ञ्च दक्षिणानामिकया ञ्च धार्यम् । जलादौ च वैस्वदेव होमे कर्त्तव्ये पर्युक्षणन्नास्ति, अग्नि मुपसमाध्याय दक्षिणतो ब्रह्मासन मास्तीर्य प्रणीय परिस्तीयार्थवदासाद्य पवित्रे कृत्वा प्रोक्षणीयः । संस्कृतार्थवत्प्रोक्ष्य निरुप्याज्य मधिश्रित्य पर्यग्नि कुर्यादित्यादि कात्यायनः स्मार्त होमेभिधाय एक एवविधि र्यत्क्वचिद्धोम इति तेनैव प्रथम कन्डिकाशेषे ऽतिदिष्टम् ।

तेनाग्नौ होमे एतत्सर्वमायाति, प्रणयनपरिस्तरणादेवेत्यतिरिक्ते असम्भवात् । तथाचाग्नौ वैकृते होमे एषा सकलैव करणीप्राप्ता इति । तत्र सकल करणीयस्थानत्वेन पर्युक्षणं विशिष्य विधीयते, अघोर मधोरयतीतिवत् ।

अन्यथा—प्रकृतिवद्विकृतिरितिन्यायेन पर्युक्षणस्यापि विकृतौ प्राप्ततया तत्र विशिष्य पुनष्पर्युक्षणोपादान न्निरर्थकंस्यात् । तेनात्रजले वैस्वदेव होमे सकलाकरणी न प्राप्तास्ति । येन तत्सर्वस्थाने पर्युक्षणविधानं सार्थकं स्यात् । तस्मादग्नौ वैस्वदेवकरणे पर्युक्षणमस्ति, जले तत्करणे पर्युक्षण न्नास्त्येव, आधारतापक्षे भूसंस्कारादिकमपि नास्ति, किन्त्वाहुति मात्रमितिछन्दोगाह्निकमपि स्वाहाकारे होमो यद्यपि प्रकृतावप्यस्ति, तथापि विकृतावप्युपादानात् ब्रह्मणेस्वाहा इत्येव वैस्वदेवहोमे नतु ब्रह्मणेस्वाहा इदंब्रह्मण इत्याद्यपीति । काम्यवलो तु –देवा मनुष्या इति पञ्चश्लोक्याएक एव वलिर्देयः । अन्यथा—आवृत्तिलक्षणोवाक्यभेदः स्यात् । यत्तु पञ्चवल्यनन्तरमेवमनुष्यवलिदानमुक्तम्-तञ्जीवत्पितृकपरम् । केन तु नित्यश्राद्धानन्तररं देयम् ।

एवं मनुष्यस्य श्राद्धोत्तरत्वं यदुक्तं तच्छ्राद्धाधिकारिपरम् । यत्तु—"कृत्वैतद्वलिकर्मेव मतिर्थिपूर्वमाशयेत्" । इति मनुवचनम् । तद्विभक्त जीवत्पितृकपरमित्यवरोधः । छन्दोगाह्निक मप्येवम् ।

"अप्येक माशये द्विप्रम्, पितृयज्ञार्थसिद्धये।
अदैवन्नास्ति चेदन्यो भोक्ता भोज्य मथापिवा।
अप्युद्धृत्य यथाशक्ति किञ्चिदन्नं यथाविधि।
पितृभ्योथ मनुष्येभ्यो दद्यादहरहर्द्विज"।

इतिकात्यायनेनैव छन्दोगपरिशिष्टेभिधानान्नित्यश्राद्धप्रयोगः।

स्पष्ट एव श्राद्धपल्लवे नित्यश्राद्धं कृत्वा नित्यदेवपूजादि न कार्यम्, "श्राद्धान्तानि कर्माणीति" वचनात्। काम्य न्तु कार्यमेव इत्याचार चिन्तामणौव्यक्तम्। गो ग्रास स्तु नित्यः।

"उस्नौ रभेच्यं सर्वंहि ताः पवित्रा पुण्यराशयः।
प्रतिगृह्ण न्तु मे ग्रामं गावस्त्रैलोक्य मातरः।
दद्यादनेन मन्त्रेण गवां ग्रामं सदैवहीति"।

सदा श्रवणा दित्याहुः।

स्वानुरोधा द तेथ्यनुरोधा द्वा रात्रौ पाकपक्षे तदापि वलि वैस्वदेव कमणी किन्तु तदनुसंस्कारकमेव दिवातन न्तु पञ्चयज्ञान्तर्गतमिति तत्र फलश्रुन स्तु हन्तकारानन्तर न्तु यतिने ब्रह्मचारिणे चान्नार्थ मुपस्थिताय स्वस्तीति वाचयित्वा दक्षिणहस्ते जलदानम्, ततः तत्रैव निरामिष यथासम्भव व्यञ्जनसहित ग्रासमात्र भिक्षादानं पुनर्जल दानम्।

एवं हि माधुकरी भिक्षा इमां वहुभ्यो ब्रीहेभ्य आदाय नद्यादितीरे धृत्वा प्रक्षाल्य सूर्यं ब्रह्मविष्णु महेश्वरेभ्यो दत्वा यति रस्नीयात्। अनन्तरं गोग्रासः सच नित्यः, गवाह्निक न्तु काम्यम्, तच्च रुद्रगव्ये ब्राह्मणगव्ये वा उदकसंयुक्त गोदिवसाहाररुप तृणदानम्, अत्राद्ये कुलद्वयसहित स्वीय रुद्र भवनं फलम्।

अन्ते कपिलागवी श दानफलम्।

दानमन्त्र स्तु —"पञ्चभूते शिवेपुण्ये पवित्रे सूर्य सम्भव।
प्रतीच्छे सस्मयादत्तं सौरभेयि नमोस्तुते"।

अथातिथि पूजा। आसनं पादप्रक्षालनं स्वागत प्रश्नः यथाशक्ति भक्ष्यदानम् यथाशक्ति शयनीय दानम्। प्रातरनुव्रजनीयानि। अथभोजनम्। तत्र गृ-

हाद्वहिष्पादौ प्रक्षाल्य सविधिश्रोतवन्दनान्तं द्विराचम्य गृहं प्रविश्य आसने प्राङ्मुख उपविश्य वारिणा चतुरस्रं मण्डलंकृत्वा अनुपहतपात्रस्थ मस्विन्न तण्डुलस्य भक्तं सघृतं परिगृह्य ओं तेजोसीति मन्त्रेण प्रोक्ष्य ब्रह्मादिबलिं विष्णवे च भोज्यग्रभागमनिषिद्ध मुत्सृज्य वामहस्तघृतवहुकुशः दक्षिणानामिकाधृत सुवर्ण रजत कुशत्रय परितः—ओं अमृतोपस्तरण मसि स्वाहा इति अपोशान मादाय पंचाहुती घृताक्त केवल भक्तकृता आर्द्रामलक प्रमाणाः प्राणापान व्यानोदानसमानेभ्यः ओं प्राणायस्वाहेत्यादि क्रमेण जिह्वामूले जुहुयात्, तास्तु प्रत्येकं निगिरेत् ।

ततः कुश पवित्रादिकन्त्यक्त्वा तूष्णी मर्द्धोदरपूरकमन्नं आदौ घृतेन मध्येऽनिषिद्ध व्यञ्जनेन शेषे दुग्धेन सह मौनी भुंजीत, भोजन पात्रञ्च भूमिष्ठ मस्कुरित मकार्ष्णाय समार्द्र रजस्वला शूद्राद्यभक्तपूर्वम् ।

अथ निषिद्ध वेला ।

"नाजीर्णे नार्द्ध रात्रे न मध्याह्ने न सन्ध्ययोः ।

नार्द्रवासा नैकवासा न नग्नो नोत्कटासनो

न भिन्नासनगतो न भिन्न माजने न शयनस्थः

न भुवि न पाणौ न हस्तदत्तं माक्षिकं फणितं

पाकद्गोरसल्लवणं घृतमिति षट्कं तिलकल्ककं नवालान्भर्त्सयन् नैकोमिष्ठमुक् नोद्धृतस्नेहं न दिवाधानान नवा रात्रौ तिल सम्वन्धं न दधिसक्तून न कोविदारवट पिप्पल शश शाकं नादत्वा नाहुत्वा ना नार्द्र कर चरणमुखः पंचार्द्रोहि प्राश्नीयात् । नोच्छिष्टोघृतमादद्यात् न चन्द्र तारकां निरीक्षेत् न मूर्द्धानंस्पृशेत्, न ब्रह्मकीर्त्तयेत् न भार्यासहाश्नीयात् । आपदि तु सजातीयया भार्यया सहैकपात्रे ऽश्नीयात् । अनापदि तु भार्यादर्शने नाश्नीयात् । नवा श्नन्तीमक्षेत्, प्रसृताङ्गुलि च नाश्नीयात् ।

मांस लिप्तकरेण नापोशानङ्कुर्यात्, वामहस्तस्थिते दर्भे अदर्भ दक्षिणहस्तेन न तोयं पिवेत् । देवालयगतो वा नाश्नीयात्, स्वकीयासनस्थं नाश्नीयात् । अजीर्णे नाश्नीयात्, न श्मशानगतोश्नीयात्, न पाणिपात्रस्थ मश्नीयात्, सन्ध्यास्वर्द्ध रात्रो मध्याह्ने च नाश्नीयात्, नार्द्रवासा नार्द्रशिरा नानुपवीसी न प्रसारितपादः न पादरोपितपाणिः, नावसक्थिक संस्थः न पर्यङ्किकास्थः ।

न वेष्टित शिरः, नोत्सङ्गाकृत भोजन भाजनः। नैक वस्त्रः। न दुष्ट मध्ये न सोपानत्कः, न सपादुकः, न चर्मे पविष्टः न चर्मवेष्टित पात्रेश्नीयात्।

"अन्नस्य जन्मकालुष्यं दुष्पंक्तिन चिन्तयेत्।
ग्रासशेषं च नाश्नीयात्, पीतशेषञ्च पिवेत्"।

शाक मूल फलेक्ष्वादि दन्तच्छेदनेन भक्षयेत्। पात्रस्थमन्नं न वर्त्तुली कुर्यात्। वहूनां भुञ्जताम्मध्ये न त्वरान्वितो भुञ्जीत्। वृथानान्नं विकिरेत्, नोच्छिष्टः क्वचिद्भ्रजेत्। उच्छिष्टेन हस्तेन शिरो न स्पृशेत्, तिलकल्कं जलंक्षीरं दधि क्षौद्रं घृतं सक्तुंश्च निश्शेष मश्नीयात्। दन्तच्छेदनो वहिर्दन्तच्छेदः। नोच्छिष्ट घृतमादद्यात् शाक दधि मधु सर्पिः पयेभ्यो अन्यत्सर्वं न निश्शेप मश्नीयात्। सक्तु भोजने जलपानं पुनः परिवेषणम्, आमिष साहित्यं दुग्ध साहित्यं दन्तच्छेदन ञ्च वर्जयेत्। भृत्यमध्ये एकाकी मिष्टं नाश्नीयात्। नातिजठर पूर्त्तिं कुर्यात्। अतिपुरो अतिसायं वा नाश्नीयात्।

तिष्ठन्, गच्छन्, हसन्, स्वग्रामे सन्निहितग्रामे मृतके सति नाश्नीयात्। भुञ्चानोन्नं वामहस्तेन न स्पश्शेत्। न पादौ न शिरो नरसिंथ स्पृशेत् क्षीरान्तमाहारं कुर्यात् अधिकन्तु तन्न पिवेत्। जठरार्द्ध मन्नेन जठर तृतीयांशं जलेन पूरयेत्। वामहस्तेन जलं न विषेत्। ब्राह्मणेषु भुञ्जानेषु स्वयं भोजनोपरमन्नं कुर्यात्, हस्तं प्रक्षाल्य प्रत्यपोशानन्न कुर्यात्। स्निग्ध द्रव्यादीनि भुक्त्वा खड़्या मृदा वा मुखं हस्त ञ्च क्षालयेत्, इषीकादिना दन्तलग्न मपसार्य्य गण्डूषान् कुर्यात् शेषे पादौ पाणी प्रक्षाल्य सश्रोतवन्दन द्विराचमेत्।

"ततोङ्गुष्ठ मात्रः पुरुषो ङ्गुष्ठेषु समाश्रितः।
ईश स्सर्वस्य जगतः, प्रभुः प्रीणातु विस्वभुक्"।

इतिमन्त्रेण दक्षिणपादाङ्गुष्ठे दक्षिणाङ्गुष्ठं स्रावयेत्। मांस मत्स्य तिल मधु संसृष्टं च श्नाति तदा अप उपस्पृस्याग्नि मुपस्पृशेत्, ततो भोजनपात्रे उद्धृतेभोजन भूमौ च गोमयोवकेन लिप्तायाम्भोजना वैधकर्मणि शुद्धो भवति, उच्छिष्ट शेष ञ्च भक्ष्यभोज्यादि वासगृहा दुत्तरतो रुद्र मुद्दिश्य त्यजेत्।

एवं कृते वास्तु शुभं भवति।

"ओं अग्नि राप्यायतान्धातून पार्थिवान् पवनेड़ितः।
दत्तावकाशो नभसा जरयन्नास्तु मे मुखम्"।

"अन्नम्वलाय मे भूमे रपामग्न्यनिलस्य च।
भवत्वे तत्प्रविणत मातन्त्व व्याहतं मुखम्।
प्राणापान समानाना मुदानव्यानयो स्तथा।
अन्नं प्रीतिकरं चास्तु ममास्त्वव्याहतं मुखम्।
अगस्तिरग्निर्वश्चवानड़ श्च भुक्तं ममान्नं जरयत्वशेषम्।
मुखम्ममैतयो रिणामसम्भवं यक्षत्व रोगो मम चास्तु देह:"।

विष्णुः।
समस्तेन्द्रिय देहिदेहि प्रधानभूतो भगवान् यथैकः।
सत्येन तेनान्न मशेषमेतदारोग्यदम्मे परिणाम मेतु।
विष्णुरूक्ता यथैवान्नं परिणाम श्च वै तथा।
सत्येन तेन मद्भु क्त ङ्कार्यत्वन्न मिदन्तथा।
इत्युच्चार्य स्वहस्तोन परिमृज्यात्तथोत्तरम्"।

अथ भोज्या भोज्यानि।

तत्र—शूद्र सिद्धान्नमभोज्यम्। गोरस सक्तुकापूप पयः कृतानि तु भोज्यानि। ब्राह्मण क्षत्रिय विशान्तु सिद्धान्नं भोज्यं, यस्य सिद्धान्नं भुक्त्वा तदुत्थेनरेतसा यदपत्यं जनयति तत्तदन्न स्वामिनः नतु जनकस्य, यस्यचान्ने उदरस्थे भोक्ता मृयते, तस्यः योनौ जायते, शूद्रान्न न्तु भक्त्वा मृतः गर्द्दभ उष्ट्रश्चशूद्र श्च जायते।

ब्राह्मणान्नं यदभोज्य न्तदुच्यते।
अश्रोत्रियान्नं ग्रामयाजकान्नं वहुतरोपनेत्रन्न स्त्र्यन्नं नपुंसकान्नं स्वतन्त्र नानास्वामिकान्नं पुंसश्चल्यन्नं चौरान्नं—गायकान्नं तक्ष वृत्रन्नं वार्द्धुकान्नं दीक्षितान्नं वद्धान्नं कदर्यान्नं अभिशस्तान्नं चिकित्सकान्नं दाम्भिकान्नं, आषेटक्यन्नं क्रूरान्नं उच्छिष्ट भोज्यान्नं दारुणकर्मकार्यन्नं सूतक्यन्नं सूतिकार्थान्नं। अवीरान्नं नगरस्वाम्यन्नं पिशुनान्नं, अन्यतोपजीव्यन्नं ऋतु विक्रय्यन्नं नृसंशान्नं व्यभिचारिपत्नीकान्नं स्त्री जितान्नं पतितान्नं भूपालान्नं सोम विक्रय्यन्नं पौनर्भवान्नं भ्रूणहान्नं शूकर पोषकान्नं।

यत्यन्नं यतिपात्रस्थान्नं यतिपरिवेषितान्नं ब्रह्मचार्यन्नं, वृषलीपत्यन्नं निग्रह युक्तान्नं, रुदतोन्नं माद्यतोन्नं उन्माद्यतोन्नं पुरोहितान्नं द्वेष शीलान्नं प्रेतश्राद्धान्नं शिभ्योपजीव्यन्नं शस्त्रोपजीव्यन्नं बन्धकोपजीव्यन्नं समर्घक्र

महार्घविक्रयोप जीव्यन्नं अक्रीत सोमलताकान्नं प्रायोपवेशनोद्देश्यान्नं अपांक्तेयान्नं ज्योतिषिकान्नं अपुत्रान्नं अप्रसूतस्त्र्यन्नं अवैस्वदेविकपाकान्नं शस्त्रविक्रय्यन्नं कापटिकान्नं परिवेत्रन्नं परिवित्यन्नं, छिन्नाग्रमेहलान्नं ब्राह्मविवाह जामात्रन्नं, केशकीटादिदुष्टं भावदुष्टम् अवलेपदत्तं शुक्तं पर्युषितं पर्युषितमप्यापदि स्नेहाक्तं भोज्यम् । परस्य शूच्यन्नमपि दर्शे न भोक्तव्यम् । स्वीयपाके सति यः परपाके भुङ्क्ते सोश्वन्नं शूकरत्वंगर्द्दभत्वञ्च याति । ब्राह्मणान्नेन दारिद्रय क्षत्रियान्नेनप्रैष्यत्वं वैद्यान्नेन शूद्रत्वं शूद्रान्नेन नाचकिताअन्न स्वामिन श्च पापमन्नादस्सर्वत्र लभेत् ।

अथाभक्ष्याणि ।

लसुनं गृञ्जनं पलाण्डु श्च क्षत्रिकाम्युदना लोहितवृक्षनिर्यास लोहितग्रहणात्कपूरं भक्ष्यं छेदनेनजाताः सर्वे निर्यासाः । वहुआरः अनिर्द्दपः गोक्षीरमग्निसंयोगात्कठिनीभूत मभक्ष्यं । क्रमुम्व शाकं कलम्विकावर्तुला लाचुः कपालालाचुरिति प्रसिद्धा । दुग्धवर्ताकी कुम्भालुफलं घृतमलः सुमुखः मत्स्याकारः सर्पविशेषः । वक्षस्यनवपल्लवः, अहिछत्राकं सुरार्थं यद्धान्यं धृतं सुराजिनि प्रभृतितस्य तण्डुलादिक मभक्ष्यं, परारिका सच पलाण्डु विशेषः । पलाण्डु स्तु दशधा वसोनो दीर्घपत्रः, पूतिगन्धोमहौषधम् । "हिरण्य श्च पलाण्डु श्च नवर्तकः पराविका । गृञ्जनो यवनेष्ट श्च पलाण्डोर्द्दशजातय" इति मञ्चरीकार लिखितायुर्वेदश्लोकात् कोविदारवीजपूरे च निषिद्धे प्लक्षं उदुम्वरं कपित्थं कदम्वं वीजपुरनीली भौमोष्म पक्वमांशं आम मत्स्यं उद्धृतसार वरवाटी मेथी सोंफ श्रीनिकेतन टनकवास कृष्णधान्यं रुग्हलीति प्रसिद्धम् ।

अनाथ सम्मितं अभक्ष्य तुल्यतया स्मृतम् ।

केशावपन्नं कीटावपन्नं कामतष्पादेन स्पृष्ठम् । त्रुणहावेक्षितं रजस्वला स्पृष्टम् । पतत्रिणा अवलीढ़म्, शुना संस्पृष्टम् शुक्तं सहजमधुरं कालवशादम्लं पर्युषितं पूर्वदिन चार्द्धं उच्छिछ्टम्, अन्यभक्षित शेषं पतितेक्षितं सपुष्टं वुभुक्षितो गृहणात्वित्याद्युद्दिश्य दत्तं पर्यायान्नं यथा ग्लान्तकव्यपदेशेन यति प्रभृतीनामन्नं तथा ब्राह्मणान्नंशूद्रोपनीतं शूद्रेण निर्द्दिष्टं तथाशूद्रान्नं ब्राह्मणेननिर्द्दिष्टम् ।

तथा—कूष्माण्डादि वीजं दुग्धेनसह रात्रौ न किमपि खाद्यं काकस्पृष्टं कुक्कुरस्पृष्टं कृमिसंयुक्तम् तथा भक्ष्यान्यपि अमेध्य पतित चाण्डाल पुष्कश कु-

णपा कुष्ठि स्पृष्टान्नं पुष्कशः शवरः । रजस्वलयादत्तन्दापित न्वा, पुंश्चल्या क्रुद्धया मलवद्वाससा वा दत्त न्नाश्नीयात् । न द्विष्पक्वं न पर्युषितम्, अन्यत्र गुड़ पिण्ड सक्तु स्नेहगोरस तैलादिभ्यः तैलन्दधि वा दुग्धादिपानानन्तर न्न खाद्यम्, मलवद्वासा श्लेष्मादि प्रक्षितवासाः उपरिकृत छिक्कं न खाद्यम् । तथा अनिन्दितमपि वाग्दुष्टं राग चुक्र शुक्र खाख दधि गुड़ गोधूमविकारेभ्यो ऽन्यत्पर्युषित न्नाश्नीयात्,

रागो— मांसादि प्रलेहः चुक्रं चूक इति प्रसिद्धम् । खाखाः कट्वम्ल स्वादाः प्रलेह भेदाः रसालादयः शुक्रं तच्च केवल मभक्ष्यम् अन्यसंसृष्टन्तु भक्ष्यमेव । दधिशुक्लं केवलमपिभक्ष्यम् । कन्द मूल फलैः पुष्पैः शस्तैर्यत शुक्रा सवं भवति तदविकारे भक्ष्यम् । विकारकृद भक्ष्यं, पर्युषित मोदनादि, आपदि स्नेहाक्तं भक्ष्यम्, कृशरापूप पायस मधु सर्पिर्मांसानि देव पितृ कर्म शेषवर्ज न्नाश्नीयात् ।

केकाक्तं कीटाक्त ञ्च मृद्भस्म कनलाम्बुभिर्युक्त मश्नीयात् । घृतं तैलं लवणं पायस ञ्च एकपाणिदत्तं नाश्नीयात् । भिक्षा हस्तदत्ता तु न ग्राह्या । शूद्र भुक्तावशिष्ट न्तु पाकपात्रस्थमपि न ग्राह्यम् । मुखवायुना शमीतोष्ण्यं न भक्ष्यन् । आयस पात्रेणोपनीत न्न भक्ष्यम् । सैन्धव सामुद्रिकातिरिक्तं प्रत्यक्षलवणं मृत्तिकाभक्षण ञ्च गोमांस भक्षणवत् ।

अथ दुग्धानि ।

गो र्महिष्या अजाया श्च क्षीरं भक्ष्यम् । शेषमभक्ष्यम् । अभक्ष्यदुग्धानान्दधि घृतेअभक्ष्ये अजामहिष्यो र्दुग्ध दधि घृतान्यवैष्णवानि, महिषी दुग्धं विधवा यत्यो रामिषं सद्योजात न्तु दधि दुग्धमेव भक्ष्येस्वपि विशेषः । प्रसवानन्तरं दशाहं यावत् गो महिष्योर्दुग्धंवत्सं विना प्रस्रवनीय मसृष्कविरं साकुला च गौ स्तस्याश्च दुग्धमभक्ष्यम् तथा विवत्सायाः । अन्यवत्साया श्च अमेध्य भुजश्च गोदुग्धादि । कपिलादुग्धं क्षत्रिय वैश्य शूद्राणा मपेयम् । ब्राह्मणेनापि अग्नौदत्वा शेषं पेयम्, लवणसहितं दुग्ध मपेयम् ।

अथ पक्षिणः ।

तित्तिरिः तृणमयूरः लावकः कपिञ्जलः वाद्ध्रीनसः वर्तकः वनकपोतः कृष्णग्रीवो वक्रशिराः श्वेतपक्षो विहङ्गमः सवान्ध्रीनसः सच्चारिरपि भक्ष्येति केचित् । शल्लकी च भक्ष्या ।

अथ पशवः ।

छाग मेष महिष हरिण खड्ग वहुशाख शृङ्ग मृग चित्रमृग एकसफ वराहाः । सार्यं माणस्य पशोर्मांसं पृष्ठमांसं गर्भशय्या मांसं च भूमेरन्र्ताहितं कृत्वा यन्मांसं पक्वं तच्चाभक्ष्यं शुष्क मांसञ्च । एवञ्च कस्तूर्य्यप्यभक्ष्या अपतद्गत सप्तमासाभ्यन्तर पशोर्मासं, देवपितृ शेषातिरिक्त मांसं च निषिद्धम् ।

अथ मत्स्याः ।

राजीव सिंहतुण्ड सशल्क पाठीन रोहिताः सशल्काः सफराबयः तथाराघव तथा स्थलचरो रोहित सदृशः । अभक्ष्याः—वामीनः मकरः रुण्डुरः जलौका जलकाकः सच जलचरो मयूर सदृशः पङ्कीक एव प्रसिद्धः उभयकाम्या उभयोतो मुखाः भक्ष्या अपि मत्स्याः श्राद्धाद्यशेषाः भक्ष्याः । गोधा कूर्मौं च भक्ष्यौ ।

मत्स्य मासं विना प्राणात्यये सम्भाव्यमाने ऽविधिनापि मत्स्य मांसे खाद्ये तथा श्राद्धे श्राद्धिना खाद्यं तथा प्रोक्षितं यज्ञार्थे मन्त्र संस्कृतं तथा द्विज काम्यया ब्राह्मणानुरोधेन, इदन्तु "सकृदेव सकृद्व्राह्मण काम्ययेति" वचनात् । देव.तर्चयित्वा वैःवदेव होमे पितृ न र्चयित्वाश्राद्धे, तथा औषधत्वेन श्राद्धे यावत् पशु मांसं दत्तं तावत्सकलं श्राद्धिना खाद्यम्, अविधिभक्षणे तु दोषः । तत्राह—मनुः ।

"असंस्कृतान् पशून मन्त्रै र्नाद्या द्विप्रः कथञ्चन ।
आद्यात्तु संस्कृतानेव शास्वतं विधि मास्थितः" ।

न पंच पर्वणि चतुर्थी द्वादशी जवा अतिनिषिद्धा । मधुपर्कार्हस्यातिथेरागमने सोमयागे पितृश्राद्धे वैस्वदेवे मांसाष्टकादौ, अत्रैव पंर्चाहिसा नान्यत्र ।

अथ—भोजनोत्तर कर्म ।

पंत्रकाल भोजनं कृत्वा षष्ठ सप्तमकालावितिहासादि श्रवणेन नयेत्, अष्टमकाले लौकिक कृत्यचिन्ता तच्छेषे च, अयथ्याष्टका दिनविभागो दक्षोक्तः ।

अथ—सायं सन्ध्या मुपास्य साग्नि रह्नौ हुत्वा पुनष्प्राणाहुतिमात्रमपि कृत्वा पादशौचंकृत्वा विशालां समाम् अमलिनां कीटादिशून्यांशय्यामाक्रम्य पूर्वशिरा दक्षिणशिरा वा शयीत ।

अथ शयन विधिः ।

स्वप्रक्षालित चरणः शुचिः शयीत नोच्छिष्टोनार्द्रपादः न तिर्य गुदक प्रत्यक् शिराः । न गृहमूर्द्धन्य काष्ठ दैर्घ्यानुगतः, न नग्नो न विशीर्णेशयने न पालाशे नाश्म् पीठोपधाने नान्यवर्णोप सेविते । न पञ्ज जातीय दारुकृते न गजभग्नकृते न विद्युद्दग्धकृते न भिन्ने नाग्निपूते न घटावसिक्त क्रमजे न जन्तुमये नानावृत्तो न स्फुटिते न मलिने न विषमे न स्वल्पदेशे नाशुचौ नार्द्रे नच पर्वत मस्तके । न स्मशान देवभूत यज्ञगृहायतनेषु नैकः शून्यालये न स्मशान वृक्ष छायासु न व्यसनि मध्ये न धान्य गो गुरु हुताशनसुराणा मुपरि न भस्मनि नासनेन कृष्णचर्मण्यदीक्षित श्चेत् न दिवा सन्ध्ययोः । न प्रातः न प्रतिपत्पञ्चदश्योः सन्धौ न पुत्रजन्माद्युत्सवे ।

अथ दारोपगमन विधिः ।

रात्रेः प्रथम प्रहरे चतुर्थ प्रहरे वा अलङ्कृतो अनुलिप्तः प्रमुदितः सानुरागः स्नातः परिहित रतिवस्त्रः पृष्ठलम्बित यज्ञसूत्रः प्रवृद्धकामः प्रवृद्धकामां प्रमुदितां सुरभिलिप्ताङ्गीम् अलङ्कृतां प्रियामृत्तस्थातां वुध ज्येष्ठा मूल मधा रेवत्यां अश्वनी कृतिकोत्तरत्रय वर्जं सकृदुपेयात् ।

रजसः प्रादुर्भावे चतुर्थ्यां रात्रिं त्यक्त्वा षष्ठयादयश्च षोड़श्यन्ताः समरात्रयः प्रशस्ताः । पुत्रकामो मिष्टमाहारं स्वयं संसेव्य लघ्वाहारांपत्नीं पुन्नामर्क्षे चन्द्र तारा शुद्धौ स्थिरलग्ने शुभग्रहाधिष्ठिते शुभनिरीक्षिते दक्षिणस्वरे वहति सकृदुपेयात् ।

आद्ये तु ऋतु गमने गर्भाधान नानाक्षेत्र संस्कारः कर्त्तव्यः । ऋतावभिगम्य पुरीषवन्मृद वारिभ्यां लिङ्ग हस्त शौचंकृत्वा द्विराचम्य द्विः श्रोत्रवन्दनं विधाय स्नायात् । स्त्रिया स्तु आचमनपर्यन्तमेव । अनृतौ तु स्त्रियाः कामातिशये ऽभिगमः । तत्र द्वयोः पुरीषोत्सर्गवच्छौचाचमने प्रौढ़गर्भाया स्तु अत्यन्त कामातुराया अभिगमने न दोषः । नाप्राप्तरजसां नान्यमनसां नास्नातां नाविष्टां न कुपितां न प्रमत्तां नादक्षिणां नाकामां नान्यदीयां न मलिनां न मलिनवाससां नाभ्यक्तां न रोगिणीं न हीनाङ्गीं नाधिकाङ्गीं न गर्भिणीम् । नाभ्यक्तः नाध्यातः न क्षुधितः न रोगार्तः । न श्राद्धे भुंजन

न श्राद्धं कृत्वा न श्राद्धे निमन्त्रितः। न कृतनिमन्त्रिणः न व्रती न दीक्षितः न देवायतन स्मशानशुन्यालयेषु न वृक्षमूले न दिवा न सन्ध्ययोः स्त्रियमुपेयात् ।

ताम्बूल सुगन्धान्वितां स्वयमपि तादृशस्वपत्नीं रात्रौ प्रहाराभ्यन्तरे सकृदभिगमेत्। रौत्रौ कुवस्त्रादि परिधाने दोषः तैत्तरीय श्रुतौ या मलवद्वासा ऋतौ भवति यस्ततोभिजाथतेसोभिशस्तः, या भरण्येभिगच्छति तस्याः पुत्र श्चौरो भवति, यां क्रीड़ामधिगच्छति तस्याः पुत्रो प्रगलभो भवति या त्र्यहाभ्यन्तरे स्नाति तस्याः पुत्रष्पानीयंप्रविश्य मृयते ।

या त्र्यहाभ्यन्तरे अभ्यङ्गं करोति तस्या दुश्चर्मा जायते। या तदा प्रलिखते तस्याः खलीति । अपस्मारी च । या तदा अङ्क्ते तस्याः काणः या तदा दन्तान् धावति तस्याः स्यावदन्तः या तदा नखान् निकृन्तति तस्याः कुनखी या तदा दैन्यं भजते तस्याः क्लीवः या रज्जुं वर्त्तयति तस्या उद्वन्धूकः। या पत्रेण पानीयं पिवति तस्या उन्मादवकः या प्रसृत्या पिवति तस्याः खर्व इति। कृतशौचावपि तौतस्यां रात्रावैकस्यां शय्याया न शयीयाताम्। ऋतावभिगमनेन गर्भेजाते तृतीय मासादौ गर्भिण्यभिमत पायसादि भोजनरूप दोहददानमावश्यकम्। अन्यथा—अपत्यस्य वैरुप्यं तावास्यादिति ।

अथ—छन्दोगानां स्नानविधिं व्याख्यास्यामो —नदीदेवखात गर्त प्रस्रवणादीन गत्वा शुचौदेशे मृत्तिल कुश गोमयान्युपकल्प्य नमस्कृत्य तीर्थं पावमानः सरस्वतीति पादावारम्य मृद्भिः गात्राणि प्रक्षाल्योपविश्य वद्धशिखी यज्ञोपवीती प्राङ्मुख उदङ्मुखो वा कुशहस्तः शुचि स्समाहितोथ सप्तव्याहृतयः सप्तकृत्वः सावित्र्यानुमन्त्रितं सकृदुदक माचमेत्, तत आचम्यापो यथाविध्याचम्यापो यथाविधिः ।

अथ देवताभिसन्धिकृत्वा प्रयोगः—सहस्रशीर्षा घृतवत्यस्वक्रान्ता इत्याभिर्ऋषि मृत्तिकामादायेदं विष्णुर्विचक्रम इति षड्तेन सकृदुत्सृज्य—उद्वयन्तमसस्पर्श—उदुत्तममिति चोद्ध्वौं पाणीकृत्वादित्यमवेक्ष्य च उद्धृतासि वराहेणात्मामीति च मृद्भिः प्रतिलोमान्यङ्गान्यभिस्पृशेत्। द्विरावृत्तिः कृत्वा गावश्चिद्यसम वन्यव इति गोमयङ्गात्रेषु मृत्तिकावत् ऋतञ्चसत्यञ्चेति त्रिः

शुद्धाघमर्षणांत। ततो देवताभिसंधिकृत्वा नाभिमात्रे जले स्थित्वा शन्नो देव्यापोहिष्ठाभिः पावमानीभिः तरत्समन्दीभिरेतोन्विन्द्रं स्तराम मुष्ण वासकि इन्द्रत्वदुतरमेभाभिः ऋग्भिः पवित्रवतीभिः मार्जयित्वा त्रिः प्राणायामं कृत्वा त्रिः पूत्य सहस्र शीर्षा इति तृचेनाघमर्षणं पुन श्शन्नोवेव्या इति मार्जन ञ्च।

अथ—नित्यवत्सन्ध्यामुपासीत, उदुत्यं चित्रं आयङ्गौ रपहेत वालरुध्यामेध्याभि र्ऋषिभः सवितुरुपस्थानम् नमो ब्रह्मण इत्युपजायतेत्येवमन्त्रेणाग्नि स्पृश्यत्विति सव्येन तां स्तर्पये द्यथापसव्येन नारायणी शटीत्यनुकव्य वाहनादयोदिव्यान्मनुष्यां श्चाथात्मीयां श्च त्रीन् पितृत स्त्रीन् मातृत पत्न्यु श्चेत्तर्पणम्, सनकादय श्च निरीत्याथमनुष्य धर्मान्तिः कृत्वा भासं दशस्तूभयमयं जल रोहिणके बृहद्रथन्तरे पुरुषइति देवव्रतानिमहानाम्नो महावैराज्यं महादिवा कीर्त्यं पुरुषव्रत इत्येकानुगानम्, ततः चारीयमादित्यव्रतमेकविंश त्यनुगानम् प्रकनिारभ्य यथाशक्त्यहरहव्रं ह्मयज्ञा इति गोभिलिय सूत्रम्। शुचौदेशे जलतीरे षूपलिप्ते तत वस्त्रादिकंप्रसार्य तदुपरि पृथक् गौरमृत्तिकां कृष्णतिलान् सद्यस्ससुत्पादितान्, मासेनभसीतिवचनात्, श्रावणामावास्योत्पाटिता न्दर्भान् समूलाग्रान्, अनतिदीर्घान्, असृतक्षीरान्, तथा तरुणगवि गोमयाना मादये दित्यर्थः।

नमस्कृतेति वरुणाय नम इति तीर्थं नमस्कृत्येत्यर्थः। पादाविति। आदौ सव्यं ततोपसव्यं पादं मृज्जालाभ्यांक्षालयेत्। सामवेदिनां सव्यपादावनेजनस्यादौ विधानात् इदमपि वामहस्तमात्रेण

"धर्मविद्दक्षिणं हस्त मधःकायेन योजयेत्।
वामेन पाणिना तद्वल्लाभेरुद्ध् र्वन्न शोधयेदिति"

वचनात्, गुदमेहनयोरप्यवनेजनं वामहस्तेनैव।

अतएव—उत्तराङ्गावनेजनं दक्षिणहस्तेनैव वद्धशिखीति, यद्यपि शिखावन्धनोपवीति द्वयोः क्रतुपुरुषार्थतया प्रागपि ते स्तएव। तथापीदानीन्द्वयोरवधारणमात्रम्विधीयते। यत्तु शिखावन्धने चूड़ा विमोचनम्। उपवीतेत्वविधानेन उत्तरीय परित्यागो विधीयत् इतितदुपरि संख्यापत्तेः। सप्तेति—सप्तृव्याहृतयइदानीं पृथक् स्मरणीयाः, नतु जलाभिमन्त्रणे तासां गायत्री वद्विनि-

योगः। पृथक् कृत्य निर्द्देशात्। यथाविधीति सश्रोत्रवन्दन मिदमाचमन-द्वयमित्यर्थ।

अथ—गोभिल स्नानविधिः।

अथैतत्प्रयोगः गौरमृतिका कृष्णतिल कुशअजीर्णगवी गौमयानादाय जल-तीरंगत्वा भुवंप्रक्षाल्य तदुपरि वस्त्रादिकं प्रसार्य्य तत्र पृथक् पृथक स्थापयेत् अथ "ओं पावकालः सरस्वती वाजभिर्वाजिनीवति। यज्ञारम्भधियावतु" एतया ऋचा, ओं वरुणायनमइति तीर्थं प्रणम्य, ततो गात्राणि मृद्भिः प्रक्षालयेत्।

तद्यथा—"पादौ मेढ्रे गुदौ हस्तौ कक्षौ वक्ष श्शिरस्तथा।
प्रक्षाल्य मृज्जलैस्सम्यगाप्लुत्य विधिनाचरेत्"।

आदौ वामपादं ततो दक्षिणपादंततो मेहनं तत पायुं, वामहस्तेन एवैकया-मृदा प्रक्षाल्य ततो हस्तौ मिलितौ ततः कक्षौ दक्षिण वामौ ततोहृदयं तत शिरः प्रदक्षिणहस्तेन एकैकया मृदा सजलया प्रक्षाल्य ततोमज्जनंकृत्वा तीरमागत्य ततोपविश्य शिखांयज्ञोपवीत ञ्च परामृश्य पराङ्मुखे उद्ङ्मुखे वा वामे कुशत्रयं दक्षिणानामिकायां पवित्रंधृत्वा सकृदाचम्य। ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यं इति सप्तव्याहृतिः सकृदुच्चार्य्य।

तत—ओं तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियो योनः प्रचोदयात्, इति सप्तकृत्वः पठेत्। तेनामन्त्रिताभिरद्भिः सकृदाचम्य हस्तं प्रक्षाल्य अ-ङ्गुष्ठमूलेन संवृत्तं मुखं प्रोक्ष्य ततस्संवृत्तमेन मुखं तिसृभिरंगुलीभिः श्यावोपरि-संस्पृश्य ततो दक्षिणहस्तं प्रक्षाल्य ततः पाणीशिरश्चाभ्युक्ष्य ततस्तर्ज्जन्यङ्गु-ष्ठाभ्यां सजलाभ्यां चक्षुषी, ततो नासिकाङ्गुष्ठाभ्यां सजलाभ्यांनासापुटे, तत-स्ताभ्यामेव कर्णौ ततः कनिष्ठाङ्गुष्ठाभ्यां नाभिं स्पृष्ट्वा सजलाभ्यामिति सर्वत्रदक्षिणहस्तं प्रक्षाल्य दक्षिणहस्तजलेन हृदयम्। सर्वाङ्गुलीभिश्शिरः।

तथैव दक्षिण वाहुमूलम्, ततो वामवाहुमूलम् स्पृशेत, तत ओंकारादि मन्त्रेण ब्रह्माद्या ऋषयः गायत्र्याद्याश्छन्दांसि अगस्त्यादयोदेवताः सर्वकर्मार-म्भेविनियोगः इति स्मरणम्। अयमेव देवताभिसन्धि पदार्थः। अत्र ऋष्या-दिस्मरणस्य मन्त्राणा ञ्चा नन्वयः प्रतिभाति। किन्तुविनियोगक्षमानां मन्त्राणां ऋष्यादि स्मरण मुचितम्। तस्यचाकरणेपि नात्रदोषो नित्यत्वात्।

"ओं सहस्रशीर्षापुरुषस्सहस्राक्षः सहस्रपात्,
सभूमिं सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ।
ओं धृतवती भुवनानामभिप्रियोर्वी पृथ्वीमधुत्वव्ये मुपेशमा ।"

"द्यावा पृथिवीवरुणस्य धर्मणाविष्कभि तेष्म जरेभूरि तेजसा ।"

"ओं अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ।
मृत्तिके ब्रह्मदत्तासि काश्यपे नाभि मन्त्रिते ।"

इत्याभि स्तिसृभिर्ऋग्भिः दक्षिण हस्तेन मृत्तिकामादाय—"ओं इदं विष्णुर्विचक्रमे त्रेधानिदधेपदम् । समूढ़मस्य पांसुले । त्रीणपदाविचक्रमे विष्णुर्गोपा-अदाम्यः, अतो धर्माणि धारयन्, ओं विष्णोः कर्माणि पश्यत । ततो व्रूतानि यस्पृशे । इन्द्रस्य युज्यस्सखा ।

"ओं तद्विष्णोः परुमंपदं सदापश्यन्ति सूरयः ।
दिवीव चक्षु रावय ततम् ।"

"तद्विप्रोसो विपत्यवो जागृवांसः समिद्धे । विष्णोर्यंथोरमं पदम् ।"
"अतो देवा अययन्तनो यतो विष्णुर्विचक्रमे । पृथिव्या अधिसानवि ।"

एताभिश्च षड्भिः ऋग्भिः मृदं सम्मृज्य ।

"ओं उद्वयन्तमसस्परिस्वः ज्योतिः ताद्यन्त उत्तरम् ।
स्वः पश्यन्त उत्तरं देवन्देवत्रा सूर्य मगन्मज्योति रुत्तमम् ।
ओं उदुत्तमं वरुण पाश मस्मद वाधमंविमध्यमंश्रथाय ।
अथावय मादित्यव्रते तवानागसो अदितये स्याम ।"

इति मन्त्रद्वयेन तां मृदं हस्तद्वये कृत्वा सूर्यं निरीक्ष्य ।

"ओं उद्धृतासि वराहेण कृष्णोन शतवाहुना ।
मृत्तिके हरमे पापं यन्मया दुष्कृतं कृतम् ।
ओं आत्मासि प्रोण तदृतं द्रव्यं माह्यसि सर्व मनुष्प्रविष्टः ।
स येजरां रोग मपमृज्य शरीरादपा मयेभि मामृथा न इन्द्रः ।"

इतिमन्त्रद्वयेन प्रतिलौमाङ्गं संमृजेत्, यथोद्ध्वंसंस्पृशेत्। पुनः सहस्रशीर्षात अभिमर्शनपर्यन्तंकुर्यात्।

"ओं गावश्चिद्या समन्यवं शजात्येन मरुतः सरन्धवः।

वृहते ककुभो मिथ।"

इति मन्त्रेण गोमयेनमृत्तिकालेपस्थानं सकृदभिमृशेत्, तानि तु स्थानानिशिर-स्कन्धौ च दक्षिणोत्तर पार्श्वे च उरू जंघांघ्रि प्रतिलोमं तृणो मृद्भि र्गोमय न्तु सकृत्तथा। इति परिसंख्यातानि दश, ततोधमर्षण सूक्तं प्रषकस्त एव त्रिर्ज-पेत्।

ततो नाभिमात्रं जलं प्रविश्याथ देवताभिसन्धिः, सच चिन्त्यः। कुश-त्रयं दक्षिणहस्तेनादाय - शन्नोदेवी, आपोदिष्ठाभिः पावमानीभिरिति। ओं "उपास्मै गायतानरः पवमानायेन्दवःअभिदेवा इयन्चत। शं राजन्नोषधीभ्यः। "ओं देवि द्यूतत्यारु चार परिष्टोभत्याकृपा। सोनान्छुक्रा परःशिरः। "ओं हित्वानोहे तृभिर्हित आराजं राज्यमक्रमीत्। सीदन्तो रन्वयोयथा। ओं वधकसोम सुकृथये संजगमानो दिवाकरे परस्व सूर्योदृशे। ओं पवमानस्य तेकरे वाजित्सुरा अमृक्षत। सर्वन्तो न श्रवस्यवः, ओं अच्छा त्कोणं मधुश्चूता अमृग्रं वारे अच्यये। अवार शन्नु धीतयः। ओं अच्छा समुद्र मिन्दवो स्तं गावो न धेनवः। अस्मं नृतस्य योनिमा।" एतान् वसवः पावमन्यः पवमानः। सोमस्तद्देवताकः। त वत्स मन्घस्तु "ओं तरु समन्दी धावति धारा सुत-स्यान्धसः। तरु समद्दी धावति।" "ओं उस्नावेद वसूनाम्मर्त्यंस्यदेव्यवसः। तरुसमन्दी धावति। उध्वस्रयोः पुरुषन्त्योः वास उस्राशि दध्महे। तरुसम-न्दी धावति।

"ओं आययो स्त्रींशत तनम्। सहस्राणि च दध्महे। तरुसमन्दी धावति। ओं एतोत्विन्द्रं स्तु वामशुद्धं शुद्धेनसाम्ना। तद्धे रुच्चैर्घृत्वा नंशुद्धै राशीर्वान्ममत्त। ओं तमुष्ण चा मयं पिव इन्द्र शुक्ला निरावृधः। पुरन्धस्य पौस्यामि वासन्तो वनामहे। ओं नकि इन्द्रत्वदुत्तरं न ज्यायो अस्थि वृत्रहन्। न क्येयं यथाद्वयम्।" ओं भूरित्यादि मन्त्रेणपूरकं तथा कुम्भकं तथा रेचकं प्रत्येकः प्राणायामः।

एवं द्वितीयम् प्राणायामं कुर्यात् ।
ओं सहस्रशीर्षेति ऋक्त्रयेण जलेन नासिकांप्रवेश्य जपेत् । इदमेव अघमर्षण वदघमर्षणस्थ शन्नोदेव्याभिर्मार्जिनं विशकं पूर्ववत्कुर्यात् ।

अथ – नित्यवत्सन्ध्या मुपासीत ।
यथाचमनं विधाय उदकेनात्मानं प्रदक्षिणंपर्युक्ष्य सजल कुशत्रयेण "रक्षान्ते वारिणात्मानंपरिक्षिप्य समन्ततः । शिरसो मार्जनं कुर्यात् कुशैसोदक विन्दुभिः । प्रणवो भुर्भु वःस्वः सावित्री च तृतीयका ।

"अप्दैवत्यं त्र्यचञ्चैव चतुर्थमिति मार्जनम् ।"

वारिणात्मानं वेष्टयित्वा सोदक विन्दुना कुशत्रयेणओंकारेण रुकम्, ओं भुर्भु वः स्वरिति द्वितीयम् ।

"ओं तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियो योनः प्रचोदयात् ।"

इति तृतीयम् ।

"ओं आपोहिष्ठामयोभुव स्तानऊर्जेदधातन ।
महेरणाय चक्षसे योव शिवतमोरस स्तस्यभाजयतेहनः ।
उसतीरिव मातरः तस्माअरङ्ग मामवो यस्यक्षयाय जिन्वथ ।
आपोजनयथाचन ।" इति चतुर्थं मार्जनम् ।

अथ प्राणायामम् ।
"ओं कारस्य ब्रह्मऋषि र्द्वेवी गायत्री छन्दोग्निर्द्वेवता सर्वकर्मारम्भेविविनियोगः सप्तव्याहृतीनां गौतम भारद्वाच विस्वामित्र यमदग्नि वशिष्ठ कश्यपात्रेय ऋषयः गायत्र्युष्णि गनुष्टुप् वृहतीपंक्ति स्त्रिष्टुप जगत्यस्छन्दांस्यग्नि वांयु सूर्य वृहस्पति इन्द्र विस्वेदेवा देवताः प्राणायामे विनियोगः । गायत्र्या विस्वामित्र ऋषि र्गायत्रीच्छन्द स्सवितादेवताजपे विनियोगः । शिरस इति यजुः प्रजापति ऋषिःपरमात्मा देवता प्राणायामे विनियोगः ।

इति ऋष्यादिकं स्मृत्वा पूरक कुम्भक रेचकान्प्राणायामान् यजुर्वेदिवत्कुर्यात् । आपष्पुनन्त्विवति ब्रह्मणष्पति ऋंषिरनुष्टुप्छन्द आपोदेवता आचमने विनियोगः ।

"ओं आपः पुनन्तुपृथिवीं पृथ्वीपूता पुनातुमाम् ।
पुनन्तु ब्रह्मणस्पति र्ब्रह्मपूता पुनातु माम् ।।
यदुच्छिष्टमभोज्यं यद्वादुश्चरितम्मम ।
सर्वं पुनन्तु मामापो असताञ्च प्रतिग्रहं स्वाहा" ।।

इत्यनेनाचमेत् । मध्याह्न सन्ध्याकथन प्रसङ्गात् ।

प्रासस्सायाह्नयोरप्याचमनादि विशेषउच्यते । सूर्यश्चमेति हिरण्यगर्भ-ऋषिर्मध्येनुष्टुवाद्यन्तयोर्थव मध्यागायत्री छन्दस्सूर्योदेवता आचमनेविनियोगः । ओं सूर्यश्च मामन्युञ्च मन्युपतयश्चमन्युकृतेभ्यः पापेभ्यो रक्षन्तां यद्रयात्र्या पापमकार्षंमनसा वाचा हस्ताभ्यां पद्भ्या मुदरेण शिस्ना रात्रिस्तद्वलुम्पतु । यत्किञ्चिद्दुरितम्मयि । इदमहमाममृत यौनौ सूर्येज्योतिषि जुहोमिस्वाहा । इति प्रातः ।

अग्निश्चमेति हिरण्यगर्भ ऋषिर्मध्येनुष्टुवाद्यन्तयोर्जवमध्या गायत्री छन्दोग्निर्देवता आचमने विनियोगः । ओं अग्निश्च मामन्युश्चमन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां यदह्नापापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्या मुदरेण शिस्नाह स्तदवलुंपतु । यत्किञ्चिद्दुरितम्मयि इदमहम्मा ममृत योनौ सत्येज्योतिषि जुहोमिस्वाहा ।

इति सायम् । सूर्यश्चमेति मन्त्रेण प्रातराचमनं स्मृतम् । आपः पुनन्तु मध्याह्ने, सायमग्निश्चमेति । इति प्रचेतो वचनात् । व्याहृतीनां प्रजापति ऋषिर्गायत्र्युष्णि गनुष्टुप वृहती पंक्ति त्रिष्टुप जगत्यस्छन्दांसि अग्नि वायु सूर्य वृहस्पतयो देवता मार्जनेविनियोगः । गायत्र्याविस्वामित्र ऋषिर्गायत्रीजन्दस्सविता देवता मार्जने विनियोगः ।

आपो हिष्ठेति त्र्यचस्य सिन्धुद्वीप ऋषिर्गायात्री छन्द आपोदेवता मार्जने विनियोगः ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यं, ओं तत्सविनुर्वरेण्यं भर्गोदेवस्यधीमहि धियो योनः प्रचोदयात् ।

ओं आपोहिष्ठा मयो भुवः ओं तानऊर्जेदधातन ओं महेरणायचक्षसे। ओं योवश्शिवतमोरसः ओं तस्यभाजयतेहनः ओं उशतीरिव मातरः ओं तस्मा-अरङ्गमाममो ओं यस्यक्षयाय जिन्वथ ओं आपो जनयथाचनः । इत्येतैः षोडशभिर्मन्त्रैश्शिरसि मार्जनानि कुर्यात् ।

. . . . . .

"शिरोमार्जनं कुर्यात्, कुशैस्सोदक विन्दुभिः।
यस्यक्षयायेति भूमा वल्यं मूर्ध्नि विनिः क्षिपेत्॥
क्षिप्तेन- मूर्ध्नि तोयेन पापं तस्य प्रणस्यति।
भूमौ क्षिप्तेन हन्यन्ते असुरादेव शत्रव॥"

इति शंख लिखित वचनात्।

ततो हस्तेन जलमादाय तत्र नासिका मासज्य अधमर्षण सूक्तं जपेत्। आयतप्राणः सकृत्। अनायत प्राणस्तु त्रिरिति व्यवस्थितो विकल्पः। अन्तश्चरसीति तिरश्चीन ऋषिरनुष्टुप्छन्द आपोदेवता आचमने विनियोगः।

"ओं अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः।
त्वं यज्ञ स्त्वंवषट्कार आपोज्योती रसोमृतम्॥"

इति शंखोक्त माचमनम्। ततः सूर्याभिमुखस्तोयाञ्जलि मादाय प्रणव व्याहृति त्रय सावित्र्या प्रणवत्रय सावित्रीणां ब्रह्मप्रजापति विश्वामित्रऋषयः देवीगायत्री वृहती छन्दांसि च अग्नि वृहष्पति सवितारो देवता अञ्जलि प्रहरणे विनियोगः।

ततो गायत्रीमन्त्रेण तमञ्जलिं सूर्यं प्रति क्षिपेत्, अयन्त्वेक एव अञ्जलि मित्येकस्य विधेयगतत्वेन विवक्षितत्वात्। ततः पादद्वयाग्रभागेन तिष्ठन्नेक पादेन वा एकपादस्याग्रेण वा ऊर्ध्व वाहुः वक्ष्यमाणमन्त्रैरुपस्थानं कुर्यात्। तद संसक्तपार्ष्णिरेकपादार्द्ध पादेपि कुर्यात्कृताञ्जलिर्वापि ऊर्द्ध वाहुरथापि वा, इति छन्दोग परिशिष्टात्।

उद्वयमिति प्रस्करणऋषिर्गायत्रीछन्दः सूर्योदेवता सूर्योपस्थावे विनियोगः। ओं उदुत्यं जातवेदसं देवं वहन्तिकेतवः। दृशे विस्वाय सूर्यं चित्रमिति कुत्सऋषि स्त्रिष्टुप्छन्दःसूर्यो देवता सूर्योपस्थाने विनियोगः। इतरासाणां प्रस्करणऋषिर्गायत्री छन्दरसूर्योदेवता सूर्योपस्थाने विनियोगः। ओं चित्रन्देवानामिति आयङ्गौरिति सर्पिराज्ञी ऋषिर्गायत्रीछन्दः सूर्योदेवता सूर्योपस्थाने विनियोगः।

ओं आयङ्गः पृष्णिरक्रमी दशदन्मातरं रः पु। पितरञ्च प्रयन्धोः। अपत्येतावौ यथा नक्षत्रायण्यक्तुभः। शूराय विस्वचक्षसे ओं तरणिरिति।

ओं अद्यामेधिरजः पृथ्विहा सिशानो अत्वभिः पश्यन्त्यन्मानि सूर्यम् उदुत्य-मिति चित्रमिति च ऋग्द्वयेणैव प्रातस्सायं सन्ध्ययोरुपस्थानं विदध्यात् । तच्चित्रमिति ऋक्त्रयेणोपतिष्ठेदनन्तरमिति छन्दोग परिशिष्टे सामान्य स्मरणात् ।

मध्येत्वह्न उपर्यस्य विभ्राडादिषु जपेत् । अह्नोर्मध्ये अस्योपस्थानस्य उपविशेषे विभ्राडादि सामयन्चकं इच्छया जपेत् । तेन इच्छयेत्यभिधाना-न्नास्य नित्यत्वम्, किन्तु काम्यता फलन्तु ब्रह्मलोकः । तदुक्तं सामविधानेतर-द्यातीयं प्रयुञ्ज्यानः शुचिः पूतो ब्रह्मलोकमभि सम्पद्यते न स पुनरावर्त्तत इति विभ्राद्वृहत पिवतु सोम मित्येकं तवाहं सोम वारणेति द्वितीयम् । ब्रह्महां असि सूर्येति तृतीयम् । इन्द्रमीले देवता तयेनि चतुर्थम् । भ्रायन्त इव सूर्यमिति पञ्चमम् । अथोपविश्यकुशानादाय प्रथमं प्रणव व्याहृतित्रय स्सावित्रीरनु-सृत्य रुद्रसंहितामधीत्य पश्चात् पर्षादारभ्य यथावकाशं प्रत्यहं ब्रह्मयज्ञं कुर्यात् । तथाचमेत् । ओंकारपूर्वकास्तिस्रो महावृहतयोध्येयाः । त्रिपदावेव गायत्री विज्ञे-या ब्रह्मणोमुखम् । प्रणव व्याहृतित्रयस्हित गायत्रीमन्त्रः ब्रह्मयज्ञात्पठनीयः प्रथममित्यर्थः ।

वेदः सादित आरभ्य शक्तितोहरहर्जपेत् । उपतिष्ठे ततो रुद्रमर्वाग्वा वैदिकाज्जपेत् । स च आदित इति आदितः कक्कंसामोक्तक्रमेणवेदः पठनीयः । कक्कंसाम च अग्न आयाहिनीतय इत्याकाराया मृचिज्ञेयम्, कक्कंसामपठिता आरोवाजेत्यादि एकादश सामानि पठेत् तद्यथा । आवो वा जानमिति, ओं तत्वोवर्गेति चत्वारिसामानि आज्यदोहा त्रीणिदेवव्रतानि अधिपतय इत्यादिनि एषा तरत्वेति संहिताकक्कति । पूर्वमन्तर स्वा पठनीयाः ।

ब्रह्मयज्ञेति स्थानान्तरमप्याह सचार्वाक तर्पणात्कार्यः । पश्चात् प्रात-राहुतिः । "वैस्वदेवावसाने नान्यतर्ते निमित्तकात्" स ब्रह्मयज्ञः स उपस्थाना-नन्तरं तर्पणादर्वाक्कार्यः । यद्वा तर्पणानन्तरं प्रातराहुतिस्तदनन्तरङ्कार्यः ।

यद्वा मध्याह्निककर्मानन्तरं वैस्वदेवकर्मानन्तरं कार्यः । वलवद्बाधक मन्तरेणान्यत्र न कार्यः । इति श्लोकार्थः ।

अथ तर्पणम् । तत्र गोभिलः ।

"अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु ।
तृप्यत्विति च मे ऋव्यं नाम्ना तु प्रणवाहिना" ॥

ओं नमो ब्रह्मण इत्याद्युपजाय चेत्यन्तरम् ।

अस्यार्थः—वामान्वारब्ध दक्षिणहस्तेन ओं नमो ब्रह्मण इत्युपक्रम्य उपजायतेत्यन्तरं तर्पणन्देवविधिना कुर्यात् ! तद्यथा—आदावेव एकमोङ्कारन्दत्वा ओं नमो ब्रह्मणे नम आचार्येभ्यो नम ऋषिभ्यो नमो देवेभ्यो नमो वायवे च। ऋत्यवे च विष्णवे च नमो वै श्रवणायचोपजाय च ।

ओं अग्निस्तृप्यत ओं प्रजापतिस्तृप्यत ओं विस्वेदेवास्तृप्यन्तु ओंकारस्तृप्यत ओं वषट्कार स्तृप्यत, ओं महाव्याहृतयस्तृप्यन्तु ओं गायत्री तृप्यत ओं सावित्री तृप्यत ओं सरस्वती तृप्यत ओं ब्रह्मा तृप्यत ओं देवास्तृप्यन्तु ओं ऋषयस्तृप्यन्तु ओं छन्दासि तृप्यन्तु ओं आचार्यास्तृप्यन्तु ओं यज्ञास्तृप्यन्तु ओ अध्ययनं तृप्यतु ओं अन्तरीक्षं तृप्यत ओं अहोराणि तृप्यन्तु ओं समुद्रा स्तुप्यन्तु ओं गिरय स्तृप्यन्तु ओं क्षेत्राणि तृप्यन्तु ओं औषधय स्तृप्यन्तु । ओं वनस्पतय स्तृप्यन्तु ओं नागास्तृप्यन्तु ओं वनानि तृप्यन्तु ओं गावस्तृप्यन्तु ओं वसव स्तृप्यन्तु ओं मरुत स्तृप्यन्तु ओं सिद्धा स्तृप्यन्तु ओं साध्यास्तृप्यन्तु ओं नक्षत्राणि तृप्यन्तु ओं ग्रहास्तृप्यन्तु ओं असुरा स्तृप्यन्तु ओं भूतानि तृप्यन्तु ओं पिशाचा स्तृप्यन्तु ओं यक्षा स्तृप्यन्तु ओं रक्षांसि तृप्यन्तु ओं ओं गन्धर्वा स्तृप्यन्तु ओं एव मादायस्स्वस्ति कुर्वन्तु तर्पिताः स्वस्ति कुर्वन्तु तर्पिता इति पाठमात्रम् ।

ततः प्राचिनावीती दक्षिणहस्तानामिकायां कुशत्रयं सुवर्ण रजतञ्च मूलेधृत्वा नाभिमात्रे जले उद्ध्वंजानुर्द्दक्षिणाभिमुखस्तर्पयेत् । केचित्तु—देवतास्तर्पयित्वापितृस्तर्पणमनुतीर्थमिति वाक्यवलेन अनुतीर्थं तीर्येव्यष्टे आर्द्रवासस्तया जल एवोपविश्यतर्पणं कुर्यादित्यर्थः ।

तत्र "नाभिमात्रे जलेस्थित्वा चिन्तयेदूद्ध्वंमानसः ।
आगच्छन्तु मे पितर इमंगृहणन्तपोञ्जलिम" ॥

इति कार्ष्णाजिनि वचनेन छन्दोगानामपि नाभिमात्रजले उद्ध्वंजानुत्व विधानात् पूर्ववाक्यस्यतु देवता तर्पणानन्तरं पितृतर्पणम् तच्चानुतीर्थम् । तीर्थान-

तिक्रमेण, तेन देवता तर्पण मङ्गुल्यग्रेण, मनुष्यस्य तर्पणं कनिष्ठामूलेन दिव्य-पितृणां यमादीनां स्वपितृणाञ्च तर्पणं पितृतीर्थेनकार्य मित्यर्थः। अथैक मञ्जलिं देवादौ द्वौ तु सनकादयः।

"अर्हन्ति पितर स्त्रीं स्त्रीं स्त्रियश्चैकैक मञ्जलिम्"।

एकैकमिति ब्रह्मादीनामेकैकोऽञ्जलिः यद्यपिदेवानां तर्पणेऽञ्जलिर्नास्ति, अन्वारब्धेत्यादिगोभिलवचनात्। तथापि देवतर्पणे वामान्वारब्धो दक्षिणकर एवाञ्जलि पदेनेहोक्तः। द्वौ द्वाविति।

यत्र—सनकादेः प्रत्येकं देवतात्वम, तत्र—प्रत्येकं द्वौ द्वावञ्जली मिलीत देवतात्वे तु न तथा आवृत्तोरसम्भवात्। तीर्थन्तुप्राजापत्यमत्र लाजावत्वतिवत्। पितर इति कव्यवालादयः—स्वपित्रादयः षट्प्रत्येकं त्रीन् त्रीनञ्जलिंलभन्ते। एषु चाञ्जलिषु प्रथमो दशाङ्गुलिपर्यन्तं द्वितीय एकादशाङ्गुलपर्यन्तं तृतीया द्वादशाङ्गुल पर्यन्तमुच्चैर्द्दीः "सत्रिस्त्रींजलाञ्जलीन् दद्यादुच्चैरुच्चतरन्नरः। गोशृङ्गमात्र मुद्धृत्यजलमध्ये जलं क्षिपेदिति वचनात्"।

तत—ओं नारायणी तृप्यतु, ओं शाप्यमुनि स्तृप्यतु, ओं व्यास स्तृप्यतु ओं भागुरिस्तृप्यतु, ओं गौगुंण्डी स्तृप्यतु, ओं गौगुण्डवी स्तृप्यतु, ओं भगवानौपमन्यव स्तृप्यतु, ओं काराटी तृप्यतु, ओं मशकोगाभ्य स्तृप्यतु, ओं वार्षण स्तृप्तु, ओं क्रथमु स्तृप्यतु, ओं शालिहोतृद स्तृप्यतु, ओं जैमिनिस्तृप्यतु ओं त्रयोदशैते सामगाचार्यास्स्वस्ति कुर्वन्तु तर्पिताः, ओं शटिस्तृप्यतु ओं भागुरिस्तृप्यतु ओं वृषाणकस्तृप्यतु ओं रु रुचिस्तृप्यतु ओं अगस्त्यस्तृप्यतु ओं समवाहुस्तृप्यतु, ओं कू कू स्तृप्यतु, ओं वधकशिरास्तृप्यतु, ओं दशैते प्रवचनकर्त्तारः स्वस्तिकुर्वन्तु तर्पिताः।

ओं यमस्तृप्यतु, ओं यमपुरुषस्तृप्यतु, ओं कव्यवालस्तृप्यतु, ओं नलस्तृप्यतु ओं सोमस्तृप्यतु, ओं अग्निष्वात्ता स्तृप्यन्तु, ओं सोमपास्तृप्यन्तु, ओं वर्हिष स्तृप्यन्तु।

ओं यमस्तृप्तु, ओं यमपुरुषस्तृप्यतु, ओं कव्यवालस्तृप्यतु, ओं नलस्तृप्यतु, ओं सोमस्तृप्यतु, ओं अग्निष्वात्तास्तृप्यन्तु, ओं सोमपास्तृप्यन्तु, ओं वर्हिषस्तृप्यन्तु।

"ओं अष्टावेते दिव्यपितरः स्वस्ति कुर्वन्तुर्तर्पिताः।
ओं यमाय धर्मराजाय मृत्यवे चान्तकाय च।
वैवस्वताय कालाय सर्वंभूतक्षयाय च।
औदुम्वराय दध्नाय नीलाय परमेष्ठिने।।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः।
एकैकस्य तिलैर्मिश्रां स्त्रीं स्त्रीं दद्याज्जलाञ्जलीनिति" ।।

एवं चतुर्द्दशैतेयमाः स्वस्ति कुर्वन्तु तर्पिताः। ओं अद्यामुकगोत्रोऽस्मत्पितामुक शर्मा तृप्यत्विदंजलं सतिलं तस्मै स्वधानमः। एवं पितामह प्रपितामह मातामह प्रमातामह वृद्धप्रमातामहानपि तपयेत्।

ततः—ओं अद्यामुकगोत्राऽस्मन्माताऽमुकदेवी तृप्यत्विदं जलं सतिलं तस्यै स्वधा इत्येक मञ्जलिन्दद्यात्। एवं पितामही प्रपितामही मातामही प्रमातामही बृद्धप्रमातामहीभ्यीं दद्यात्। एवमेव भ्रात्रादिभ्यो राजान्तेभ्यः प्रत्येक मेकैकमञ्जलिन्दद्यात् त्रीन् पितृतः त्रीन् मातृतः। स्त्रियश्चेति गोभिल सूत्रात्। ततो निवीती उत्तराभिमुखः सनकस्तृप्यत्विति द्वावञ्जली प्रजापति-तीर्थेन दद्यात्।

एवं सनन्द सनातन कपिल आसुरिवोढृ पञ्चशिखीनपि तर्पयेत्। अत्र तत्तत्तर्पणकरणीभूता ऋजवः कुशास्सयवाह स्ताम्यासुत्तराग्रा धर्त्तव्याः ततो ज-लादुत्तीर्य, स्वधौतेशुद्धै कवाससी परिधायोपविश्य द्विराचम्य, अपसव्यङ्कृत्वा दक्षिणाग्रेषु कुशेषु सतिलोदकाञ्जलिन्दद्यात्।

"ओं ये वान्धवा अवान्धवा वा येन्यजन्मनि वान्धवाः।
ते तृप्ति माखिला यान्तु यश्चास्मत्तोभि वाञ्छति।"

इत्येक मञ्जलिन्दद्यात्। ततः स्नान शाटी मृतत्रयेणप्रक्षाल्य।
"ओं ये चास्माकं कुलेजाता अपुत्रा गोत्रिणो मृताः।
ते पिवन्तु मयादत्तं वस्त्रनिष्पीड़नोदकम्।"

इति मन्त्रेण दक्षिणाग्र कुशत्रयोपरि तज्जलाञ्चलिन्दद्यात्। ततः सव्यंकृत्वा द्विराचम्य दशारभ्याष्टशती पर्यन्तंयजुर्वेदिवत् गायत्रीं जपेत्। उपविश्य—

"उत्तरे शिखरे जाते भूम्यां पर्वतवासिनि ।
ब्रह्मणा समनुज्ञाते गच्छदेवि यथेच्छया"

इति गायत्रीं विसृजेत् । ततः—

"ओं नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजमे ।
जगत्सवित्रो शुचये, सवित्रे कर्मदायिने ।"

इति सूर्यायाञ्जलिन्दद्यात् ।

ततो भासं दशस्तोभं गायतं साम औशनं शुद्धाशुद्धीये द्वे राजन रोहिण केत्वे वृहद्रथन्तरत्वे पुरुषगतिर्महानान्यः महावैराजं महादिवाकीर्त्यःज्येष्ठसामानि त्रीणि देवव्रतानि त्रीणि पुरुषव्रते द्वे तपश्चारीयम् आदित्यव्रत सेकविंशत्यनुगानम् ।

एतानि सामानि पटित्वा पक्कादारभ्य यथाशक्ति ब्रह्मयज्ञं कुर्यात् । अस्य गोभिलकल्पस्याज्ञाने नरसिंह पुराणीयः कल्प्यः । तथा हि कुश मृत्तिना मभ्युश्य शुचौ देशे संस्थाप्य मृत्तृयेण देहं प्रक्षाल्य तद्यथा—पूर्वस्थापित मृद्भागेन पादावारभ्य नाभिपर्यन्तं वामहस्तेनैव त्रिः प्रक्षाल्य अपर मृद्भागान् दक्षिणहस्तेनैव शिरः सकृत्प्रक्षाल्य अपर मृद्भागेन दक्षिणहस्तेनैव नाभेरुद्ध्वं कन्ठादधो द्विः प्रक्षालयेत् । ततः स्नानशाटीं संशोध्य द्विराचम्य शनैर्जलं प्रविश्य वरुण मप्पतिनुत्वा बुद्ध्या हरिस्मरन् शरवदाप्लवेत्, ततस्तीरं समासाद्य कुशादिहस्तः—"ओं उपास्मैगायतांनरः पवमानायेन्दवे अभिदेवो इअक्षते । अभिते मधुनापयोथर्वाणो असिश्रयुः । सनध्यावः सुसङ्ग्वे सञ्जमाय ससवंते । सं राजभोषधीभ्यः" । इति त्र्यचेण कुशस्थ तोयेनात्मानं प्रोक्ष्य "ओं इदं विष्णुविचक्रमे त्रेधानिदयेपदम् । समूढमस्य पांसुले, त्रीणिपदा विचक्रमे विष्णुर्गोपा अदाभ्य अतोधर्माणि धारयन् । विष्णोः कर्माणि पश्यत यतो व्रतानि पस्यशे । इन्द्रस्य युज्यः सखा इति त्र्यचेन मृदा गात्राण्यालभ्य नारायणन्देवं स्मरन् जलं प्रविशेत् ।

तत ओं अधमर्षण सूक्तस्या घमर्षण ऋषिरनुष्टुप्छन्दो भाववृत्तो देवता अश्वमेधावभृथे विनियोगः । ओं ऋतञ्च सत्यंचाभीद्धा तपसो ध्यजायत । ततोरात्र्यजायत ततस्समुद्रो अर्णवस्समुद्रा दर्णवादधि । सम्वत्सरो अजायत ।

राष्ट्रिय संस्कृत संस्थान
जयपुर परिसर, जयपुर
पुस्तकालय
क्रमांक...|...64082

अहोरात्राणि विदधद्विश्वस्य मिषतोवशी। सूर्या चन्द्रमसौधाता यथापूव मकल्पयत् दिवंच पृथिवीञ्चान्तरिक्ष मथोस्वः। इति जलेनिमग्नस्त्रिरघमर्षणं जपेत्। तत उन्मज्य द्विराचम्यसन्ध्योपासनम्। तत्र—छन्दोगपरिशिष्टम्।

"अत उद्ध्वं प्रवक्ष्यामि सन्ध्योपासनिकं विधिम्।
अनर्हः कर्मणां विप्रः सन्ध्याहीनो यतः स्मृतः॥
रक्षान्ते वारिणात्मानं परिक्षिप्य समन्ततः।
शिरसो मार्जनंकुर्यात्, कुशैस्सोदक बिन्दुभिः।
प्रणवो भूर्भुवस्वश्च सावित्री च तृतीयका॥
अब्दैवत्यं रुचंचैव चतुर्थमिति मार्जनम्।
भूराद्या स्तिस्र एवैता महाव्याहृतयो व्ययाः॥
महर्जन स्तपस्सत्यं आपोज्योती रसोमृतम्"॥

ब्रह्मभूर्भुवस्स्वरिति शिरः प्रतिप्रतीकं प्रणव मुच्चारयेदन्ते च शिरसः।
"एता एतां सहानेनं तथैभिर्द्दशभिस्सह।
त्रिर्जपे दायतप्राणः प्राणायामस्स उच्यते॥
करेणोद्धृत्य सलिलं घ्राणमासज्य तत्र च।
जपेदनायतास्वर्चा त्रिस्सकृद्वाघमर्षणम्॥
उत्थायार्कं प्रतिप्रोहे त्रिः क्षिपांजलिमम्मसः।
तच्चित्र मित्र्युच द्वयेनचोप तिष्ठे दनन्तरम्॥
सन्ध्याद्वये प्युपस्थानं एतदाहुर्मनीषिणः।
मध्येत्वह्न उदये च विभ्राडा दीच्छयाजपेत्॥
तदसंसक्त पार्ष्णीर्वा एकपादार्द्ध पादपि।
कुर्यात् कृतांजलि र्वा पि उद्ध्वंवाहु रथापि वा॥

अथ—सन्ध्या प्रयोगः।

पूर्वाभिमुख ऐशान्यभिमुखो भूत्वा मध्ये पाणौकुशान् कृत्वा दक्षिणहस्तानामिकायां पवित्रं कृत्वाकुशवटुश्चे त्तदा अनामिकोर्न्द्ध पर्वणि तं धृत्वा द्धवसप्रणव गायत्रीमन्त्रेण शिखाम्वद्ध्वा सकृदाचम्य अधमर्षणसूक्तेन पुनराचमेत्, आचान्तः पुनराचमेदृतमिति स्मरणात्। प्रातर्मध्यां गायत्रीनाम्नीं रक्तां ध्यात्वा मध्याह्नसन्ध्यां सावित्रीनाम्नीं श्वेतां धृत्वा—सायंसन्ध्यां सरस्वतीनाम्नीं

कृष्णां ध्यात्वा ततः ओं प्रणवेनैकम्, ओं भूर्भुवस्स्वरिति व्याहृतित्रयेण, द्वितीयम—ओं तत्सवितुर्वरेण्यं भर्गोदेवस्यधीमहिधियोयोनः प्रचोदयात्। इति सावित्र्या तृतीयम्।

ओं आपोहिष्ठा मयोभुवस्तान ऊर्जेदधातन। महेरणाय चक्षसे, योवशिवतमोरसः—तस्यभाज़यतेहनः। उशतीरिवमातरः। तस्माअरङ्ग मामवो यस्यक्षयाय ज़िन्वथ। आपोजनयथाचनः। इत्यद्वे च तेन त्र्यचेन चतुर्थंमार्जनं कुर्यात्। ततो वारिणात्मानं परिवेष्ट्य ओं कारस्य ब्रह्मऋषिर्गायत्रीछन्दोग्निर्द्देवता सर्वकर्मारम्भे विनियोगः।

ओं सप्तव्याहृतीनां प्रजापतिऋषिर्गायत्र्युष्णि गनुष्टुब्वृहती पंक्तिस्त्रिष्टुब्जगत्यश्छन्दां स्यग्नि वाय्वादित्य वृहस्पति वरुणेन्द्रविश्वेदेवा देवता अनादिष्ट प्रायश्चित्तो प्राणायामे विनियोगः। गाथ्त्र्याविश्वामित्रऋषिर्गायत्री छन्दस्सविता देवता प्राणायामे विनियोगः ; शिरसष्प्रजापतिऋषि र्ब्रह्माग्नि वायु सूर्यादेवताः—प्राणायामे विनियोगः। इति ऋष्यादिकं स्मृत्वा प्राणायामान् कुर्यात्, तद्यथा वाम नासापुटेन शनैर्वायु माकर्षणं सन्निमीलितदृङ्मौनी नाभौचतुर्भुजं नीलोत्पलदलश्यामं विष्णुं ध्यायन् ओं भूः ओं भुर्वः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यं ओं तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि, धियो योनः प्रचोदयात्। ओं आपोज्योती रसोमृतं ब्रह्म भू र्भुवः स्वरोम्। एतत्पूरके मनसा त्रिर्जपेत्।

ततः कुम्भके हृदि ब्रह्माणं कमलासनं रक्तं चतुर्मुखं निश्चलश्वासः एतदेवमेव जपेत्। ततोरेचकेन ललाटे शिरं शुद्धस्फटिक संकासं त्रिनेत्रं ध्यायन्, दक्षिणनासापुटे शनैर्वाह्यं त्यजन् एतदेव मेव जपेत्।

ततः सूर्यश्चमेति ब्रह्मऋषिः प्रकृतिस्छन्द आपोनेवता आचमने विनियोगः। इति स्मृत्वा—ओं सूर्यश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम्। यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पदभ्या मुदरेण शिश्ना रात्रिस्तदवलुम्पतु यत्किञ्चिद्दुरितम्मयि, इदमहम्मामममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा इति प्रातः सन्ध्यायामाचमेत्। आपः पुनन्त्विति विष्णुऋषिरनुस्टुप्छन्द आपोदेवता आचमने विनियोगः। इति स्मृत्वा—ओं आपः पुन-

न्तु पृथिवीं पृथ्वीपूता पुनातुमां। पुनन्तु ब्रह्मणस्पति र्ब्रह्मपूता पुनातु मां। यदुच्छिष्ट मभोज्यं यद्वादुश्चरितम्मम। सर्वं पुनन्तु मामापो असताञ्च प्रतिग्रहं स्वाहा, इति मध्याह्ने आचमेत्।

अग्निश्चमेति रुद्रऋषिः प्रकृतिस्चन्द आपोदेवता आचमनेविनियोगः। इति स्मृत्वा—ओं अग्निश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम्, यदह्नापापमकार्षं मनसा वाचा हस्ताभ्यां पदम्यामुदरेण शिश्ना, अहस्तद वलुम्पतु यत्किञ्चिद्दुरितम्मयि इदमहम्मा ममृत योनौ सत्ये ज्योतिषि जुहोमि स्वाहा। इति सायमाचमेत्।

एतन्मन्त्रत्रयं मैत्रायणीय गृह्यपरिशिष्टोक्तम्, आचारेदर्शे श्रीदत्तोपाध्यायै र्माध्यन्दिनीयाना मप्याचमने लिखितम्। सर्वशाखा प्रत्ययमेकं कर्मेति न्यायादित्याशयेन स च न्यायः छन्दोगानामपि समान एव अन्यथा अघमर्षण सूक्तमपि छन्दोगानां प्रथमाचमने नान्वीयेतेति। अत्र च षोडशमार्जनानि शाटयायने नोक्तानि तानि च गोभिलप्रयोगेलिखितानि, न तु निर्मूलानि। नवके सामग शंखसम्वादात्, सप्तकेपि शाटयायन सम्वादात् इति। ततो अघमर्षण सूक्त जपः—छन्दोग परिशिष्टोक्त एव।

"ओं अन्तश्चरसि भूतेषु गुहायां विस्वतोमुखः।
त्वं यज्ञ स्त्वंवषट्कार, आपोज्योतीरसोमृतम्"॥

इत्याचमेत्। उपस्पशेत्ततः। "पाठान्मन्त्रेणानेन धर्मत"। इति शंखवचनात्। तत उत्थाय प्रणव व्याहृतित्रयसहितया गायत्र्या प्रत्यकमञ्जलिं क्षिपेत्।

उत्थायार्कं प्रति प्रोहे त्रिके नाञ्जलि मम्भसः।
प्रणवो भूर्भुवःश्वश्च सावित्री च तृतीयकेति॥

उदुत्यमिति प्रस्करणऋषिर्गायत्रीछन्द स्सूर्यो देवता सूर्योपस्थाने विनियोगः। ओं उदुत्यं जातवेदसं देवं वहन्तिकेतवः। दृशे विश्वाय सूर्यम्। चित्रमिति कुत्स आङ्गिरस ऋषिस्त्रिष्टुप्छन्दः सूर्यो देवता सूर्योपस्थाने विनियोगः। ओं चित्रन्देवाना मुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः आप्राद्यावापृथिवी अन्तरिक्षं सूर्यआत्मा जगतस्तस्थुषश्च। सन्ध्याद्वयेपीद मुपस्थानम्।

मध्याह्न सन्ध्याया न्तु आयङ्गौ रित्यादिमन्त्र चतुष्टय मधिकम् । उदुत्य ञ्चित्र मायङ्गौरपत्ये तरणिरुद्या मेधाभिस्त्रि च सवितुरुपस्थानमिति गोभिल वचनात् । प्रातस्सायं सन्ध्ययो स्तु उदुत्य ञ्चित्र मृग्द्वयेनैव उपस्थानम्, तञ्चित्र मित्यभिधाय सन्ध्याद्वये प्युपस्थानमेतदिति छन्दोगपरिशिष्टे नियमात् ।

यथा—आयङ्गौरिति सर्पिराज्ञीऋषि र्गायत्रीछन्दः सूर्योदेवता सूर्योपस्थाने विनियोगः । ओं आयङ्गौः पृष्णिरक्रमी दशतन्मातरं पुरः पितरञ्च प्रत्यत्नसुः । अपत्य इति इन्द्रऋषि र्गायत्रीछन्दः सूर्योदेवता सूर्योपस्थाने विनियोगः । ओं अपत्येतायवो यथा नक्षत्राय त्यक्तुभः सूराय विश्वचक्षसे । तरणिरिति इन्द्रऋषि र्गायत्रीछन्दः सूर्योदेवता सूर्योपस्थाने विनियोगः । ओं उद्या मेषिरजः पृथ्वहा मिमानोक्तुभिः, पश्यं जन्मानि सूर्य इत्याभिः ऋग्भिः कृताञ्जलिरुद्ध्वंबाहुर्भूम्यलग्नश्चके तलभागोभूमिलग्नैकचरणो वा सूर्यं मुपतिष्ठेत् ।

ततो ब्रह्मयज्ञः ।

सचाधीतेन वेदेन करणीयः । तदभावेपि स्तोत्रादिनापि नित्यत्वात् । तर्पण न्तु छन्दोगपरिशिष्टे स्थानमनारभ्याधीतम्, तत्तत्प्रयोगपर्यालोचनया माध्यन्दिन्यां नान्वेति, प्रयोगवैलक्षण्यादेव गोभिले नान्तर्निविशते । तस्मात्तर्पणम्भिन्नमेव । तेन नरसिह पुराणीय स्थानकल्पे तदान्वेतु मर्हति--तच्चेत्थं—

"यवाद्भि स्तर्पये द्देवान्, सतिलाद्भिः पितृनपि ।
नमोन्ते तर्पयामीति आदावोमिति च ब्रुवन् ।"

ब्रह्माणं विष्णुं रुद्रं प्रजापतिं वेदां श्छन्दांसिदेवान् ऋषीन् पुराणाचार्यान् गन्धर्वान्, इतराचार्यान्, सम्वत्सरं सावयवं देवीरप्सरसो, देवान्नागान्, सागरान् पर्वतान् नदान् सवितो देवान् मनुष्यान् नक्षत्रान् रक्षांसि सुपर्णान् पिशाचान् पृथिवीं औषधीः पशून् वनस्पतीन् भूतग्राम चतुर्विधमित्युपवीती ।

अथ-प्राचीनावीती प्रत्येक मञ्जलित्रयेण यमं यमपुरुषान् कव्यवालं नलंसोमं यममर्यमणन्तथा । अग्निष्वात्तान्सोमपान् वर्हिषदो स्वाहान् पितृन

मातामहानिति प्रतिपुरुषं समभ्यसेत्, ज्येष्ठभ्रातृ पितृव्य श्वशर मतुलाश्च पितृवंश मातृवंशाये चान्ये मत्त उदक मिच्छन्ति तान् तर्पयामीति अवसानाञ्जलिः । नामान्तइति ।

तेन—ओं ब्रह्माण न्तर्पयामीत्यादिरूपः प्रयोगस्सिद्धयति । एवं सम्वत्सरस्यसावयवस्य देवतात्वम् । तथा भूतस्य ग्रामस्यचतुर्विध्यस्य देवतात्वं तेन तान् त्रिशतं देवविधिना तर्पयेत् । ततः प्राचीनावीतीना प्रत्येक मञ्जलित्रयेण ओं यमस्तर्पयामि । ओं यमपुरुषस्तर्पयामि । एवं कव्यवालं नलं सोमं यममर्यमणं अग्निष्वात्तान् सोमपान् वर्हिषदः श्राद्धे नैकाञ्जलिना । अथ स्वान् पितृन् मातामहान् प्रत्येक मञ्जलित्रयेण तर्पयेत् । ततो मात्रादयस्तिस्रो मातामह्यादयस्तिस्रो प्रत्येकमेकैकेनाञ्जलिना तर्पयेत् । षट्पुरुषतर्पणानन्तरं तत्पत्न्यश्चेति ।

ओं छन्दांसि तर्पयामि ओं देवांस्तर्पयामि ओं ऋषींस्तर्पयामि ओं पुराणाचार्या स्तर्पयामि ओं गन्धर्वास्तर्पयामि, ओं सम्वत्सरं सावयवं तर्पयामि ओं अप्सरसस्तर्पयामि ओं देवानुगां स्तर्पयामि ओंनागां स्तर्पयामि ओं सागरा स्तर्पयामि ओं पर्वता स्तर्पयामि ओं नदांस्तर्पयामि ओं सरित स्तर्पयामि ओं देवान् मनुष्यां स्तर्पयामि ओं इतरान् मनुष्यां स्तर्पयामि ओं यक्षा स्तर्पयामि ओं रक्षांसि तर्पयामि ओं सुपर्णा स्तर्पयामि ओं पिशाचा स्तर्पयामि ओं पृथिवीन्तर्पयामि ओं औषधी स्तर्पयामि ओं पशूं स्तर्पयामि ओं वनस्पतिं स्तर्पयामि ओं भूतग्रामं चतुर्विधं तर्पयामि । इति प्रत्येकंवामान्वारब्ध दक्षिण करेण देवविधिनासकृत् सकृत् तर्पयेत् । ततः प्राचीनावीतिना प्रत्येकं अञ्जलित्रयेणतिलोदकेन तर्पयेत् । ओं यमस्तर्पयामि, ओं यमपुरुषा स्तर्पयामि ओं कव्यवाहनंतर्पयामि ओं नलन्तर्पयामि ओं सोमं तर्पयामि ओं अर्यमणं तर्पयामि ओं अग्निष्वात्तास्तर्पयामि ओं सोमपा स्तर्पयामि ओं वर्हिषदस्तर्पयामि । ओं अद्यामुकगोत्र पितरमुकशर्माणं तर्पयामि ओं अद्यामुकगोत्र पितामहममुक शर्माणं तर्पयामि ओं अद्यामुकगोत्रं प्रपितामहं अमुक शर्माणं तर्पयामि ।

ओं अद्यामुकगोत्रं मातामह ममुकशर्माणं तर्पयामि ओं अद्यामुकगोत्र प्रमातामहममुकशर्माणं तर्पयामि ओं अद्यामुकगोत्रं वृद्धप्रमायामह ममुमशर्माण तर्पयामि । ततः एकैकेनाञ्चलिना ओं अद्यामुकगोत्रां मातरमुमदेवीं तर्पयामि ।

ओं अद्यामुकगोत्रां पितामहीममुकदेवीं तर्पयामि ओं अद्यामुकगोत्रां प्रपितामहीममुकदेवीन्तर्पयामि ओं अद्यामुकगोत्रां मातामहीममुकदेवीं तर्पयामि अद्यामुकगोत्रां प्रमात।महीं अमुकदेवीं नर्पयामि ओं अद्यामुकगोत्रां वृद्धप्रमातामहीं तर्पयामि ।

ततो ज्येष्ठभ्रातरं, पितृव्यंश्वशुरं मातुलं सपिण्डं मातृवंशञ्च, अमुकं तर्पयामीत्येवं तर्पयेत् । तत ओं येचास्माक मुदकमिच्छन्ति तां स्तर्पयामि इति शेषमञ्जलिन्दद्यात् । तत उत्तीर्य जलापनोदार्थ मुष्णीषीभूत्वा रक्तोत्थेन नीलमनाक्तदशाहीन जीर्णवर्जं स्त्रीशूद्र भिन्नेन धौतेवाससीशुक्ले परिधाय उरुजंघे चरणौ करौ मृद्वारिभ्यां त्रिस्त्रिः प्रक्षाल्य द्विराचम्यापसव्यंकृत्वा स्नानशाटींप्रक्षाल्य दक्षिणाग्र कुशत्रयोपरि स्थले वामावर्त्तेन स्नान शाटीं गालयित्वा ओं येचास्मांकं कुलेजाता अपुत्रा गोत्रिणो मृताः तेपिवन्तु मयादत्तं वस्त्रनिष्पीड़नोदकम् ।

इति मन्त्रेण तज्जलं सतिल मोटकेन दद्यात् ।

तत स्सव्येनाचम्य उत्थाय —

"ओं आगच्छवरदेदेवित्र्यक्षरे ब्रह्मवादिनि गायत्रीछन्दसा म्मातर्जपेमे सन्निधीभव" ।

इति गायत्री मावाह्य—ओं कारस्य ब्रह्मऋषिर्गायत्रीछन्दोग्निर्द्देवता सर्वकर्मारम्भे विनियोगः । ओं भूर्भुवः स्वरित्यस्य प्रजापतिऋषिर्गायत्र्युष्णिगनुष्टुप्छन्दां स्यग्निवाय्वादित्यदेवता जपेविनियोगः ।

गायत्र्या विश्वामित्रऋषि र्गायत्री छन्दः सवितादेवता जपेविनियोगः । ततः श्वेतवस्त्रां कौशेयवसनां श्वेतविलेपन पुष्पालङ्कारयुतां अक्षसूत्रधरां पद्मासनयुताम् आदित्यमण्डलाग्नां ब्रह्मलोकगतां वा गायत्रीं ध्यात्वा दशवारारभ्याष्टशती पर्यन्तं जपेत् ।

"ओं नमो विवश्वते ब्रह्मन् भास्वते विष्णुतेजसे ।
जगत्सवित्रे शुचये सवित्रे कर्मदायिने" ॥

इति सूर्यायार्घंदद्यात्। ओं जलदेवताभ्योनम इति तान्नमस्कृत्य गृहं गच्छेदिति।

अथ नरसिंहपुराणीय स्नानानन्तरं छन्दोगपरिशिष्टोक्तरीत्या सन्ध्यावन्दनं कृत्वा, विष्णुपुराणोक्तेन तर्पणं कार्यम्, तद्यथा। ओं देवास्तृप्यन्तामिति त्रिः ओं ऋषयस्तृप्यन्तामिति त्रिः, ओं प्रजापतिस्तृप्यतामिति सकृत् यवाद्भिस्तर्पयेत्। ततो ऽपसव्येन पितृतर्पण मारभ्य पूर्ववत्।

यद्वा—सर्ववर्ण सर्वशाखि साधारणेन पद्मपुराणीयकल्पेन स्नानम्। छन्दोगपरिशिष्टरीत्या सन्ध्यावन्दनम्। पद्मपुराणोक्तरीत्या तर्पणम्। वस्त्रनिष्पीडनादि पूर्ववत्।

अथ देवपूजा। तत्र सूर्यपूजा मन्त्रः।

"वृह्महां असि सूर्यवडादित्यमहां असि महस्तेसतोमहि
सापनिष्ट मा मह्नादेवमहां असि"।

इति मन्त्रेण सूर्यं पूजयेत्। अथाग्निपूजा मन्त्रः।

"ओं अग्निन्दूतं वृणीमहे होतारं विश्ववेदसम्।
अस्य यज्ञस्य सूक्तत्वम्"। इतिमन्त्रेणाग्निपूजयेत्। ओं आभूनिन्द्रक्षुमन्त्रं चित्रं ग्रामं संगृमाय। महाहस्ती दक्षिणेन"। इति मन्त्रेण गणपतिं पूजयेत्। ओं जातवेदसे सुनवामसोमं मरातीयतो मिदहातिवेदः सनः पर्षदति दुर्गाणि विश्वानावेव सिन्धुन्दुरितात्यग्निः। इतिमन्त्रेण दुर्गां पूजयेत्। ओं आवोराजा नमध्वरस्यरुद्रं होतारं सत्यजं रोदस्योः अग्निं पुरातनयितनो रजताद्धिरण्यरुप मवमे कृणध्वम्। इतिमन्त्रेण शिवं पूजयेत्।

"ओं इदं विष्णुर्विचक्रमे त्रेधानिदधेपदम्। समूढमस्य पांशुले"।

इतिमन्त्रेण विष्णुं पूजयेत्। देवपूजायाञ्च यद्दुग्धादिकं प्रशस्तं यद्वा निषिद्धम् याचेतिकर्त्तव्यता तत्सर्वं ययुर्वेदि देवपूजाया मनुसन्धनीयम्।

अथ, निरग्नि छन्दोगानां वैश्वदेववलिकर्मणी छन्दोगपरिशिष्टे।

"अग्न्यादि गोतमेनोक्तो होमः शाकल एवच।
अनाहिताग्नेरपि एष युज्यते वलिभिस्सह"॥

अस्यार्थः । अग्निः—धन्वन्तरिः विश्वेदेवाः—प्रजापतिः । स्विष्टकृत् होमः—शाकलः । कव्ये सकलसाध्यो ज्योतिष्टोमे प्रसिद्धः स्विष्टकृत्, पूर्वोक्तोपि शाकलहोमानन्तरन्द्रष्टव्यः । शेषे स्वष्टकृदन्य दाज्याविरिति कात्यायनोक्तः । एतास्त्रयोदशाहुतयो—वैश्वदेवहोमः । तदयं प्रयोगः । क्वचित्पात्रे पानीयं कृत्वा पात्रान्तरे वैश्वदेवान्नमादाय ओं अग्नये स्वाहा, ओं धन्वन्तरये स्वाहा, ओं विश्वेभ्योदेवेभ्यस्स्वाहा, ओं प्रजापतये स्वाहा, ओं देवकृतस्यै नमोव यजनमसि स्वाहा । ओं पितृकृतस्यै नमोव यजनमसि स्वाहा । ओं मनुष्य कृतस्यै नमोव यजनमसि स्वाहा ।

ओं यद्दिवाच नक्तञ्चनश्चैनञ्च कृतमतस्यावथजनमसि स्वाहा । यत्सुचान्तश्च जाग्रतश्चैनश्च कृतमस्याव यजनमसि स्वाहा । ओं यद्विद्वांसश्चाविद्वांस श्चैनश्च कुतमस्याव यजनमसि स्वाहा । ओं नस्नोव यजनमसि स्वाहा । ओं अग्नये स्विष्टकृते स्वाहा । इति वैश्वदेवहोमः ।

अथान्नान्तर मादाय स्नान परिमार्जन वलिदानवत्युपरि जलदान एषक्रमः । सर्ववलौ ।

अथ वलि विन्यासः ।

तत्र —छन्दोग परिशिष्टे बृद्धिपिण्डानि वोत्तरां श्चतुरोवलीन्निदध्यात् । पृथिव्यै वायवे विश्वेभ्यो देवेभ्यः प्रजापतय इति एते सिच्यत एकैकस्यैकैकं अद्भ्यः औषधि वनस्पतेभ्यः एणकालाय कालाय एषामपि उत्तरे इन्द्राय वासुकये ब्रह्मण एषामप्युत्तरः रक्षोजलेभ्य इति ।

अथ सर्वेषां दक्षिणतः पितृभ्य इति चतुर्द्दश चैते नित्याः । सर्वेषामुभयतो द्विः परिषेकः । पिण्डवच्च पश्मिा प्रतिपत्तिरिति उभयत इति स्थानं परिषिच्य, वलिन्दत्वा वलेरुपरि परिषेकः कार्यः ।

तदित्थं वलि प्रयोगः ।

ओं पृथिव्यैनमः, ओं वायवेनमः, ओं विश्वेभ्यो देवेभ्योनमः, ओं प्रजापतयेनमः इति यथापूर्वञ्च चरोवलिन्दद्यात् । एतत्पंक्तेरुत्तरदिशि, ओं

अद्भ्योनमः, ओं ओषधिवनस्पतिभ्योनमः। ओं आकाशायनमः, ओं कालायनमः इति प्रथम पंक्तिवद्द्वितीय पंक्तिकुर्यात्, तत अस्याप्युत्तरतः ओं मन्यवेनमः, ओं इन्द्रायनमः, ओं वासुकयेनमः, ओं ब्रह्मणेनमः इति तृतीय पंक्ति कुर्यात्।

तत अस्याप्युत्तरतः ओं रक्षोजनेभ्योनम इत्येकं वलिन्दद्यात्, ततः पितृरीत्या ओं पितृभ्यः स्वधा इति सर्वेषां दक्षिणतः पितृवलिन्दद्यात्, ततः पिण्डवत् सर्वान् वलीन् प्रतिपादयेत्। इति वलिप्रयोगः।

एवं वलितन्त्रं विधाय, अन्नान्तरमादाय, देवामनुष्या इतितः काम्य वलितन्त्रं कुर्वीत। नचोक्ताश्चतुर्द्दश वलयस्मत्यधिकारिका इति वाच्यम्, अग्निव्यभिचारित्वात्। न च गोतमकल्पान्तर्गतत्वादवरोधविरोधो युज्यते वलिभिस्सहेत्यनेन अनयो वैश्वदेववलितन्त्रयो निरग्नावन्वयविधानात्—वर्हिस्तृणाति वर्हिरासादयतीतिवत् विनियुक्त बिनियोगविरोधस्यापि निरासादिति।

अथ अमावास्यादौ पार्वणं लिख्यते।

"शंखचक्रधरं विष्णुं द्विभुजं पीतवाससम्।
प्रारम्भे कर्मणम्विप्रः पुण्डरीकं स्मरेद्धरिम्"॥

इति वचनात् श्राद्धादेरादौ—पुण्डरीकाक्षः शंखचक्रधरं विष्णुं द्विभुजं पीतवाससं कौशेय धौतोत्तरीयधारी स्मर्त्तव्यः। तम्मेरणफलं गरुडपुराणे कथितम्। ओं अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोपिवा यः स्मरेत्पुण्डरीकाक्षं स वाह्याभ्यन्तरः शुचिरिति श्लोकेन।

वायुपुराणे।

"नाप्रोक्षितं स्पृशेत्किञ्चिद्दैवेपित्रे च कर्मणि।
उत्तरेणाहरेद्द्रव्या दक्षिणेन वि] निर्द्दिशेत्] सर्जयेत्"॥

स्पृशेत्—स्पर्शयेत् दद्यादित्यर्थः। तथा च स्व प्रक्षालित पाणिपादः पीठं त्यक्त्वा चुलुकत्रय माचम्य श्रोत्रवन्दनादिकृत्वा पुनश्चुलुक त्रय माचम्यश्रोत्रव-

न्दनादि विधाय श्राद्धदेशमागत्योपविश्यप्राङमुखः कुशत्रयोदकेन यथोक्तं पुण्डरीकाक्षं मनसाचिन्तयेत्, ततः श्राद्धीय द्रव्याणि सिञ्चेत्। आचारात् पुण्डरीकाक्ष इति शब्दमभिधाय श्राद्धीय द्रव्याणि सिञ्चेदिति केचित्।

तत ओं अद्य वैशाखामावास्यायां तिथौ पार्वणमहङ्करिष्ये, इति सङ्कल्प्य ततः परकीय भूमौ अपसव्येन ओं इदमन्नमेतद्भूस्वामि पितृभ्योनम इति मोटकतिलजलैर्द्द्यात्। प्रणव व्याहृतित्रय सहितां प्रणवान्तां गायत्रीन्त्रिर्जपेत्। ओं देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वधायै स्वाहायै नित्यमेव भवन्त्विति त्रिः पठेत्। तत उत्तराभिमुखः ओं अद्य विश्वेदेवा इदमासनम्वो नमः, पुनः ओं अद्य विश्वदेवा इदमासनं वो नमः कुशत्रययव जलैर्द्द्यात्। ततोपसव्येन दक्षिणामुखः, ओं अद्यामुकगोत्रपितरमुकशर्मन्निदमासनन्ते स्वधा इति द्विभग्न कुशत्रय तिल जलैर्द्द्यात्।

एवं—पितामहादिभ्यः, ततः सव्येन उत्तराभिमुखः ओं विश्वेदेवा स आगतश्चरेताम इमं हवं, एदं वर्हिन्निषीदत। ओं यवोसियवया स्मद्द्वेषो यवयारातिः इति यवान्विकीर्य, ओं विश्वेदेवाः श्रृण्वेतेम हवम्मे ये अन्तरीक्षेय उपद्यविष्ठ। ये अग्नि जिह्वा उतवायजता, आसद्यास्मिन्वर्हिषि मादयध्वम् ओषधयस्समवदन्तु सोमेनसहराज्ञा। यस्मैकृणोति ब्राह्मणस्तं राजन् पारयामसि।

"ओं आगच्छन्तु महाभागा विश्वेदेवा महावलाः। ये यत्र योजिताः श्राद्धे सावधाना भवन्तु ते"। ततोपसव्येन दक्षिणामुखः, ओं उशन्तस्त्वा निधीमह्यु शन्तस्समधीमहि। उशन्तशत आवहपितृन् हविष्ये अत्तवे। एत पितरः सोम्यासोगम्भीरेभिः पथिभिः पूर्वणेभिः।

दत्तासमभ्यं द्रविणेह भद्रं रयिञ्चन रसर्वं वीरंनियच्छत। ओं आयन्तुनः पितरः सोम्यासो ऽग्निष्वात्ताः पथिभिर्देव यानैः। अस्मिन्यज्ञे स्वधयामदन्तोधि ब्रुवन्तुतेवन्त्वस्मान्। इत्यावाह्य। ओं अपहता असुरा रक्षांसि वे दिषदः इति जपन् भूमौ वामावर्त्तेन तिलान्विकिरेत्।

ततः सव्येन देवार्घ्यो रपसव्येन पित्राद्यर्घेष्वपि दर्भपिञ्जलीद्धृत्वा सव्येन

ओं शन्नोदेवी रभिष्टये शन्नो भवन्तु पीतये शंयोरभिस्रवन्तुनः। इतिपठित्वा पितृदेवार्घे जलम्, पुनः—पठित्वा अपर देवार्घे जलम्, ततोपसव्येन इदमेव पठित्वा पित्र्यर्घे जलम्।

एवमेव पितामहार्घ पंचकेषु तिलान्दद्यात्। ततः सव्येन देवार्घयो स्तूष्णीं गन्धान्दत्वा अपसव्येन पित्राद्यर्घेषु तूष्णीं गन्धान् दत्वा सव्येन देवार्घयोः प्रत्येकं पुष्पाणिदत्त्वा अपसव्येन पित्राद्यर्घेषु प्रत्येकं पूष्पाणि दद्यात्। ततः सव्येन पित्रादिदेवर्पिजलि पूर्वाग्रां तत्पात्रेष्टत्वात्, ततोदकान्तरन्दत्वा—ओं यादिव्या आपः पयसा सं वभूवूर्या आन्तरीक्षा उत्पार्थिवीर्याः हिरण्यवर्णा-यक्षियास्तान आपः शिवाः शं स्योना सुहवाभवन्तु इति पठित्वा—ओं अद्य-विश्वेदेवा इदमर्घ्यं वो नमः। एवमेव मातामहादित्रिकविश्वेदेवार्घमपि दद्यात्। अनयोश्चार्घयोर्न्न स्थापनं नवा उत्तोलनं ततोपसव्येन पित्रर्घपिंजली पितृपात्रे निधाय तत्रोदकान्तरन्दत्वा, ओं यादिव्या इत्यादि पठित्वा, ओं अद्यामुकगोत्र पितरमुकशर्मन्निदन्तेर्घ्यं ये चात्र त्वानु यांश्च त्वमनु तस्मै ते स्वधा इति मोटक तिलजलै रुत्सृज्य किञ्चिदर्घंजलं पवित्रोपरि दद्यात्। ततः पवित्र मर्घपात्रोपरि धारयेत्।

एवमेव पितामहार्घ पञ्चकमिति, ततः पितामहार्घजलपुष्प पवित्राणि पित्रर्घे निधाय प्रपितामहार्घ जल पुष्प पवित्राण्यपि पित्रर्घे निधाय प्रपितामहार्घ जल पुष्प पवित्राण्यपि पित्रर्घे निदध्यात्। एवमेव मातामहार्घे प्रमातामहार्घ जलादीनि, ततो बृद्धप्रमातामहार्घजलादीनि च निधाय, पित्रासन पश्चिमे पितृ-भ्यस्थानमसीति पित्रर्घं न्यूब्जीकुर्यात्, तत स्तदुपरि तुष्णीं पितामहार्घं न्यूब्जी कुर्यात्, तदुपरि तुष्णीं प्रपितामहार्घं न्यूब्जी कुर्यात्।

ततो मातामहासन पश्चिमे मातामहार्घपात्रं ओं पितृभ्यस्थानमसीति न्यूब्जी कुर्यात्, तदुपरि तुष्णीं प्रमातामहार्घं तदुपरि तुष्ण बृद्धप्रमातामहार्घ-ञ्च न्यूब्जी कुर्यात्। ततः सव्येन ओं अद्य विश्वेदेवा एतानि गन्धपुष्प धूप दीप ताम्बूल यज्ञोपवीताच्छादनानि वो नमः। कुशत्रय यव जलै रुत्तराभि मुखो दद्यात्। एवं मातामहादि विश्वेदेवेभ्योपि ततोपसव्येन दक्षिणामुखः ओं अद्यामुकगोत्र पितरमुकशर्म्मन्नेतानिगन्ध पुष्प धूप दीप ताम्बूल यज्ञोपवी

ताच्छादनानि ये चात्र त्वानुयांश्च त्वमनु तस्मै ते स्वधा। इति मोटक तिल जलैर्द्द्यात्।

एवमेव पितामहादि पञ्चभ्योपि। ततस्यव्येन देवयो रपसव्येन पितृणां मण्डलं कृत्वा सव्येन प्राङ्मुखो जले ओं स्वाहा इति घृताक्तमन्नं हुत्वा सोमाय पितृमते इति पठेत्। ततः ओं स्वाहा इति हुत्वा अग्नये कव्यवाहनाये तिपठेत्। आहुतिश्चेयं द्वादशपूरिका अङ्गुष्ठेन पूरणीया, अङ्गुल्यग्रेण त्याज्या, ततो हुतशेषं सव्येन देवयो रपसव्येन पितृणां पात्रेषु दत्वा सव्यञ्जन मन्नं सव्येन पित्रादि देवे तथैव, देवान्तरेण परिविष्य, अपसव्येन पितृपात्रे सव्य-ञ्जनमन्नं पितृध्यानपूर्वं परिविष्य तथैव पितामहादि पंचभ्योपि परिविष्यात्।

परिवेषणंच अन्नादिपूरितं पात्रं पाणिभ्यामादाय पितृपात्र समीपे मनाक् धृत्वा दक्षिणहस्तेन वामान्वारब्धेन पात्रेऽन्नं क्षिपेदिति प्रकारः। व्यंजनेष्ये-वम्। ततस्सव्येन देवान्नयो रपसव्येन पित्राद्यन्नेषु घृतंदत्वा- तथैव देवे यवान् पित्रन्नेषु तिलान् दत्वा—तथैव च सर्वत्र मधु दद्यात्। ततस्सव्येन देवान्नं स्पृष्ट्वा, ओं मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः माध्ध्वीणः सन्तोषधीः मधुनक्तमुनोषसो मधुमत्पार्थिवं रजः, मधुद्यौरस्तुनः पिता, मधुवान्नो वनष्प-स्पतिर्म्मधुमां अस्तु सूर्यः माध्वीर्गावो भवन्तु नः इति मन्त्रं पठेत्।

एवमेव मातामहादि देवेन्ने अपसव्येन पित्राद्यन्नं स्पष्ट्वा, ओं मधुवा-तेति प्रत्यन्नं पठेत। तत उत्तराभिमुखः सव्येन ऋजूतान्, हस्ताभ्यां पित्रादि' देवान्नपात्रमालम्य—ओं पृथ्वीते पात्रं द्यौः पिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा। ओं इदं विष्णुर्विचक्रमे त्रेधानिदधे पदं समूढमस्य पांसुले। ओं विष्णो हव्यं रक्ष इति पठित्वा इदमन्न मित्यन्ने। ओं इमाआप इति जले ओं इदं हविः इदं सर्वंवस्त्वभिप्रायेण।

घृते दक्षिणाङ्गुष्ठं स्वीय माचारात्संयोज्य ओं अद्य विस्वेदेवा इदमन्नं सोपकरणम्वो नमः इति कुशत्रय यव जलैरुत्सृजेत्। एवं मातामहादि विस्व-देवान्नमपि दद्यात्। ततोपसव्येम दक्षिणामुखो व्यत्यस्तानुत्तानपाणिभ्यां पितृपात्रमालम्य ओं पृथ्वीत इति, ओं इदं विष्णुरिति च जपित्वा ओं विष्णो कव्यं रक्ष इति पठित्वा पूर्वंपदभादावङ्गुष्ठन्निवेश्य, ओं अद्यामुक गोत्र पितर-

मुक शर्मन्निदमन्नं सोपकरणन्ते स्वधा, इति मोटक तिल जलैरुत्सृजेत्। एवं पितामहादिभ्योपि पंचभ्यः। यदिचान्नपात्रं नाना तदा पृथ्वीत इति मन्त्रोपि तावद्वारं पठनीयः एकंचेत्तदैकदेव, द्वयञ्चे त्तदा द्विः ततस्त्रिर्गायत्रीं मधुवाता इति त्र्यचम्। ओं मधुमधु मध्विति च ततः—ओं अन्नहीनं क्रियाहीनं विधिहीनंच यद्भवेत्। तत्सर्वं मच्छिद्र मस्त्विवति च।

ततः सकृद्गायत्रीं जपित्वा कुशेषूपविश्यमधुवातेति ऋकत्रयं ओं मधुमधुमध्वीति च जपेत्। ततः कृणुष्वपाज इत्यादिको रक्षोघ्नो मन्त्रो जपनीयः। ततस्तिलविकरणं तत—उदीरतादि मन्त्रपाठः। ततो विष्णुसंहिता रुद्रसंहिता तदज्ञाने पुरुषसूक्तं रुद्राध्यायो वा। तत आशुः शिशान इत्यादिक मप्रतिरथं तत—ओं नमस्तुभ्यं विरुपाक्षनमस्ते नैक चक्षुषे। नमष्पिनाकहस्ताय वज्रहस्ताय वैनमः।

ओं सप्तव्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ। चक्रवाकाः शरद्वीपे हंसास्सरसिमानसे। तेपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः। प्रस्थिता दूरमध्वानं यूयन्तेभ्यो वसीदथ ओं रुची रुची रुचिः। तत उच्छिष्ट सन्निधा वा स्तृतकुशत्रयांभूमिं प्रोक्ष्य सर्वान्न मेकत्रकृत्वा अन्नीयजले नाप्लाव्य—ओं अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुलेमम। भूमौदत्तेन तृप्यन्तु तृप्तायान्तु पराङ्गतिः। इतिपठन् पितृतीर्थेन विकिरेत्। ततस्सव्येन चुलुकत्रय माचम्य हरिंस्मृत्वा ऽपसव्येन त्रिर्गायत्रीं मधुमतीः मधुमधुमध्वीति च जपित्वा वेदिद्वयमन्नदानदेशा दीशानकोणे निर्मायावसिष्ट वामेनपाणिना दर्भपिञ्जली मादाय दक्षिणेहस्ते धृत्वा मूलेन वामान्वारब्ध दक्षिणकरेण ओं अपहता ऽसुरा रक्षांसि वेदिषद इतिमन्त्रेणपितृवेद्यां दक्षिणाग्रां रेखां मध्येकुर्यात्। पिञ्जलीं वेद्युत्तरतः क्षिपेत्।

एवं—मातामह वेद्यामपि ततो रेखाद्वयोपरि उपमूल सकृत्तुलान् वद्धहस्त मुष्टिप्रमाणान् प्रत्येकं वहुन् कुशान् स्तृणुयात्। ततस्सव्येन देवताभ्यइति त्रिर्जपेत्। ततोपसव्येन एत पितर इतिमन्त्रंपठित्वा षट्सु पात्रेषु जलं तिलान् चन्दनं पुष्पाणि च तूष्णीं प्रदाय तत्पात्रं वाहस्तेनोद्धृत्य ओं अद्यामुकगोत्र पितरमुक शर्मन्नत्रावने निक्ष्व ये चात्रत्वानु यांश्च त्वमनु तस्मै ते स्वधा इत्यु-

त्सृज्य। दक्षिणहस्तेनादाय वामान्वारब्ध दक्षिणहस्तेनकुशमूलदेशे ऽवनेजनं दद्यात्। ततो जलस्पृशेत्।

एवमेव दर्भमध्ये पितामहाय दत्वा जलं स्पृशेत् दर्भाग्रे बृद्धप्रमातामहाय दत्वा जलं स्पृशेत्। ततः सर्वस्मादेव श्राद्धशेषान्नानुद्धृत्य मध्ये ऽवनेजनं दत्वा जलं स्पृशेत्। मधुघृत तिल जलानि प्रक्षिप्य विल्वपरिमाणान्त्रीन् साङ्गुष्ठ वद्ध मुष्टिप्रमाणां स्त्रीन् पिण्डान्निर्माय षण्णामप्युपरि घृत मधु तिल जलानि-दत्वा आद्य त्रिकादेक मादाय, ओं अद्यामुकगोत्र पितरमुकशर्मन्नेष ते पिण्डो ये चात्र त्वानुयांश्च त्वमनु तस्मै ते स्वधा इति वामान्वारब्ध दक्षिणकरेण पित्र-वनेजनस्थानेपि पिण्डंदत्वा जलं स्पृशेत्।

एवमेव कुशमध्ये पितामहाय दत्वा जलं स्पृशेत्। ततो दर्भाग्रे एवमेव प्रपितामहाय दत्वा जलं स्पृशेत्। ततोयद्यन्तरे कुशमूल मध्याग्रेषु पूर्ववत्, लघुपिण्डं यथाक्रमं मातामहादिभ्यो दद्यात्। त्रिष्वपि जलस्पर्शनम्।

ततोतिबृद्धमातामहादीनां त्रयाणां तृप्तिमुद्दिश्य पित्रादिक पिण्डास्त-रणकुशत्रयमूले करं प्रोक्ष्य मध्यं कृत्वा प्रत्येकं चुलुकत्रयात्मकानि त्रीण्याचम-नानि कृत्वा हरिं स्मृत्वा अपसव्यं कृत्वा पिण्डपात्रं प्रक्षाल्य तज्जलं षट्सु पात्रेषु निधाय तत्र तिल चन्दन पुष्पाणि च क्रमेण दत्वा प्रथमपात्रं वामहस्ते नादाय ओं अद्यामुकगोत्र पितरमुक शर्मन्नत्र प्रत्यवने निक्ष्व ये चात्र त्वानु यांश्च त्वमनु तस्मै ते स्वधा। इति पिण्डोपरि पित्रे प्रत्यवनेजनं दत्वा जलं स्पृशेत्। एवम् तत्पिण्डोपरि पितामहादिभ्यः पञ्चभ्योपि,प्रत्यवने जनं दद्यात्। सर्वत्र च दानानन्तरं जलस्पर्शः। तत ओं अत्र पितरो मादयध्वं यथामाग मा वृषा-यध्वं इति पठित्वा, वामावर्त्ते नोदङ्मुखीमनाक् श्वासं निरस्य तेनैव पथा परा-वर्त्तमानः पितृन् तुष्टान् मास्वर मुर्त्तीन् ध्यायन् ओं अमीमदन्त पितरो यथा-भाग मावृषाइषत् इति जपेत्।

ततो दक्षिणहस्ते नीवीं विश्रंस्य सव्येन हस्तं प्रक्षाल्य हरिं स्मृत्वा अवस-व्येन वामेनपाणिना उद्धृतं सूत्रं दक्षिणेनादाय ओं एतद्वः पितरोवास इति पठित्वा, पितृ पिण्डे, एवमेव पितामहादि पिण्डपञ्चकेपि मन्त्रेण वामान्वा-रब्ध दक्षिणकरेण सूत्रं निधाय ओं अद्यामुकगोत्र पितरमुकशर्मन्ने तत्ते वासो

ये चात्र त्वानुयांश्च त्वमनु तस्मैते स्वधा, इति सूत्र मुत्सृजेत्। ततो जलं स्पृशेत्।

एवमेव पितामहादिभ्यो प्युत्सृजेत्। काण्डानु समयेन वा सर्वत्र चोत्सर्गानन्तरं जलस्पर्शः। ततस्तूष्णीमेव तत्तत्पिण्डेषु पितरं पितामहादिकञ्चोद्दिश्य गन्धपुष्प धूपदीप ताम्बूलानि क्रमेण दद्यात्। तत—ओं बसन्ताय नमस्तुभ्यं ग्रीष्माय च नमोनमः। वर्षाभ्यश्च सरत्संज्ञ ऋतवे च नमस्सदा। हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च। मास सम्वत्सरेभ्यश्च दिवसेभ्यो नमस्सदा। इतिपठित्वा पिण्डान् पितॄन् षड्तरुपतया नमस्कुर्यात्। ओं शिवाआपस्सन्त्विवति सव्येन देवयोः अपसव्येन पित्रादिपात्रेषु जलन्दद्यात्। तत ओं सौमनस्यमस्तु इति सव्येन देवयो रपसव्येन पित्रेषु पात्रेषु पुष्पाणि क्षिपेत्। तत ओं अक्षतञ्चारिष्टमस्तु इति सव्येन देवयो रपसव्येन पित्रेषु पात्रेषु अक्षतान् क्षिपेत्।

ततः पात्रषट्के तिल मन्नाज्ययुतं जलं निधाय तेषामाद्यं वामहस्तेनादाय, ओं अद्यामुकगोत्रस्य पितु रमुकशर्मणो दत्तैतदन्नपानादिक मच्छय्यमस्तु इत्युत्सृजेत्। ततस्तत्पात्रं वामान्वारब्ध दक्षिणकरेण पितृपात्रे क्षिपेदाचारात्।

एवमेव पितामहादीनामप्यक्षय्योदकदानम्। ततस्सव्येन, ओं अघोराः पितरस्सन्तु, इति दक्षिणान्दिशं मनसा आकाक्ष्यन्, पूर्वाभिमुखः पठेत्। ततः ओं गोत्रन्नोवर्द्धतामिति पठेत्। ततोपसव्येन पितृपिण्डोपरि तथा मातामहपिण्डत्रयोपरि दक्षिणाग्रान् कुशानास्तीर्य्य तदुपरि ऊर्ज्जम्वहन्तीरमृतंघृतं पयष्कीलालं परिश्रुतं स्वधास्थ तर्पयत् मे पितॄन् इति पठित्वा वामहस्ते घृतं उदकपात्रं दक्षिणेनादाय वामान्वारब्ध दक्षिणकरेण वारिधारान्दद्यात्। ततो यथाक्रमं पिण्डानुत्थाप्य अर्घपात्रान्युत्तानीकृत्य ओं अद्य विश्वेषान्देवानां कृतैतच्छ्राद्धप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतं यथानाम गोत्राय ब्राह्मणाय दक्षिणामहन्ददे। इतिकुशत्रय जव जलैर्द्दक्षिणान्दद्यात्।

एवमेवापरत्रापि, ततोपसव्येन मोटकतिल जलान्यादाय, ओं अद्यामुक गोत्रस्य पितुरमुक शर्मणः कृतैतत्पार्वण श्राद्ध प्रतिष्ठार्थमिदं रजतञ्चन्द्र दैवतं

यथानाम गोत्राय ब्राह्मणाय दक्षिणामहन्ददे। एवमेवापर पञ्चभ्योपि। ओं दातारोनोभि वर्द्धन्तां वेदास्सन्तति रेवच। श्रद्धाच नोमा व्यगमद्बहुदेयञ्चनो अस्तु। अन्नञ्चनो वहुभवे दतिथींश्च लभेमहि। याचितारश्च नः सन्तु-माच याचिष्म कञ्चन। एतास्सत्या शिषस्सन्तु ततो देवताभ्य इति त्रिर्जपेत्।

ततः कयान इति महावामदेवऋषिर्गायत्रीच्छन्द इन्द्रोदेवता अग्निष्टो-मादौ द्वितीयपृष्ठे शान्तिकर्म्मणि जपेविनियोगः—ओं कयानश्चित्र आभुव दुती सदावृद्धः सखा। कया सचिष्ठयावृता, कस्त्वा सत्यो मदानां मं हिष्ठो मत्स-न्दधसः। दृढ़ाचि दारुये वसु। अभीषुणः सखीना मविता जरितृणाम्। शत-म्भवाः स्यूतये। ओं स्वस्तिन इन्द्रो बृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः। स्वस्तिनस्ताक्ष्र्यो अरिष्टनेमिः। स्वस्तिनो वृहस्पतिर्द्दधातु, ओं स्वस्तो वृह-स्पतिर्द्दधातु। प्राजापत्यं वै वामदेव्यं प्रजापतावेव प्रतिष्ठायो त्तिष्ठन्ति। शान्ति वैं वामदेव्यं शान्तावेव प्रतिष्ठायो त्तिष्ठन्ति। ओं अत एतत्कर्माच्छि-द्रमस्तु। एता ऋचस्सामवेदक्रमेण गातव्याः।

तेन महावामदेव्यं सामगीतं भवति। ततो दक्षिणहस्तेन देव दीपयो-र्न्निर्वापणम्। अपसव्येन पितृदीपानां निर्वापणम्। ततो हस्तौपादौ प्रक्षाल्य द्विराचम्य श्रोत्रवन्दनादि कृत्वा विष्णुं स्मृत्वा पीठे उपविश्य प्राङ्मुखः शंख चक्र गदा पद्म हस्तं पीतकौशेय वाससं विष्णुं मनसास्मरेत्। तत्फलन्तु याज्ञ-वल्क्ये नोक्तम्। ओं प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णो स्सम्पूर्णं स्यादिति श्रुतिः।

अथ, वैश्वदेववलिकर्मणी श्रीदत्तोपाध्यायानुसारेण लिख्यते। ततः क्व-चित्पात्रे पानीयं कृत्वा तत्र पाणिनैव जुहुयात्। ओं भूः स्वाहा, ओं भुवः स्वाहा, ओं स्वः स्वाहा, ओं भूर्भुवः स्वाहा। ओं देवकृतस्यैनसोवयजनमसि स्वाहा। ओं पितृकृतस्यैनसोवय जनमसि स्वाहा। ओं अस्मत् कृतस्यैनसोवयजनमसि स्वाहा। ओं यद्दिवा च नक्त ञ्चैनश्य कृमतस्यावयजनमसि स्वाहा।

ओं यस्तपन्तश्च जाग्रतश्चैनश्च कृमतस्यावय जनमसि स्वाहा। ओं यद्विद्वांसश्चा विद्वांसश्च कृमतस्यावय जनमसि स्वाहा। ओं अग्नये स्विष्टकृते स्वाहा। एवंहुत्वा तत्पश्चिमे भूमावेव ओं सर्वेभ्यो देवेभ्यो नमः। ओं सर्वेभ्यो

भूतेभ्यो नमः। इति वलित्रयन्दत्वा – शेषमन्न मभ्यूक्ष्य —ओं पितृभ्यः स्वधा इति पितृवलि मपसव्येन मोटक तिल जलैर्द्द्यात्। ततो वलिप्रतिपत्तिर्वाम-देव्यगानञ्च।

ततोन्यदन्न मादाय—ओं देवा मनुष्याः पशवोवयांसि सिद्धा स्सरक्षोरग दैत्य संघाः। प्रेताः पिशाचा स्तरवः समस्ता ये चान्न मिच्छन्ति मयाप्रद-त्तम्। पिपीलिका कीट पतङ्गकाद्या वुभुक्षिताः कर्म निवद्धवद्धाः। प्रयान्तु ते तृप्तिमिदं मयान्नम्। तेभ्यो विसृष्टं सुखिनो भवन्तु, येषान्न माता न पिता न वन्धु न्नै वान्न सिद्धिर्न तथान्न मस्ति। तत्तृप्तयेन्नंभुविदत्तमेतत्प्रयान्तु तृप्ति मुदिता भवन्तु।

भूतानिसर्वाणि तथान्नमेतदहञ्च विष्णु र्न मतोन्यदस्ति। तस्मादहं भूत निकायभूत मन्नं प्रयच्छामि भवाय तेषां। चतुर्द्दशो भूतगणोय एव तत-स्थिताये ऽखिल भूतसंघाः। तृप्त्यर्थं मन्नंहि मया विसृष्टं तेषामिदन्ते मुदिता भवन्तु। इत्युच्चाय एकं वलिन्दद्यात्। तत ओं स्वभ्योनमः। ओं चाण्डा-लेभ्योनमः। ओं विहङ्गेभ्योनमः। ओं पतितेभ्योनमः। ओं स्वपदम्यो-नमः। ओं पापरोगिम्योनमः। ओं वायसेभ्योनमः। ओं कृमिभ्योनमः। तत ओं ऐन्द्रवारुण वायव्या याम्या चै नैर्ऋतास्तथा। वायसाम्प्रतिगृह्णन्तु भूमौ पिण्डं मयार्पितामिति पठित्वा एकंवलिन्दद्यात्।

ततः—"ओं श्वानौ द्वौ श्याव शवलौ वैवस्वत कुलोदभवौ।
ताभ्यां पिण्डं प्रयच्छामि स्यातामेतावहिंसकौ।"

इत्यपरं वलिन्दद्यात्। ततः सर्वानेव वलीनुपस्पृशेत्। ततो वलीन् जलादौ क्षिपेत्।

अथ नित्य श्राद्धम्।

पुण्डरीकाक्षं स्मरेत्। अथ कुशोदकेन श्राद्धद्रव्याणिसिञ्चेत्। तत ओं अद्य नित्यश्राद्ध महङ्करिष्ये। इति कुशत्रय तिलजलै स्सङ्कल्प्य, त्रिर्गायत्रीं त्रिर्द्देवताम्य इति जपित्वा— अपसव्येन ओं अद्यामुकगोत्रपितरमुकशर्मन्निद-मासनन्ते स्वधा। एवं पितामहादि पञ्चभ्योपि। तत ओं अपहता असुरा

रक्षांसिवे दिषद इदि वामावर्त्तेन भूमौ तिलान्विकीर्य ओं अद्यामुकगोत्र पितर-सुकशर्मन्ने तानि गन्ध पुष्प धूप दीप ताम्बूलाच्छादनानि ये चात्र त्वानु यांञ्च-त्वमनु तस्मै ते स्वधा।

इति पित्रे दत्वा—एवमेवेतरेभ्यो पञ्चभ्योपिदद्यात्। तत श्चतुरस्रं गण्डलं कृत्वा—अन्नं परिविष्य तदुपरि घृतं तिलान् मधु च स्थानषट्केषु दत्वा-मधुवातेति ऋक्त्रयेण षट्सु स्थानेषु अभिमन्त्र्य ततः पृथिवीतेपात्र मित्यादिना पात्रमालभ्य ओं इदं विष्णुर्विचक्रम इति विष्णो कव्यं रक्ष इति पठित्वा—ओं इदमन्न मित्यन्ने, ओं इमा आप इत्यप्सु। ओं इदं हविरिति सर्ववस्तु अभिप्रायेण घृते दक्षिाङ्गुष्टं संयोज्य ओं अद्यामुकगोत्र पितरमुकशर्मन्निद-मन्नं सोपकरणं ते स्वधा इत्युत्सृजेत्।

एवमेव पितामहादि पञ्चभ्योप्युत्सृजेत्।

यदि तु एकस्मिन्नेव पात्रे क्रियते तदा पृथिवीत इत्यादि मन्त्रः पुनर्न पठ-नीयः किन्तु इदं विष्णुरित्यादि सर्वं पठनीयम्। पात्रं नानाचेत् पृथिवीइत्या-दि पुनः पठनीयम्। षट्सु एव ततस्त्रिर्गायत्रीं, मधुवातेति ततो मधु मधु मध्वीति च तथा अन्नहीनमिति। पुनस्त्रिर्गायत्रींपठित्वा—कुशेषूपविश्य तिस्रोमधुमती मधुमध्वीति।

ततः सव्येन देवताभ्य इति त्रिजपित्वा वामदेव्यं गीत्वा यथोक्तं विष्णुं स्मरेत्। यदा च नित्यश्राद्धकरणम्, तदा। तत्प्रागेव वलिवैस्वदेव वलि-कर्मणी कर्त्तव्ये यदातु पार्वण मेकोद्दिष्टंवा तदा पार्वणानन्तरं वैश्वदेव वलिक-र्मणी एव एकोद्दिष्टानन्तरं तु वैश्वदेव वलि नित्यश्राद्धानितिविशेषः।

अथ नित्य पार्वणकालः।

आश्विनापरपक्षे चतुर्द्दशीवर्जं सर्वस्मिन्नेवदिने अनिषिद्धकाले एकैकं पार्वणम्। एवं शरदि शुक्लपक्षे व्रीहिपाके पार्वणम्। एकादशामावास्याः वृश्चिके शुक्लपक्षे त्रयोदशांशादर्वाक् हरिशयनादुत्तरः शालि संस्कारकं पार्वणं मार्गं माघ श्रावणपूर्णिमाः पौषकृष्णाष्टमी अपूपाष्टका माघकृष्णाष्टमी मांसा-ष्टका फाल्गुन कृष्णाष्टमी शाकाष्टका, अन्वष्टका स्तु साग्नेरेव यवपाक श्राद्धम्, तत्तु वैशाख शुक्लपक्षे नवोदके च श्राद्धम्। तच्चार्द्रास्थे सूर्ये गृहस्य छदि-क्रियायाम् एवं पार्वण ३६ इति छन्दोग पार्वण विधिः। कालस्तु प्रसंगादत्रोक्तः।

अथ अमावास्यामृतस्य सदैवत छन्दोगकर्तृक मपात्रकमेकेद्दिष्टम् । तद्यथा—सेकः सङ्कल्पः परभूमौ भूस्वामि पितृभ्योपसव्येन अन्नादानम्, तत स्सव्येन जपधर्मेण त्रिर्गायित्रीं देवताभ्य इति त्रिर्जपित्वा देवान्न मुत्सृज्य अपसव्येन पित्रासनमुत्सृज्य, सव्येन, ओं विश्वेदेवास आगत श्रृणुताम इमं हवं एदं वर्हिर्निषीदत। ओं यवोसि यवयास्मद्द्वेषो यवयारातिः। इति यवान् प्रदक्षिणं विकीर्य, ओं विश्वेदेवा श्रृणुतेमं हवम्मे येअन्तरिक्षे य उपद्यविष्ठ, ये अग्निजुह्वा उतवा ययत्रा आसद्यास्मिन्वर्हिषि मादयध्वं, ओं ओषधय स्समवन्त सोमेन सह राजा। यस्मै कृणोमि ब्राह्मणस्तं राजन्पारयामसि।

"ओं आगच्छन्तु महाभागा विश्वेदेवा महावलाः।
ये यत्र योजिताः श्राद्धे सावधाना भवन्तु ते।"

ततोपसव्येन ओं उशन्तस्त्वानिधी मह्युशन्तःसमिधीमहि। उशन्त शत आवह पितृ्न् हविषे अत्तवे। ओं एत पितर स्सोम्यासो गम्भीरेभिः पथिभिः पूर्वमेभिः। दत्तास्मभ्यं द्रविणेहभद्रं रयिञ्चन स्सर्ववीरं नियक्षत्।

"ओं आयन्तुनष्पितरस्सोम्यासो ग्निष्वात्ताः पथिभिर्द्देवयानैः।
अस्मिन्यज्ञे स्वधया मदन्तोधि वुवन्तुतेवं त्वस्मान् ।"

इत्यावाह्य ओं अपहता ऽसुरा रक्षांसि वे दिषद इति तिलान्विकीर्य ततस्सव्येन देवार्घ्ये अपसव्येन पित्रर्घ पात्रे पवित्रन्दत्वा ततस्सव्येन देवार्घे ओं शन्नोदेवी रभीष्टये शन्नोभवन्तु पीतये शंयोरभिस्रवन्तुनः इति जलं क्षिपेत्।

अनेनैवमन्त्रेण अपसव्येन पित्रर्घेनजलं प्रदाय सव्येन ओं यवोसि यवयास्मद्द्वेषो यवयाराती रिति देवार्घे यवान् प्रक्षिप्य ततोपसव्येन तिलोसि पितृदेवत्यो गोसवोदेव निर्मितः। प्रत्नमद्भिः पृक्तः स्वधया पितृन् लोकान् प्रिणाहिनः स्वाहा इति पितृतीर्थे तिलान् प्रक्षित्य ततः सव्येन देवार्घे गन्धम्, अपसव्येनपित्रर्घे पुष्पाणि दत्वा, सव्येन देवार्घ मादाय पवित्रं दक्षिणहस्तेन पूर्वागं देवपात्रे धृत्वा उदकान्तरन्दत्वा—ओं यादिव्या आपष्पयसा सम्वभूवुर्या आन्तरीक्षा उत्यार्थिवीर्याः हिरण्यवर्णा यज्ञियास्तान आपश्शिवाः शंस्योना शुहवा भवन्तु इति पठित्वा ओं विश्वेदेवा इदमन्नं वो नमः। इत्यर्घमुत्सृज्य, किञ्चिज्जलं पितृतीर्थेन पवित्रोपरिदत्वा पवित्र मर्घेधारयेत्। ततोपसव्यंकृत्वा पि-

त्रर्घमादाय पवित्रं पितृपात्रे धृत्वा उदकान्तरेण सिच्य ओं यादिव्या इतिमन्त्रं पठित्वा ओं अद्यामुकगोत्र पितरमुकशर्मन्निदन्तेर्घ्यं ये चात्र त्वानुयांश्च त्वमनु तस्मै ते स्वधा । इति पित्रर्घमुत्सृज्य किञ्चिज्जलं पवित्रोपरिदत्वा पवित्रमर्घे निधाय ओं पित्रेस्थान मसीतिपित्रासनवामे पित्रर्घपात्रं न्यूब्जी कुर्यात् ।

ततस्सव्येन ओं विश्वेदेवा एतानि गन्ध पुष्प धूप दीप ताम्बूल यज्ञोपवीताच्छादनानि वोनम इति दद्यात् । ततोपसव्येन ओं अद्यामुकगोत्र पितरमुकशर्मन्नेतानि गन्ध पुष्पधूपदीप ताम्बूल यज्ञोपवीताच्छादनानि ये चात्र त्वानु यांश्च त्वमनुतस्मै ते स्वधा । इतिदद्यात् । ततस्सव्येन देवपात्रे अपसव्येन पितृपात्रे मण्डलंकृत्वा सव्येन पुटकादौ पानीयंकृत्वा ओं स्वाहा सोमाय पितृमते ओं स्वाहा अग्नयेकव्यवाहनाय इनि स्वाहान्तेन होमः पश्चान्मन्त्र समापनम् ।

ततस्सव्येन हुतशेष न्देवे अपसव्येन पित्रेददयात्, ततस्सव्यञ्जनमन्नं देवे अपसव्येन पित्रे सव्यञ्जमन्नं परिविष्यते ततः सव्येन देवान्ने घृतम् । अपसव्येन पित्रन्ने ततः सव्येन देवान्ने यवान्विकीर्य । अपसव्येन पित्रन्ने तिलान्, ततः सव्येन देवान्ने मधु अपसव्येन पित्रन्ने मधुन्दत्वा ततः सव्येन देवान्नमालभ्य मधुमतीः पठित्वा अपसव्येन पित्रन्न मालभ्य मधुमतीपठेत्, ततः सव्येन देवपात्रमालभ्य ।

"ओं पृथिवीतेपात्रं द्यौरपिधानं ब्राह्मणस्यमुखे अमृतेअमृतं जुहोमिस्वाहा ।"

"ओं इदंविष्णुर्विचक्रमे त्रेधानिदधेपदम् ।
समूढमस्यपांशुले ।"

ओं विष्णोहव्यं रक्ष इतिपठित्वा ओं इदमन्न मित्यन्ने, ओं इमाआप इत्यप्सु ओं इदंहविरिति हविषि सर्वाभिप्रायेण दक्षिणाङ्गुष्ठं निवेश्य ओं विश्वेदेवा इदमन्नं सोपकरणं वो नमः इति देवेभ्यो ऽन्नमुत्सृज्य ततोपसव्येन व्यस्तानुत्तान पाणिभ्यां पितृपात्रमालभ्य ओं पृथिवीत इत्यादि जपित्वा—ओं इद विष्णु रित्यादि ओं विष्णोकव्यं रक्ष, इतिपठित्वा ओं इदमन्न मित्यन्ने ओं इमाआप इत्यप्सु ओं इदं हविषि, साङ्गुष्ठ माचारान्निवेद्य, ओं अद्यामुमगोत्र पितरमुकशर्मन्नि-

दमन्नं सोपकरणं ते स्वधेति पित्रे अन्नमुत्सृज्य, ततस्त्रिर्गायत्रीं मधुमती मधुमधु मध्वीति च जपित्वा। "ओं अन्नहीनं क्रियाहीनं" इतिपठित्वा पुनस्त्रिर्गायत्रीं जपित्वा कुशेषूपविश्य मधुमती: मधुममधु मध्वीति च जपित्वा गायत्र्यंसामपित्र्यांसं हि तां मधुच्छन्दसाञ्च जपेत्।

ततो भूमिं तिलैरास्तीर्य—ओं नमस्तुभ्यं विरुपाक्ष इतिपठित्वा उच्छिष्टसमीपे दक्षिणाग्रंकुशत्रयं समूलं पातयित्वा प्रोक्ष्य सर्वप्रकारमन्नमुद्धृत्य सतिलमेकीकृत्य वारिणा ओं अग्निदग्धाश्च येजीवा इत्यादि मन्त्रेण पितृतीर्थेन कुशोपरि विकिरेत्। ततस्सव्येन सकृदाचम्य अपसव्यंकृत्वा त्रिर्गायित्रींमधुमती: मधुमधु मध्वीति च जपित्वा पिण्डकान्निर्माय वामेनपाणिना दर्भपिञ्जलिमादाय ततोदक्षिणेन गृहीत्वा तन्मूलेन वामान्वारब्ध दक्षिणकरेण ओं अपहता असुरा रक्षांसि वे दिषद इत्येनन दक्षिणाग्रां रेखामुल्लिखेत्, पिञ्जलीमुत्तरतस्त्यजेत्। तदुपरि दक्षिणाग्रान् वहून्कुशान् वद्धमुष्टिप्रमाणान् स्तरेत् ततस्सव्येन देवताभ्य इतित्रिर्जपेत्।

ततोपसव्यंकृत्वा एतपितर इत्यादिना पितरमावाह्य पुटके जलं तिलान् गन्ध पुष्पं च दत्वा वामहस्तादधृतं, ओं अद्यामुकगोत्र पितरमुक शर्मन्नत्रावने निक्ष्व ये चात्र त्वानुयांश्च त्वमनु तस्मै ते स्वधा इतिपठित्वा छिन्नमूलदर्भेषु वामान्वारब्धदक्षिणहस्तस्य पितृतीर्थेन त्यजेत्। ततो जलं स्पृष्ट्वा ततः श्राद्धशेषेण सव्यञ्जनान्नेन अग्नौ करण शेषसहितेन घृत तिल मधुजलवता विल्वोपमं पिण्डन्निर्माय पुनस्तिल मधु घृताभिधारितं कृत्वा तिल जल मोटक पिण्डान् वामान्वारब्ध दक्षिणकरेणादाय—ओं अद्यामुकगोत्र पितरमुकशर्मन्नेष ते पिण्डो ये चात्र त्वानुयांश्च त्वमनु तस्मै ते स्वधा इत्युच्चार्य्य अवनेजनस्थाने दद्यात्—ततोजलं स्पृशेत्।

ततः कुशमूले करौ प्रोंक्ष्य सव्येन त्रिराचम्य हरिं स्मृत्वा अपसव्येन पिण्डपात्र प्रक्षालनजलेन तिलगन्धपुष्प सहितेन पूर्णपात्रं वामहस्तेनादाय ओंमद्यामुकगोत्र पितरमुक शर्मन्नत्रप्रत्यवने निक्ष्व ये चात्र त्वानुयांश्च त्वमनु तस्मै ते स्वधा इति पिण्डोपरि प्रत्यवनेजनं दद्यात्। ततो जलं स्पृशेत्। ओं अत्र पितर्मादयस्व यथाभाग मा वृषायस्व इति पठित्वा उदङ्मुखीभूय क्लान्तिप-

र्यन्तं तर्तास्थत्वा स्वासं नियमयन् तेनैव पथा परावर्तमानः पितरं तुष्टं भास्वरमूर्त्ति ध्यायन्, ओं अमीमदत्पिता यथाभाग मा वृषाइष्ट इतिजपेत्।

ततः श्वासं त्यक्त्वा नीवीं विश्रंस्य विष्णुं स्मृत्वा वामेनपाणिना धृतं सूत्रं दक्षिणेनादाय ओं एतत्तो पितर्वास इतिपठित्वा, ओं अद्यामुकगोत्र पितरमुकशर्मन्नेतत्तो वासो ये चात्र त्वानुयांश्च त्वमनु तस्मै ते स्वधा इति वामान्वारब्धकरेण दद्यात्। ततो जलस्पर्शः।

ततस्तुष्णीमेव गन्धपुष्प धूप दीप ताम्बूलानि दद्यात्। ततो वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमोनमः। वर्षाभ्यश्च सरत्संज्ञ ऋतवे च नमस्सदा। हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च। मास सम्वत्सरेभ्यश्च। दिवसेभ्यो नमस्सदा। तत ओं शिवा आपस्सन्तु, इति जलम्, ओं सौमनस्यमस्तु, इति पुष्पाणि, ओं अक्षतञ्चारिष्ट मस्तु इति अक्षतम्, इति सव्यापसव्याभ्यां देवपित्रोर्द्द्यात्। ततः तिलाज्यमधु संयुक्त मक्षय्योदक मेकस्मिन्पुटके कृत्वा, ओं अद्यामुकगोत्रस्य पितुरमुकशर्मणो दत्तैतदन्नपानादिक मक्षय्यमस्तु। इति मोटक जलैर्द्दत्वा अक्षय्योदकपात्रं क्षिपेत्। ततस्सव्येन, ओं अघोरष्पिता अस्त्विति पठित्वा ओं गोत्रन्नोर्द्धतामिति पठेत्। ततोपसव्येन पिण्डोपरि सपवित्र कुशानास्तीर्य्य, ओं ऊर्ज्जंम्वहन्तीरमृतं घृतं पयष्कीलालं परिश्रुतं स्वधास्थ तर्पयत मे पितरमिति सपवित्रकुशोपरि दक्षिणाग्रां वारिधारान्दद्यात्।

ततः पित्रर्घमुत्थाप्य सव्यंकृत्वा ओं विश्वेषां देवानां कृतैतच्छाद्ध प्रतिष्ठार्थमिद हिरण्यमग्निदेवतं यथानामगोत्राय ब्राह्मणायदक्षिणामहन्ददे। ततोपसव्येन ओं अद्यामुकगोत्रस्य पितरमुकशर्मणः कृतैतत्साम्वत्सरिकैकोद्दिष्ट श्राद्धप्रतिष्ठार्थमिदं रजत ञ्चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणामहन्ददे।

ततस्सव्येन ओं दातारोनोभिवर्द्धन्तांवेदास्सन्ततिरेव च। श्राद्धाच नोमा व्यगमद्वहुदेयञ्चनो अस्तु अन्नञ्चनो वहुभवे दतिथींञ्च लभेमहि। याचितारश्च नस्सन्तु माच याचिष्म कञ्चन एतास्सत्या शिषस्सन्तु। तत ओं देवताभ्य इति त्रिर्ज्जपित्वा, ततोवामदेव्यम् गीत्वा अपसव्यंकृत्वा दक्षिण पाणिना दीपं निर्वापयेत्। हस्तौ पादौ प्रक्षाल्य द्विराचमेत् ततो विष्णुं

स्मरेत्। ततोऽयुग्मान् ब्राह्मणान् भोजयेत्। ततो बलिवैश्वदेव नित्य श्राद्धानि कुर्वीत। ततः सर्वशेषे यजमानः पत्नी च पितृशेष मुदाहरेत्। उदाहरेत्—भुञ्जीत श्राद्धोच्छिष्टं सूर्येऽस्तमिते उत्सारयेत्। पाकपात्राण्युत्तरदिनै क्षालयेत्। श्राद्धदिने वन्दि मागधसूतान् तौर्यत्रिकविदश्चयशोभङ्ग शङ्कया शेषे संपिश्रजेत्।

नान्दीमुखम्।

"कर्मादिष्व च सर्वेषु मातरस्स गणाधिपाः।
पूजनीयाः प्रयत्नेन पूजिताः पूजयन्तिताः।
प्रतिमासु च शुद्धासु लिखिता वा पटादिषु।
अपिवाक्षतपुष्येषु नैवेद्यैश्च पृथग्विधैः।
कुडयलग्नां वसोधारां सप्तधारान् घृतेन तु।
कारयेत्पञ्चधाराम्वा नातिनीचां नचोत्थिताम्।
आयुष्याणिच शान्त्यर्थं जप्त्वा तत्र समाहितः।
षड्भ्यष्पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत्।
वशिष्ठोक्तो विधिःकृत्स्नो द्रष्टव्योत्र निरामिषः।
अतष्परंप्रवक्ष्यामि विशेषइह यो भवेत्।
प्रातरामन्त्रितान् विप्रान् युग्मानुभयतस्थितान्।
उपवेश्यकुशान्दद्यादृजुनैवहि पाणिना।
हरिता यज्ञियादर्भाः पीतकाष्पञ्च यज्ञियाः।
समूलाः पितृदैवत्याः कल्माषा वैश्वदैविकाः।
हरिता वै सपिण्डाश्च पुष्टास्निग्धास्समाहिताः।
रत्निमात्राः प्रमाणेन पितृतीर्थेन संस्कृताः"।

"पिण्डार्थं येस्तृतादर्भाः तर्पणार्थन्तथैवच।
धृतैःकृते च विण्मुत्रे त्यागष्तेषाम्विधीयते।
दक्षिणं पातयेज्जानु देवान् परिचरन् सदा।
पातयेदितरंजानु पितृन्परिचरेन्नपि।
निपातो नहि सव्यस्य जानुनो विद्यते क्वचित्।
सदापरिचरेद् भक्तया पितृनप्यत्र देववत्।

पितृभ्य इति दत्वेष उपवेश्य कुशेषुतान् ।
गोत्रनामभिरामन्त्य पितृनर्धं प्रदापयेत् ।
नात्रापसव्यकरणं न पित्र्यं तीर्थमिष्यते ।
पात्राणां पूरणादीनि, दैवेनैवहि कारयेत्" ।

ज्येष्ठोत्तरकरान् युग्मान् कराग्राग्र पवित्रका । कृत्वार्धं सम्प्रदातव्यं नैकैकस्यापिदीयते ।

अनन्त गर्भिणं साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ।
एतदैवहि पिञ्जल्या लक्षणं समुदाहृतम् ।
आज्यस्योत्पवनार्थयत्, तदप्येतावदेव तु ।
एतत्प्रमाणा मेवेके कौशीमेवार्द्र मञ्जरीम् ।
शुष्काद्या शीर्णकुसुमां पिञ्जलीं परिचक्ष्यते ।
पित्र्यमन्त्रानुहरणे आत्मालम्मे अवेक्षणे ।
अधोवाह्यसमुत्सर्गे प्रहासेमृत भाषणे ।
मार्जार मूषिकस्पर्शे आकृष्टे क्रोधसम्भवे ।
निमित्तो स्वेषु सर्वेषु कर्मकुर्वन्नप स्पृशेत् ।

"अक्रिया त्रिविधा प्रोक्ता विद्वद्भिः कर्मकारिणाम्
अक्रिया च परोक्ता च तृतीया चा यथा क्रिया ।
स्वशाखाश्रयमुत्सृज्य परशाखाश्रयन्तु यः ।
कर्तुमिच्छति दुर्मेधा मोघन्तस्य विचेष्टितम् ।
यन्नाम्नातं स्वशाखायां पारक्यमविरोधयेत् ।
विद्वद्भिस्तदनुष्ठेयम् अग्निहोत्रादि कर्मवत् ।
प्रवृत्त मन्यथाकुर्या, द्यदि मोहः कथञ्चन ।
यतस्तदन्यथाभूतं ततएव समापयेत्" ।

"समाप्ते यदि जानीयात्, मयैतदन्यथाकृतम्
तावदेव पुनःकुर्या न्नावृत्तिस्सर्व कर्मणः ।
प्रधानस्याक्रिया यत्र साङ्गं तत्क्रियतेपुनः ।

तदङ्गस्या क्रियाया न्तु नावृत्ति र्न्नापि तत्क्रिया।
मधुमध्विति यस्तत्र त्रिर्ज्जपोशित मिच्छताम्।
गायत्र्यनन्तरं सोत्र मधुमन्त्र विवर्ज्जितः।
नचाश्नत्सु जपेदत्र कदाचिदपि संहिताम्।
अन्य एव जपः कार्यः सोम सामादिक श्शुभः।"

"यस्तत्प्रकारोवान्नस्य तिलवद्यववत्तथा।
उच्छिष्टसन्निधौ सोत्र तृप्तेषु विपरीतकः।
सम्पन्नमितितृप्ताषु प्रश्नःस्थाने विधीयते।
सुसम्पन्नमितिप्रोक्ते शेषमन्नं निवेदयेत्।
प्रागग्रेष्वथदर्भेषु पितॄनामन्त्र्य पूर्ववत्।
अपः क्षिपेन्मूलदेशे ऽवने निक्ष्वेति निस्तिलाः।
द्वितीय ञ्च तृतीय ञ्च, मध्यदेशाग्र देशयोः।
मातामह प्रभृतींस्तु तेषामेव हि वामतः।
सर्वस्मादन्नमुद्धृत्य व्यञ्जनैरुपसिच्यच।
संयोज्य यव कर्क्कन्धु दधिभिः प्राङ्मुखस्तथा।
अवनेजनवत्पिण्डान् दत्वा विल्व प्रमाणकान्।
तत्पात्र प्रक्षालनेनाथ पुनरप्यवने जयेत्
उत्तरोत्तरदानेन पिण्डानामुत्तरोत्तरः।
भवेदवश्याचरणा दधरः श्राद्धकर्मणि।"

"तस्माच्छाद्धेषु सर्वेषु वृद्धिमत्स्वितरेषुच।
मूल मध्याग्रदेशेषु इषत्सिक्ता स्तु निर्वपेत्।
गन्धादीर्न क्षिपेत्तूर्णीं तत आचामयेद् द्विजान्।
अन्यत्राप्येष एवस्या द्यवादिरहितो विधिः।
दक्षिणाप्रवणेदेशे दक्षिणाभिमुखेन तु।
दक्षिणाग्रेषु दर्भेषु एषोन्यत्र विधिस्मृतः।
अथाग्र भूमिमासिञ्चेत्, स्वयं प्रोक्षित मस्त्विति।
शिवा आपः सन्त्विति च पुष्पदानमतष्परम्।"

"अक्षतञ्चारिष्ट मस्त्वित्य क्षतान् प्रतिपादयेत।
अक्षय्योदकदानन्तु अर्घदानवदिष्यते।
षष्ठयैवनित्यं तत्कुर्या न्न चतुर्थ्या कथञ्चन
प्रार्थनासु प्रतिप्रोक्ते सर्वास्वेव द्विजोत्तमैः।
पवित्रान्तार्द्रं तान् पिण्डान् सिञ्चेदुत्तानपात्रकृत्।
युग्मानेव स्वस्तिवाच्यम्, अङ्गुष्ठ ग्रहणंसदा।"

"कृत्वा सर्वस्यविप्रस्य प्रणम्यानुव्रजेत्ततः।
एष श्राद्धविधिः कृत्स्न उक्तस्संक्षेपतोमया
ये विदन्तिन मुह्यन्ति श्राद्धकर्मसु ते क्वचित्।
इदं श्राद्ध ञ्च गृह्य ञ्च परिसंख्यान मेवच।
वशिष्टोक्त ञ्च यो वेद स श्राद्धं वेद नेतरः।"

सर्वेष्विति—यद्यपि सर्वेषाङ्कर्मणामारम्भे मातृपूजा भ्युदयिके प्रायश्चित्तादिकर्मारम्भे व्यभिचारात्। तथापि यत्रैव कर्मविशेषे उत्सवानन्द सन्तानादौ नान्दीमुखश्राद्धं युक्तम्। तत्रैव तत्कार्यम्। तत्रैव च ततः प्राक्मातृपूजनम्।

"अकृत्वा मातृयागं यः पितृभ्यः परिवेश्येत्।
तस्यक्रोधसमाविष्टा हिंसामिच्छन्ति मातरः।"

इतिवचनात्। अत्र—"कर्मादिषु मातरः पूज्या" इतिश्रवणात्। कर्ममातृपूजयोरेव समन्वयः प्रतीयते।

तेन—कर्मप्रधानं स्वस्व फलवत्तयोपस्थितत्वात्। मातृपूजन न्तु तस्याङ्ग फलवत्सिन्निधावफलत्वेनोपस्थितत्वात्। नच हिंसामिच्छन्तीति श्रुतेरहितं सैव तत्पूजाफलमितिवाच्यम्। तस्य निन्दार्थवादत्वेन पूजाया आवश्यकत्वसिद्धेः। अथ नान्दीमुखान्तत्कर्माङ्गमस्त्विति चेत्। न। अङ्गत्वे सम्भवति। अङ्गाङ्ग त्वस्यान्याय्यत्वात्। नचैवं एकानुष्ठाने अपरानुष्ठानमितिनियमो न स्यात् द्वयोष्कर्मणि तुल्यवदन्वयित्वादितिवाच्यम्, पौर्वापर्यापन्नयोरेव द्वयोष्कर्मणि प्रधाने ऽन्वयात्। तथैवोत्पत्तिरिष्टत्वादिति। मातर इति मातरो गौर्यादयः षोड़शः।

"गौरी, पद्मा, शची, मेधा, सावित्री, विजया जया।
देवसेना स्वधा स्वाहा मातरो लोकमातरः, हृष्टिः पुष्टिः
तथातुष्टिः अथात्मकुलदेवतयासह।"

"आदौ विनायकं पूज्यः शेषे च कुलदेवतेति।"

वह्वृच परिशिष्टात्। पूजाधारमाह। प्रतिमास्विति। प्रतिमासु वा आलेख्येष्विव तण्डुलराशिषु वे त्यर्थः। वसोरिति वसोश्च वसुनश्चेत्यर्थः। वसुश्चेदिराजः। वसु घृतं तेन इयं घृत धारा चेदिराज मुद्दिश्य दीयतइत्यर्थः। श्राद्धचिन्तामणौ चै तद्वयक्तम्। आयुष्य जपोयं छन्दोगपरः। षड्भ्यइति मात्रादरेप्युपलक्षणम्।

प्रातरिति—प्रकृतौ विकल्पप्राप्तस्यापि सायंनिमन्त्रणस्य निषेधाय ज्येष्ठोत्तरेति द्वयोर्मध्ययो र्दक्षिण दिक्स्थः स ज्येष्ठस्तस्यकरः उत्तरदिक्स्थस्य करोपरि धर्त्तव्यः तादृशैक हस्ताग्राग्रंपवित्रन्देयम्। अथ—अतष्परं प्रवक्ष्यामि विशेषइह यो भवेदिति प्रतिज्ञानात्। कराग्राग्रपवित्रकत्व माभ्युदयिके विशेष इत्यायाति। तथा च पार्वणे एतद्वैपरीत्यं स्यादितिचेत्। मैवम्। मिलितहस्तोपरि पवित्रदान मभिधायने कैकस्यात्र दीयत इति यत्पुनरभिधत्तो, तेनज्ञापयति इदमेवात्रविधीयते कराग्राग्रपवित्रकः त्वन्दुनृच्यतइति। अक्रियेति—अक्रिया त्रिविधाक्रियाया एवाभावः, परोक्तकर्म क्रिया वा स्वोक्तक्रियाया एव व्यत्यासादिना अनुष्ठान वा।

अत्र—प्रथमा प्रधानस्य अङ्गस्य च यदिप्रधानस्य तदा अङ्गमावर्त्तनीयम्। यद्यङ्गस्य तद्दानतन्मात्रानुष्ठानं नापि सर्वानुष्ठानमित्यर्थः। द्वितीयेत्वाह। स्व शाखेति तद्वयर्थ मित्यर्थः। तृतीयेत्वाह। प्रवृत्तमिति। यतोन्यथाभूतं तत्एव पुनः करणीयमित्यर्थः। समाप्ताविति। कर्मसमाप्तौ सत्यां व्यस्तकरणस्य ज्ञाने यावदेव व्यस्तं कृतं तावदेव पुनः करणीय मित्यर्थः। यस्तत्रेति। तत्र—पार्वणे ब्राह्मणेषु तृप्तेषु तिलवदन्न प्रकरः स इहातृप्तेष्वेव यववद्द्रष्टव्यः।

प्रागग्रेष्विति पूर्वाग्रेषु समूलेषु दर्भेषु यत्रोत्तर स्थानत्रये पातितेषु मूल मध्याग्रक्रमेणनवावनेजनानि दद्यादित्यर्थः। अक्षय्योदकेतिपार्वणे च अक्षय्यो-

दकदानं षट्सु च इति सामगात्रपरम् । यजुर्व्विदा न्तु नान्दीमुखे प्रीयता मित्यक्षय्यस्थान इति विशेषाभिधानात् । अमुकशर्म्मप्रीयतामित्यादि प्रयोगः सिद्ध्यतीति पारस्करः । आभ्युदयिके—युग्मा ब्राह्मणाः सम्मूलाश्च दर्भाः । प्राङ् मुखेषूदङ् मुखो दद्या दुदङ् मुखेषु प्राङ् मुखो वा । आश्वलायनः—शन्नोदेवी रित्यनुमन्त्रितासु अप्सु यवानावपति, यवोसि सोमदेवत्यो गोसवोदेवनिर्मितः प्रत्नमद्भिः पृक्तः पुष्टया नान्दीमुखान् पितॄन् लोकान् प्रीणाहिन स्स्वाहेति नान्दीमुखाः पितरः प्रियन्तामित्यपांग्रहणं विसर्जन ञ्च ।

विष्णुपुराणे ।

"दध्यक्षतैः सवदरैः प्राङ् मुखोदङ् मुखोपि वा ।
देवतीर्थेन वै पिण्डं दद्यात्कायेन वा पुनः ।"

याज्ञवल्क्यः । "कनिष्ठा तर्जन्यङ्गुष्ठ मूलान्यग्रं करस्यच ।
प्रजापति पितृब्रह्म देवतीर्थान्यनुक्रमात् ।"

"शाल्यन्नं दधिसंयुक्त वदराणि यवांस्तथा ।
मिश्रीकृत्वा तु चत्वारि पिण्डान् श्रीफल सन्निभान् ।
दद्यान्नान्दीमुखेभ्य स्तु पितृभ्यो विधिपूर्व्वकम् ।
कायं प्राजापत्यम् ।"

"अर्घ्यं पुष्पञ्च धूपञ्च प्रशस्त मनुलेपनम् ।
वासश्चाप्यहतं वस्त्रं देयञ्च सदसं समम्
द्राक्षामलकमूलानि यवांश्चाथ निवेदयेत् ।
तान्येव दक्षिणार्थेषु दद्याद्विप्रेषु सर्व्वदा ।"

चत्वारीति—चत्वारिवस्तून्येकीकृत्य पित्रान्दद्यादित्यर्थः । अर्घ्यमिति अर्घ्यंवस्त्रयोर्द्दानमधिकफलार्थम् । द्राक्षेति द्राक्षादीनि त्रीणि श्राद्धे देयानि । दक्षिणामपि देयानीत्यर्थः ।

अथाभ्युदयिक कालाः ।

कन्याया विवाहः पुत्रस्य प्रथमविवाहः नवगृहेप्रवेशः, वालकस्य नामकरणं उपनयनं जातकर्म्मं सीमन्तोन्नयनं यदि पिता क्षतादिवशान्नकरोति तदा

तत्पित्रादेराभ्युदयिकं संस्करणीय पितृवदन्येनकरणीयम्। यदि तु पिता नास्त्येव तदापुत्रस्य नामकरणे चूडाकरणे उपनयये कन्यायाश्च विवाहे आभ्युदयिकं तच्च नामकर्त्रा संस्करणीय वालकवत् कन्यावच्च करणीयम्।

पितरसत्वे तु पुत्रविवाहे आभ्युदयिकं नास्त्येव, तद्धि पुत्रविवाह निमित्तकम्। तेन—पितृ मात्राधिकारिकमेव।

ननु—"स्वपितृभ्यः पितादद्यात्सुत संस्कार कर्मणि।
पिण्डानोद्वाहनात्तेषां तस्याभावे तु तत्क्रमात्।"

इत्यनेन पितुरसत्वे तु कन्याविवाहवत् पुत्रविवाहे पितृकर्तृक माभ्युदयिकमायाति। तथा च तेनसह विरोधः स्यादिति चेत्। न। पुमांस्त्रियेत्यनेन सुतासुतयोर्विगृतयोः सुतैकशेषे पूर्ववदत्र चार्थपदान्वय स्तु सुतामात्रे योग्यतावलादिति सम्प्रदायः।

यत्तु जामातृरेव पितरि प्रमीतेसु विवाहे आभ्युदयिकमुक्तं तत्काम्यम्।

"नान्दीमुखेभ्यः श्राद्ध न्तु पितृभ्यः कार्यसिद्धये।
ततो विवाहः कर्त्तव्यः शुभः सुतप्रद इति।"

ब्रह्मपुराण वचनात्। आभ्युदयिकदिने ततः प्राक् सङ्कल्प्य गणपति दुर्गासहिताः षोड़श मातरः पूज्याः। तत आचम्य यथोक्तं विष्णु स्मृत्वा कुशोदकेन श्राद्धीयद्रव्याणि सिक्त्वा परभूमौ तत्पितृभ्यः श्राद्धाग्रंदत्वा नैमित्तिके अमुकर्मण्याभ्युदयिकश्राद्ध महङ्करिष्ये इति सङ्कल्प्य त्रिर्गायत्री तत्रापि छन्दोगश्चेत्, नमः स्वधायै स्वाहायै इतिव्युत्क्रमेण देवताभ्य इति त्रिर्जपेत्।

स्त्री शूद्रौ चेत्तदा नमः स्वाहायै स्वधायै देवताभ्य इति त्रिर्जपेतां ततस्स यव कुशोदकेन नमष्पदेन सर्वेप्यासनानि उत्सृजेयुः। तत ओं विश्वेदेवा स आगत श्रृणुतमे इमं हवं एदं वर्हिन्निषीदत। ओं यवोसि यवया स्मद्वेषो-यवया रातीरिति प्रदक्षिणं विकीर्य ओं विश्वेदेवाः श्रृणुतेमं हवं मो य अन्तरीक्षे य उपद्यविष्ठः। ये अग्निजिह्वा उतवाययत्रा आसद्यास्मिन्वर्हिषि

मादयध्वं ओषधयस्समवदन्त सोमेनसह राजा। न सहराज्ञा। यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसि।

"ओं आगच्छ न्तु महाभागा विश्वेदेवा महावलाः।
ये यत्र योजिताः श्राद्धे सावधाना भवन्तु ते।"

इति देवानावाह्य ओं उसन्तस्त्वानिधी मह्यु शन्त स्समधीमहि। उसन्तु शत आवह पितृन् हविषेअत्त वे। ओं एत पितरस्सोम्यासो गम्भीरेभिः। पथिभिः पूर्वणेभिः। दत्तास्मभ्यं द्रविणेह भद्रं रयिञ्चनस्सर्ववीरं नियच्छत!

"ओं आयन्तुनष्पितर स्सोम्यासो ऽग्निष्वात्ता पथिभिर्द्देवयानैः।
अस्मिन्यज्ञे स्वधया मदन्तोधि वुवन्तुतेवं त्वस्मान्।"

इत्यावाह्य—"ओं अपहता असुरा रक्षांसि वेदिषद" इतिदक्षिणावर्त्तेन यवान्विकीर्य द्वादशसु पात्रेषु पवित्रं धृत्वा---"ओं शन्नोदेवी रभीष्टय शन्नो भवन्तु पीतये शंयोरभिस्रवन्तु न।" इति देवतीर्थेन तेषु जलं दत्वा।

"ओं यवोसि यवयास्मद्द्वेषो यवयाराती" रिति देवार्घेषु यवान्दत्वा ओं यवोसि सोमदेवत्योगोसवोदेवनिर्मितः प्रत्नमद्भिः पृक्तः नान्दीमुखान् पितॄन् लोकान् प्रीड़ाहिनः स्वाहेति मात्राद्यर्घेषु नवसु यवान् प्रक्षिपेत्। ततो देवपूर्वं सर्घेसु गन्धपुष्पाणिप्रक्षिप्य ततष्प्रथमं देवार्घपात्रं वामहस्तेकृत्वा तत्रस्थ पवित्रं भोजनपात्रे निधाय तदुपरि किञ्चिज्जलान्तरन्दत्वा---"ओं यादिव्या आपष्पयसा सम्वभूवुर्याआन्तरीक्षा उत्पार्थिवीर्याः हिरण्यवर्णा यज्ञियास्तानआपः शिवाः सं स्योनाः सुहवा भवन्तु" इति पठित्वा।

कुशत्रय जवजलान्यदाय ओं विश्वेदेवाइदमर्घ्यं म्वो नमः। एवमेव पित्रादि देवेभ्योपि दद्यात्। मातामहादि देवेभ्योपि दद्यात्। ततो मात्रर्घं पात्रमादाय पवित्रं भोजनपात्रे निधाय तदुपरि किञ्चिज्जलान्तरन्दत्वा ओं यादिव्या इति पठित्वाकुशानादाय ओं अद्यामुकगोत्रे मातरमुकदेवि नान्दीमुखि इदन्तेर्घ्यंन्नमः। इति मात्रेर्घन्दत्वा पितामही प्रपितामहीभ्या मर्घन्दद्यात्। ततो यादिव्या आपइति पठित्वा ओं अद्यामुकगोत्र पितरमुकशर्मन्नान्दीमुख

इदन्तेर्घ्यं ये चात्र त्वानुयांश्च त्वमनुतस्मै ते स्वधा इति पित्रे र्घ्यन्दत्वा एवमेव पितामहादि पञ्चभ्योपि दद्यात्। ततः पितामहाद्यर्घपात्रस्थं संस्रवादि मात्रर्घपात्रे निधाय ततः प्रपितामहीपात्रस्थं मात्रर्घपात्रे निधाय एवमेव पित्राद्यर्घपात्राणांजलादि मेलनंकृत्वा एवं मातामहादि पात्राणां मेलनादिकृत्वा ततः ओं मातृभ्योनान्दीमुखीभ्यः स्थानमसीति मातुरर्घपात्रं न्यूब्जीकुर्यात्।

तत स्तदुपरि पितामह्या तदुपरि प्रपितामह्याःअर्घं न्यूब्जीकुर्यात्। ततः ओं पितृभ्यो नान्दीमुखेभ्यः स्थानमसीति पितृपात्रं तत स्तदुपरि तूर्ण्णीं पितामहार्घपात्रं न्यूब्जीकुर्यात्। एवमेव मातामहे अपि ततो गन्धादि दानम्। तत्र क्रमः ओं बिश्वेदेबा एतानि गन्धपुष्प धूप दीप ताम्बूलाच्छादनानि वो नम। एवं पितामहादि देवेभ्यश्च दद्यात्। ओं अद्यामुकगोत्रे मातः अमुकदेवि नान्दीमुखि एतानि गन्ध पुष्प धूप दीप ताम्बूलानि ते स्वधा।

एबमेव—पितामही प्रपितामह्योरपिदद्यात्। ओं अद्यामुकगोत्र पितरमुकशर्मन्नान्दीमुख एतानि गन्ध पुष्प धूप दीप ताम्बूल यज्ञोपवीताच्छादनानि ये चात्र त्वानुयांश्च त्वमनु तस्मै ते स्वधा। स्वधास्थाने स्वाहेति यदुक्तं तत्यागपरे स्वधाशब्दे अयन्तु न तथा अत्र तु मन्त्रएव त्यागपरः। एवमेव पितामहादि पञ्चभ्योपि दद्यात्। ततः पानीयेन सर्वासनानि भोजनपात्र सहितानि चतुष्कोण मण्डलेन वेष्टयेत्। ततस्सजले पूटकादौ हस्तेनैव सघृतमन्नं ओं स्वाहा सोमायपितृमते ओं स्वाहा अग्नये कव्यवाहनाय, इति स्वाहान्तेन होमः।

पश्चान्मन्त्रसमापनम्। भूस्वाम्यन्नं प्रागेवोक्तम्। ततोहुतशेषमन्नं देवपूर्वं सर्वपात्रेषु किञ्चित्किञ्चिद्दत्वा पितृपिण्डार्थं किञ्चिदवशेषयेत्। ततोन्यदन्यं यथासम्भवं सर्वपात्रेषु परिविष्य घृतं जलञ्च तत्रोपनीय ततोदेवपूर्वं सर्वान्नेषु घृतंयवांश्च दत्वा—उत्तानपाणिभ्यां प्रथमं देवपात्र मालभ्य ओं पृथिवीतेपात्रं द्यौरपि धानं ब्राह्मणस्यमुखेअमृते अमृतं जुहोमिस्वाहा—इति जपित्वा।

"ओंइदं विष्णुर्विचक्रमे त्रेधानिदधेपदम्।
ओं समूढ़मस्य पांशुले ओंविष्णोहव्यंरक्ष।"

इति पठित्वा—ओं इदमन्न मित्यन्ने, ओं इमाआप इत्यप्सु ओं इदं हविरिति घृते, आचारात्साङ्गुष्ठन्निवेश्य ओं विश्वेदेवा इदमन्नं सोपकरण म्वो नम इति कुशत्रय जव जलै रूत्सृज्य यद्येकमेवपात्रं भवति तदा—वामेन पाणिना पात्र-मालभ्य—ओं पृथिवीत इत्यादि। ओं इदं विष्णुरित्यादि च जपित्वा, ओं विष्णो कव्यं रक्ष इति पठित्वा ओं इदमन्नमित्यन्ने। ओं इमाआप इत्यप्सु, ओंइदंहविरिति हविषि साङ्गुष्ठ माचारान्निवेश्य—ओं अद्यामुकगोत्रे मातर-मुकदेवि नान्दीमुखि इदमन्नं सोपकरणन्ते नमः। एवं पात्रालम्भादिपूर्वकं पितामही प्रपितामह्यो रप्युत्सृजेत्।

एवं पितृपात्रमालभ्य—ओं पृथिवीत इतिपठित्वा पूर्ववत् सर्वं कृत्वा—ओं अद्यामुकगोत्र पितरमुकशर्मन्नान्दीमुखि इदमन्नं सोपकरण न्ते नमः इति पित्रे-न्नमुत्सृज्य एवमेव पितामहादि पञ्चभ्योपि उत्सृजेत्। ततो गायत्रीं त्रिर्ज-पित्वा मधुमधु मध्वीति च ततोन्नहीनमिति च पुनर्गायत्रीं त्रिर्जपित्वा कुशेषूप विश्यततो मधुमधु मध्वीति जपेत्।

तत स्सोम सामादि जपेत्। ततः प्रागग्र कुशत्रयं भूमावास्तीर्यं जलेन द्विः प्रोक्ष्य जलप्रोञ्छितं सयव घृतमन्नं ओं अग्निदग्धाश्च ये जीवा येप्यदग्धा कुले मम। भूमौदत्तेन तृप्यन्तु तृप्तायान्तु पराङ्गतिम्। इतिमन्त्रेण कुशो-परि विकिरेत्। तत आचम्य हरिं स्मृत्वा - त्रिर्गायत्रीं मधुमधु मध्वीति च जपेत्। ततः पूर्वाभिमुखीभूय चतुरम्वा पिण्ड योग्यां भूमिं परिष्कृत्य उत्तरो-त्तरक्रमेण स्थानत्रये प्रादेशमात्रं परिमाय तत्र—प्रागग्र दर्भपिञ्जलीमूलेन ओं अपहता असुरारक्षांसि वे दिषद इतिमन्त्रेण रेखात्रयं कुर्यात्। तदुपरि प्रत्येकं समूलान् वहून् कुशानास्तीर्यं, ओं देवताभ्य इति त्रिर्जपित्वा ओं एत पि-तरस्सोम्यासो गम्भीरेभिः पथिभिः पूर्व्येणभिः। दत्तास्मभ्यं प्रविणह भद्रं रयिञ्चनः सर्वरी रन्नियक्षत—इत्यावाह्य प्रत्येकमबनेजनन्दद्यात्। तत्र क्रमः जलं यवं गन्ध पुष्पैर्नव पाणि पूरयेत्।

एकंपात्रं वामहस्तेकृत्वा कुशादीन्यादाय ओं अद्यामुकगोत्रे मातरमुकदेवि नान्दीमुखि अत्रावने विक्ष्व ते नमः। इति सवदक्षिण कुशमूले सर्वमवनेजनं दद्यात्। ततो जलं स्पृशेत्। एवमेव पात्रान्तर मादाय ततः कुशमध्ये पि-

तामह्यै तथैव तत्कुशाग्रे प्रपितामह्यै अवनेजनं दद्यात्। सर्वत्र अवनेजनानन्तरं जल स्पर्शः।

ततः चतुर्थपात्र मादाय कुशादींश्चादाय ओं अद्यामुकगोत्र पितरमुकशर्मन्नान्दीमुखात्रावने निक्ष्व ये चात्र त्वानु यांश्च त्वमनु तस्मै ते स्वधा इति मध्यस्थितमूलेपित्रे तथैव तत्कुशमध्ये पितामहाय तथैव तत्कुशाग्रेषु प्रपितामहाय तथैव उत्तरतः स्थित कुशमूले मातामहाय तथैव तत्कुशमध्ये प्रमातामहाय तथैव तत्कुशाग्रेषु बृद्धप्रमातामहायावनेजनन्दद्यात्। सर्वत्र जलस्पर्शः। ततो यव दधि वदर घृत मधुमिश्रान्नवपिण्डान्निर्माय—एकपिण्डं कुशादींश्चादाय ओं अद्यामुकगोत्रे मातरमुकदेवि नान्दीमुखि एषतेपिण्डोनम इति तदवनेजन स्थाने वामान्वारब्ध दक्षिणकरेण दद्यात्, ततो जलस्पर्शः।

एवमेव तत्तदवनेजनस्थाने पितामही प्रपितामह्योरपि दद्यात्, ततश्चतुर्थपिण्डमादाय ओं अद्यामुकगोत्र पितरमुकशर्मन्नान्दीमुख एषते पिण्डो ये चात्र त्वानुयां श्च त्वमनु तस्मै ते स्वधा। इति तदवनेजनस्थाने पित्रे पिण्डन्दद्यात्। ततो जलं स्पृशेत्।

एवमेव तत्तदवनेजन स्थाने पितामह प्रपितामह मातामय प्रमातामह बृद्धप्रमातामहेभ्य श्च दद्यात्। सर्वत्र पिण्डदानानन्तरं जलस्पर्शः। ततः पित्रादि दर्भमूले करौ प्रोंछय द्विराचम्य हरिं स्मृत्वा पिण्डपात्र प्रक्षालन जलेन पूनरवनेजयेत्, तत्रापि प्रत्यवने जनानन्तरं प्रत्येकं जलस्पर्शः। ओं अत्र मातरो नान्दीमुख्योमादायध्वं यथाभाग मावृषायध्वमिति पठित्वा उदङ्मुखीभूय स्वासं नियम्य तेनैवपथा परावर्तमानः ओं अमीमदन्त मातरो नान्दीमुख्यो यथाभाग मावृषाइबतू, ततोनीवीं विश्रंस्य, आचम्य हरिंस्मृत्वा वामेन पाणिना घृतं सूत्रं दक्षिणेनादाय ओं एतद्वो मातरो नान्दीमुख्यो वास इति पितृपिण्डे सूत्रं घृत्वा ओं अद्यामुकगोत्रे मातरमुकदेवि नान्दीमुखि एतत्ते वासो नमः जलस्पर्शः।

एवं पितामह्याः प्रपितामह्या अपि। तत ओं एतद्वः पितरो नान्दीमुखा वास इति इति पितृपिण्डे सूत्रं घृत्वा —ओं अद्यामुकगोत्र पितरमुकशर्मन्नान्दी-

मुख एतत्ते वासो ये चात्र त्वानु यांश्च त्वमनु तस्मै ते स्वधा इतिवामान्वारभ्ध दक्षिणकरेण दद्यात् । ततो जलस्पर्शः । एवमेवापरेभ्यष्पञ्चभ्यः ततो गन्धैः पुष्पैः धूपैः ताम्बूलैः प्रत्येकं पिण्डानभ्यर्च्य तता षडृतुन्नमस्कुर्यात् ।

"ओं वसन्ताय नमस्तुभ्यं ग्रीष्मायच नमोनमः ।
वर्षाभ्यश्च सरत्संज्ञ ऋतवेच नमः सदा ।
हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च ।
मास सम्वत्सरेभ्यश्च दिवसेभ्योनमः सदा ।"

इतिमन्त्रेण ओं स्व प्रोक्षित मस्त्वित्यद्भिः संप्रोक्ष्य ओं शिवा आप स्सन्त्विति जलं ओं सौमनस्य मस्त्विति पुष्पं, ओं अक्षत ञ्चारिष्टमस्त्वितिअक्षतान्, प्रत्येकं पात्रे निःक्षिप्य यवोसीतियवान् देवपात्रे दद्यात् । ओं अद्यामुकगोत्राया मातुरमुकदेव्या नान्दीमुख्या दत्तैतदन्व पानादिक मक्षय्य मस्त्विति पित्रे दद्यात् । एवं पितामहादि पञ्चभ्यो दद्यात् । ओं अघोरा मातरोनान्दीमुख्यास्सन्तु । ओं अघोराष्पितरो नान्दीमुखास्सन्तु इति पठेत् । ओं गोत्रन्नोवर्द्धतां ओं नान्दीमुखाष्पितरः प्रीयन्तामिति वदेत् । ततः सर्वत्र पिण्डोपरि सपवित्रान् कुशानास्तीर्य ओं ।

"ऊर्जम्वहन्ती रमृतं घृतं पयष्कीलालं परिश्रुतम् ।
स्वधास्थ तपयत मे मातृन्नान्दीमुखीः ।"

इति मात्रादि पिण्डोपरि पित्रादीनां मातामहादीनाञ्च पिण्डोपरि पितृन्नान्दीमुखानित्यन्तेन पूर्वमन्त्रेण दक्षिणाग्रां जलधारान्दद्यात् । ततष्पिण्डानुत्थाय अर्घपात्रान्युत्तानीकृत्य—ओं विश्वेषांदेवानां कृतैतदाभ्युदयिकश्राद्ध प्रतिष्ठार्थं मेतानिद्राक्षामलकमूलानि वनस्पतिदैवतानि यथानामगोत्राय ब्राह्मणाय दक्षिणा महन्ददे ।

एवं—पित्रादित्रिक् मातामहादित्रिक् सम्वर्द्धिनीं विश्वेदेव दक्षिणान्दद्यात्, ओं अद्यामुकगोत्राया मातुरमुकीदेव्या नान्दीमुख्याः कृतैतदाभ्युदयिक श्राद्ध प्रतिष्ठार्थ मेतानि द्राक्षामलक मूलानिवनस्पतिदैवतानि इत्यादि । एवं पितामही प्रपितामह्योरपि, ओं अद्यामुकगोत्रस्य पितुरमुकशर्मणोनान्दीमुखस्ये-

त्यादि। एवमेव पितामहादिपञ्चकश्राद्धे दक्षिणान्दद्यात्। एतदभावे यवान्दद्यात्। तत्र वाक्ये एतान् यवान् प्रजापतिदेवतानिति प्रयोगष्कार्यः। तत।

"ओं दातारोनोभिवर्द्धन्तां वेदास्सन्तति रेवच।
श्रद्धा च नो मा व्यगमद्बहुदेयञ्चनो अस्तु।
अन्नञ्चनो वहुभवे दतिथींश्च लभेमहि।
याचितारश्च नः सन्तु माच याचिष्म कञ्चन।
एतास्सत्याशिखस्सन्तु।"

तत—ओं देवताभ्य इति त्रिर्जपित्वा ततो वामदेव्य सामंगीत्वा—दक्षिणपाणिना दीपं निर्वाप्य हस्तौ पादौ प्रक्षाल्य द्विराचम्य विष्णु स्मरेदिति यजमानो वैश्वदेवाधिकारीचे त्तदा वैश्वदेव वलिकर्मणीकुर्यात्।

अथ—वाजसनेयिनां पार्वण श्राद्ध प्रयोगः।

श्वः श्राद्धं करिष्यमाणो रजकद्वारा धौतोत्तरीये क्षारेण दन्त गात्र शिरो मलान्यपकृष्य स्नात्वा निरामिषमेकवारं भुञ्जीत्, ततः श्राद्धदिने प्रातः शुचिवस्त्रयुगेन स्नायीत्, श्राद्धार्थं देशे शुचौ केशास्थि शर्करेष्टकादि युतांपङ्किलां स्रवञ्जलां कृमियुतां सङ्कयं दुर्गन्धिम् अनिष्टशब्दां भूमिं परिहरेण अस्वामिकां स्वकीया म्वा—अटव्यः पर्वताः सर्वेनदीप्रवाहां उभयतश्चतुर्हस्तावच्छिन्ना देशाः पुण्यानिपुरुषोत्तमादीन्यायतनानि सर्वाणि प्रयागादीनि क्षेत्राणि दण्डकादीन्यरण्यानि महानदीनां तुङ्गादीनांगर्भं स्तदुपरि शनहस्तं तीरं तदुपरि उभयतः गङ्गायाः क्षेत्र—एतत्सर्वं मात्स्यन्यायेन राजादीना मुररीकृतमपि, अस्वामिकमेव।

यत्तु—परिवेषणा दर्वाक् तद्दानम्, तन्न। अनङ्गव्यवायापतेः। न च—छत्रोपानह दानवदिद मप्यस्तु, तत्र—तथैव प्रयोग विधेः। अत्र तु तदभावात्, श्राद्धभूमि पंचपाकस्थानं वेष्टयित्वा छागान् वन्धयेत्, तिलाश्च विकरेत्। श्राद्धभूमि पंचगव्येनोपलिप्य ज्वलदङ्गारैस्सं शोध्य गौरमृत्तकयाच्छाद्य वेष्टयित्वातिलैस्सर्षपैश्च विकरेत्।

वाराणस्यामयं भूसंस्कारोनास्ति।

"मेदसा बिप्लुता भूमि रविमुक्ते विवर्जिते।"

इति मत्स्य पुराणात्। गोमयोपलेपनं तत्रापि। श्राद्धदिन एव स्वयं शिष्य-द्वारा वा साग्रान् समूलान् दक्षिण प्लवणान् दर्भान् दक्षिणदिकस्थानाहरेत्। तथा तीर्थादीना मापो निर्दोषाः। ततो मध्याह्ने—पाकारम्भः पाणिगृहीती द्वारा-स्वयं वा सपिण्ड द्वारा वा वेद्यान्तु यत्प्रवेश्यं तदुत्तरदिशा, यन्निस्सार्यं तद्द-क्षिण दिशा। अथ—पाकेवृत्ते दक्षिणामुखः पादौ प्रक्षाल्य प्राङ्मुख ऐशान्या-भिमुखो वा द्विराचम्य श्रोत्रवन्दनङ्कृत्वा वेदींप्रविश्योपविश्यसिद्धमिति पाचिकां पृष्ट्वा तिलतैलेन प्रत्यासन्न समीपं दीपान्दत्वा द्विभुजं पीतवाससं शंखचक्रधरं विष्णुं ध्यायेत्।

ततः कुशत्रयेण श्राद्धीयद्रव्याणि तूष्णी मासिच्य ओं अमुक समये पार्व णश्राद्धमहङ्करिष्ये। इति शिष्टाचारपरिप्राप्तं सङ्कल्पं कुर्यात्। ततष्पर-भूमौ ओं इदमन्नं भूस्वामि पितृभ्योनम इति मोटक तिल जलैरपसव्येन दद्यात्। ततस्सव्येन दक्षिणानाभिकाधृत सुवर्ण रजत कुशत्रयः सकुशवटुः प्रणवद्वय मध्य-स्थां सव्याहृतिकां गायत्रीं देवतास्य इति त्रिजपेत्।

तत उत्तराभिमुखः ओं विश्वेदेवा इदमासनम्भ्वोनमः। इति कुशत्रय यव जलैः पूर्वाग्रं कुशत्रयं देवासनयोर्मध्ये दक्षिणमासनम्। ऐव मेवोत्तारासन मपि दद्यात्। ततो दक्षिणामुखः प्राचीनावीती भूगत वामजानुः ओं अद्यामुक गोत्र पितरमुकशर्मन्निदमासनन्ते स्वधा। इति द्विभग्न कुशत्रय तिल जलैर्द्वि-गुणभुक्त कुशत्रयामेकमासनन्दद्यात्। एवमेव पितामहा दिभ्यः पञ्चभ्यः। ततः सव्येन ओं विश्वेदेवा स आगत श्रुणुताम इमं हवं, एदं वर्हिन्निषीदत्। "ओं यवोसियवया स्म द्वेषो यवयारातीरिति लवान्विकीर्य ओं विश्वेदेवः श्रुणु तेमं हवम्मे ये अन्तरीक्षेउपद्यविष्ट।

"ये अग्नि जिह्वा उतवा ययत्रा आसद्याग्मिन्वर्हिषि मादयध्वम्।"

"ओं आगच्छन्तु महाभागा विश्वेदेवा महावलाः।
ये यत्र योजिताः श्राद्धे सावधाना भवन्तु ते।"

ततोपसव्येन दक्षिणामुखः—

"ओं उशन्तस्त्वानिधी मह्‌युसन्तस्सम धीमहि ।
उशन्तशत आवह पितॄन् हविष्ये अत्त वे ।"

ओं अपहृता असुरा रक्षांसि वे दिषद इतिभूमौवामावर्त्तेन तिलान्विकरेत् । ततः-

"ओं आयन्तुन ष्पितर स्सोम्यासोग्निष्वात्ताः पथिभिर्द्देवयानैः ।
अस्मिन्यज्ञे स्वधया मदन्तोधि बुवन्तुतेवन्त्वस्मान् ।"

इति जपेत् । ततस्सव्येन देवार्घयो रपसव्येन पित्रर्घेषु दर्भपिञ्जली धृत्वा— तत ओं—

"शन्नोदेवी रभीष्टय आपो भवन्तुपीतये ।
शंयोरभिस्रवन्तुन ।"

इति पठित्वा देवार्घेजलन्दत्वा पुनः पठित्वा—अपर देवार्घे जलन्दद्यात् । ततोपसव्येन इममेव पठित्वा पित्रार्घे जलम् । तथैव पितामहाद्यर्घपञ्चकेपि जलन्दद्यात् । तत स्सव्येन—"ओं यवोसि यवया स्मद्द्वेषो यवयाराती" रिनि देवार्घयो र्यवान् ततोप सव्येन—

"ओं तिलोसि सोमदेवत्यो गोसवोदेव निर्मितः ।
प्रत्न मद्भिः पृक्त स्स्वधया पितॄन् लोकान् प्रीड़ाहिनस्वाहा ।"

इति पठित्वा पित्रर्घे तिलान्, एवं पितामहाद्यर्घ पञ्चकेपि तिलान्दद्यात् ।

ततस्सव्येन देवार्घयो स्तूष्णीं गन्धान् ।

अपसव्येन पित्रार्घे तूष्णीं गन्धान्दत्वा सव्येनदेवार्घयोः प्रत्येकं पुष्पाणिदत्वा अपसव्येन पित्राद्यर्घेषु पुष्पाणि दद्यात् । ततस्सव्येन देवपात्रे पूर्वाग्रां पिञ्जलीन्दत्वा तत्रोदकान्तरन्दत्वा ।

"ओं यादिव्या आपष्पयसा सम्वभू वूर्याआन्तरीक्षा उतपार्थिवीर्याः ।
हरिण्यवर्णा यज्ञियास्तान आपः शिवा शं स्योनाः सुहवा भवन्तु ।"

इति पठित्वा—ओं विश्वेदेवा एषवोर्घोनम इति कुशत्रय जव तिलैः पित्रादि देवेषु अर्घन्दद्यात् ।

एवमेव मातामहादि विश्वेदेवार्घदानम् । अनयो श्चार्घयो र्न स्थापनम् । नवा उत्थापनम् । ततोपसव्येन पित्रर्घपिञ्जलीं पितृपात्रे निधायउदकान्तरन्दत्वा ओं यादिव्या इत्यादि मन्त्रं पठित्वा ओं अद्यामुकगोत्र पितरमुकशर्मन्नेषतेर्घस्स्वधा । इति मोटक तिल जलै रूत्सृज्य किञ्चिज्जलं पवित्रोपरि दत्वा पवित्र मर्घपात्रे निधाय धारयेत् । एवमेव पितामहाद्यघ पञ्चकमपि । ततः पितामहार्घ पात्रस्थ जल पुष्प पवित्राणि पित्रर्घपात्रे निधाय प्रपितामहाघ जल पुष्प पवित्राण्यपि पित्र्यर्घपात्रे निधाय ततष्पित्रासन पश्चिमे ओं पितृभ्य स्थान मसीतिपित्रर्घपात्रं न्यूञ्जीकुर्यात् । तदुपरि पितामहपात्रं तूष्णीं न्यूञ्जी कुर्यात् ।

एवमेव मातामहादि पात्रेपि कुर्यात् । ततस्सव्येन ओं विश्वेदेवा एतानि गन्ध पुष्प धूप दीप ताम्वूल यज्ञोपवीत वासांसि वो नमः । एवमेव मातामहादि देवेषु दद्यात् । ततोपसव्येन दक्षिणामुखः ओं अद्यामुकगोत्र पितरमुकशर्मन्नेतानि गन्ध पुष्प धूप दीप ताम्वूल वासांसि ते स्वधा । इति मोटकतिल जलैर्द्द द्यात ।

एव मेवापरेभ्योपि पञ्चभ्यः ।

ततस्सव्येन देवयोरेकं अपसव्येन पितृणामपरंमण्डलं चतुष्कोणं कुर्यात् । ततोपसव्येन घृताक्तमन्नं व्यञ्जन मादाय दक्षिणानामिकायांकुशत्रयं घृत्वा—सुवर्ण रजतत्र्यां ओं अग्नयेकव्यवाहनायस्वाहा, इत्येकां, ओं सोमायपितृमतेस्वाहा इत्यपरा माहुतिं जले जुहुयात् । तदुक्तं सजघनेन गार्हस्पत्येन प्राचीनावीतीभूत्वादक्षिणासीन इत्युपक्रम्य स उद्वास्य द्वे आहुती जुहोति । सजुहोत्यग्नये कव्यवाहनायस्वाहा सोमायपितृमते स्वाहेति पिण्डपितृयज्ञे शतपथदर्शनात् । पिण्डपितृयज्ञ वन्धुत्वेति पार्वणे कात्यायने नोक्तः । अत्र प्राचीनावीतीत्वमेव ।

एव मेव हरिहर हलायुध कर्क वासुदेवादयोपीति । मैथिला स्तु शतपथादर्शिनः पितृभक्तिलिखनेन सव्यमत्र कुर्वते । मैथिला इदानीं भूस्वाम्यन्नमाच-

रन्ति। अत्र च मयोक्तः श्राद्धकलादि विरोधः स्फुटएव, ततोहुतशेषंपितृपात्रे षट्सु अपसव्येन दद्यात्। अग्नौकरणशेष न्तु पितृभ्यः प्रतिपादयेदिति विशेषवचनात्। अग्नौकरणस्य पितृपिण्ड यज्ञान्तर्गतत्वेन पित्र्यकर्मत्वात्।

मैथिला स्तु—"प्रतिपाद्यपितॄणान्तु दद्याद्वैश्वदैविक" इतिवचन स्वरसात्। पितृदानानन्तरं देवे दानं निषिद्धम् मनुना। देवे दत्वा पितृपात्रे ददाति तत स्सव्यञ्जनमन्नं सव्येन देवे प्रत्येकं परिविष्य, अपसव्येन प्रत्येकंपित्रादि पात्रेषु सव्यञ्जनं परिविष्यात्। परिवेषणेत्वयं प्रकारः यदन्नादिपूरितं पात्रं पाणिभ्यामादाय पित्रादिसमीपे मनाक् धृत्वा वामान्वारब्ध दक्षिणकरेण परिवेषणं केवलहस्तेन किमपि न दद्यात्। ततस्सव्येन देवान्नयो रपसव्येन पित्रन्नेषु मधुदद्यात्। ततस्सव्येन दक्षिणहस्तेन मधुमय देवान्नमालभ्य मधुवातेत्यादि माध्वीर्गावो भवन्तुन इत्यन्तं मन्त्रं देवयोः प्रत्येकं पठित्वा तत उत्तराभिमुखः सव्येन ऋजूतान् हस्ताभ्यां पितृदेवान्नपात्र मालभ्य ओं "पृथिवीतेपात्रं द्यौरपिधानं ब्राह्मणास्य मुखेअमृते अमृतं जुहोमिस्वाहा।"

"ओं इदं विष्णुर्विचक्रमे त्रेधानिदधे पदम्। समूढमस्य पांसुले" ओं विष्णूहव्यं रक्ष, इति पठित्वा ओं इदमन्न मित्यन्ने, ओं इमाआप इत्यप्सु, ओं इदंहविरिति सर्ववस्त्वभिप्रायेण, घृतादौ क्वचिदाचारात् स्वदक्षिणाङ्गुष्ठमपि संयोज्य "ओं यवोसि यवया स्मद्वेषो यवयाराती"रिति यवान्विकीर्य—ओं विश्वेदेवा इदमन्नं सोपकरणं वोनम इति कुशत्रय जव जलै रुत्सृजेत्।

एवं मातामहादि देवान्नमप्युत्सृजेत्। ततोपसव्येन दक्षिणामुखो व्यत्यस्तानुत्तान पाणिभ्यां पितृपात्रमालभ्य ओं पृथिवीतेपात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमिस्वाहा। ओं इद विष्णुर्विचक्रमे इत्यादि वैष्णव्या कारा ओं विष्णोहव्यं रक्षेति यजुषा वा, आचारादङ्गुष्ठंस्वीय मेवान्नादौ नियोज्य एवमेव पितामहादि पञ्चभ्यो प्युत्सृजेत्। ततो दक्षिणानाभिकायां सुवर्ण रजत कुशत्रयंकृत्वा पूर्ववत्, त्रिर्गायत्रीं जपित्वा ततो मधुमतीस्तिस्रः ततो मधु मधु मध्विति जपित्वा—

"ओं अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत्।
तत्सर्वमच्छिद्रमस्तु इति जपेत्"॥

ततः पूर्ववत्त्रिर्गायत्रीं जपित्वा कुशेषूपविश्य तिस्रो मधुमतीः मधुमधु मध्विति जपेत् । पितृभक्तौ तु अत्र प्रथमो गायत्री मधुमती मधुमधु मध्विति च जपेत् ततः पुरुषसूक्त शतरुद्रीयादीन जपेत् । ततो पितामहोच्छिष्ट सन्निधौ आस्तृत दक्षिणाग्र कुशत्रयां भूमिप्रोक्ष्य सर्वप्रकारमन्नं समन्वीय सतिल माप्लाव्य—

"ओं अनग्निदग्धा ये जीवा ये प्रदग्धाः कुलेमम ।
भूमौ दत्तेन तृप्यन्तु तृप्तायान्तु पराङ्गतिम्" ॥

इति मन्त्रेण अगतीन् दासादीनुद्दीश्य विकरेत् ।

ततः सव्येन प्रायश्चित्त रुपं सकृदाचमनं कुर्यात् । हरिं स्मरेत् ततोपसव्येन दक्षिणानाभिकाधृत सुवर्ण रजत कुशत्रयं त्रिर्गायत्रीं तिस्रोमधुमतीः मधुमधु यध्विति च जपित्वा अनामिकातः कुशानपसार्य पित्रार्थं पूर्व पश्चिमक्रमेण पिण्डद्वयं दक्षिणप्लवं यजमानहस्तन्निर्माय उभयत्र मध्यदेशे वामहस्तेन दर्भपिञ्जली मादाय ततो दक्षिणहस्तेनादाय—ओं अपहता असुरारक्षांसि वेदिषद इति मंत्रेण सव्योपगृहीत दक्षिणकरेण पश्चिम पिण्डिकायां ततः पूर्व पिण्डिकायां दक्षिणाग्रां रेखां कुर्यात् । दर्भपिञ्जली मुत्तरतः क्षिपेत् ।

ततो रेखयोः—ओं येरुपाणीति मन्त्रेणोल्मुकं कुर्यात् । तत उपमूलसकृन्मूलाम् दक्षिणाग्रां त्रीन् कृशान् पितृपिण्डरेखायां तथैव मातामह पिण्डरेखायामपि संस्तरेत् ततस्सव्येन पवित्रपाणिर्द्वेवताभ्य इति त्रिर्जपेत् । ततोपसव्येन षट्सु पुटकेषु पितृतीर्थेन जलं तथैव तिलान् तथैवगन्धं तथैव पुष्पाणि क्षिपेत् ।

ततः प्रथमं पात्रं वामहस्तेनोद्धृत्य दक्षिणहस्तेनादाय ओं अद्यामुकगोत्र पितरमुक शर्मन्नत्रावने निक्ष्व ते स्वधेति मोटक तिल जलै रुत्सृज्य आस्तृत छिन्न मूलानां प्रथमभागे पितृतीर्थेन किञ्चिज्जलं दद्यात् । एवमेव पितामहाय, मध्ये प्रपितामहायाग्रे दत्वा, मातामह प्रमातामह बृद्धप्रमातामहेभ्यो—मूल मध्याग्रेषु दद्यात् । तद्यथा ओं अद्यामुकगोत्र पितरमुक शर्मन्नेषते पिण्डः स्वधा । एवं षडपि दद्यात् । ततः पित्रादि कुशमूलेषु प्रपितामहादूर्द्ध्वं त्रयाणां तृप्तिमुद्दिश्य दक्षिणकरं संमृज्य सव्येन द्विराचम्य हरिं स्मृत्वा अपसव्येन ओं अत्रपितरो मादयध्वं यथाभाग मा वृषायध्वमिति पठित्वा वामावर्त्तो नोदङ्मुखीभूय धृत-

श्वासः। क्लान्ति पर्यन्तं श्वासं नियमयन् तेनैव पथा परावर्त्तमानः सर्वान् पितृन् परितुष्टान् भास्वर मूर्त्तिं ध्यायन्—

"ओं अमीमदन्त पितरो यथाभाग मावृषा इषत्"।

इति जपेत्। तत श्वासं त्यजेत्।

ततोऽवनेजनशेष जलेन पूर्ववत्प्रत्यवने जयेत्। ततो नीवीं विश्रंस्य सव्येन हस्तं प्रक्षाल्य आचम्य दक्षिण श्रवणं स्पृष्ट्वा ततोपसव्येन

"ओं नमोवः पितरो रसाय नमोवष्पितरश्शोषाय
नमोवष्पितरो जीवाय नमोवष्पितरस्स्वधायै
नमोवष्पितरो घोराय नमोवष्पितरो मन्यवे"।

इति वसन्तादि षड्तरुपतया पितृन्नमस्कृत्य। नमोवो गृहान्नः पितरो दत्तेति पितृन् वरं प्रार्थ्यं सतोवः पितरो द्वेष्मेति यत्तोभ्योदेयम्, सुश्राव्य ओं एतद्वष्पितरोवास इतिपठित्वा पितृपिण्डोपरि सूत्रन्दत्वा औत्सर्गिक काण्डानुरोधात् ओं अद्यामुकगोत्र पितरमुकशर्मन्नेतत्तो वासः स्वधेति सूत्र मुत्सृज्य— तत एवमेव एतद्वष्पितरोवास इति पितामह पिण्डोपरि सूत्रं दत्वा एवमेवोत्सृजेत्। एवमेव सर्वत्र, ततः पिन्डेषु पितृनुद्दिश्य तूष्णीं प्रत्येकं गन्धं तथैव पुष्पं धूपं दीपं तथैव ताम्बूलं दद्यात्, ततस्सव्येन ओं शिवा आपस्सन्त्विवति देवयोष्प्रत्येकं जलन्दत्वा अनेनैव मन्त्रेण पितृपात्रेषु प्रत्येक मपसव्येन जलन्दद्यात्। एवमेव ओं सौमनस्य मस्त्विवति मन्त्रेण पुष्पाणि, ओं अक्षतं चारिष्टमस्तुत्यक्षतान्, यवोसि यवयास्मद्वेषो यवयारातीरिति देवयो र्यवान् दत्वा अपसव्येन— ओं अद्यामुकगोत्रस्य पितरमुकशर्मणो दत्तैतदन्न पानादिक मक्षय्य मस्त्विवत्युत्सृजेत्।

एवं सर्वत्र ततः सव्येन प्राङ्मुखो दक्षिणान्दिशं पश्यन्, ओं अघोराष्पितरस्सन्त्विवति वदेत्। ततः—

"ओं गोत्रन्नोवर्द्धतां दातारोनोभिवर्द्धन्तां वेदास्सन्तति रेवच।
श्राद्धाचनोमाव्यगमद्वहुदेयञ्चनो अस्तु।
अन्नञ्चनो वहुभवे दतिथीञ्च लभेमहि।
याचितारश्च नस्सन्तु माच याचिष्म कञ्चन।
एताः सत्याः शिषस्सन्तु।" इतिवदेत्। ततोपसव्यंकृत्वा सपवित्रान्

दर्भान् पितृपक्षे मातृपक्षे च पिण्डोपरि धृत्वा ।

"ओं ऊर्जम्वहन्ती रमृतं घृतं पयष्कीलालं ।
परिश्रुतं स्वधास्थ तर्पयत मे पितृन् ।"

इतिमन्त्रेण मूलादग्रपर्यन्तं वारिधारां प्रदाय पिण्डानुत्थाप्य मध्यमंपिण्डं ऋतुस्नातायै पुत्रकामायै प्राशितुं प्रदाय शेषौ पिण्डौ यतोनीतौ तत्र निधाय यजमानो जिघ्रति ।

ततो मध्यमं पत्नी प्राश्नाति । पुत्रकामा अवधार्य जिघ्रति । मध्यम पिण्डं पत्नी प्राश्नाति । पुत्रकामेति कात्यायनसूत्रशेषात् अवधायेतियतो नीतौ प्रथमशेषौ निधायेति कर्क हरिहरव्याख्या । ततष्पिण्डाधारकुशान् तत उल्मुकंसश्रौताग्नि दक्षिणाग्नौ स्मार्ताग्निः प्रणीतायां निरग्नि र्लौकिकाग्नौ क्षिपेत् ।

ततः षडर्घ्यपात्राण्युत्तानीकृत्य दक्षिणान्दद्यात् । तद्यथा—ओं अद्य विश्वेषां देवानां कृतैतत्पार्वणश्राद्धप्रतिष्ठार्थमिदं हिरण्यमग्निदेवतं यथानामगोत्राय ब्राह्मणाय दक्षिणामदन्ददे । एवमेव द्वितीय विश्वदेवेपि, ततोपसव्येन ओं अद्यामुकगोत्रस्य पितुरमुकशर्मणः कृतैतत्पार्वणश्राद्धप्रतिष्ठार्थ मिदं रजतं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणामहन्ददे । एवमेवापरपञ्चभ्योपि दक्षिणान्दद्यात् । यद्यप्युत्सर्गे नायं ददातिप्रयोगः उत्सर्गस्यापि देशितत्वात् । "प्रदद्याद्दक्षिणां यज्ञ" इति श्रवणात् । दानञ्च नेदं सम्प्रदानविरहात् । श्राद्धभुग्ब्राह्मणइह सम्प्रदानम् । सचापात्रकेनास्ति, ऋत्युजएव तद्दानश्रुतेः ।

अन्यथा—सत्रेपि दक्षिणादानमीदृशं स्यात् । अस्तु तर्ह्यपात्रके दक्षिणावाधएव । मैवम् । हतोयज्ञस्त्वदक्षिण इति निन्दाश्रवणात् । तस्मादत्रानन्यगत्या ऽनृत्विकेपि दक्षिणादानम् । सत्रे तु नैवम् ईदृश निन्दार्थवाद विरहादिति ।

अनेनैव विधिना आश्विनापरपक्षे चतुर्द्दशीवर्जं सर्वस्मिन्नेव दिवसे अनिषिद्धकाले एकमेकं पार्वणं कर्त्तव्यम् शुचिना जीविना विदुषा शरीरादि शक्ति-

मता शक्तिह्रासे तु पञ्चमीतः तपोपि शक्तिह्रासे दशमीत इति यथा शरदि शुक्लपक्षे व्रीहिपाकसमये पार्वणम् तत् । नवैर्व्रीहिभि स्तदभावे पुराणैरपि तदभावे पुराण शालिभिरिति क्रियाया नित्यत्वात् । द्रव्यस्य च गुणत्वात् । गुणलोपेन प्राधान्यस्य लोप इति वचनात् ।

एवं एकादशसु अमावास्यासु एवं वृश्चिकेशुक्लपक्षे कल्पः । त्रयोदशांशादर्वाक् हरिशयना दुत्तरतः शालि संस्कारकं पार्वणम् । अकृताग्रयणस्य धान्यजातस्याकर्मण्यत्वप्रतिपादनात् । नच शरत्कृत्यस्यैव व्रीह्याग्रयणस्य वृश्चिक शुक्लपक्षेनुकल्पः । तथाऽश्रवणात् अस्य च शाल्याग्रयणस्येदानींपाते माघशुक्लपक्षेप्यनुष्ठानम् नित्यस्य मुख्यकालेऽननुष्ठाने गौणकालेप्यनुष्ठानस्य हरिहर पद्धत्यादौ विहितत्वात् ।

अतएवातीत मप्युपासीतेति सायं सन्ध्यावन्दने श्री श्रीदत्तोपाध्याया अप्याहुः । पूर्वाग्रयणानु कालस्तु उत्तराग्रयण पर्यन्तम् तथा अग्रयण माघश्रावण पूर्णिमासु नित्यंपार्वणम् तथा पौष माघ फाल्गुनानां कृष्णादिक्रमेण कृष्णासु अष्टमी ष्वपूपाष्टकानां साष्टका शाकाष्टका पार्वणानि ।

तथा-सौर वैशाखशुक्लपक्षे यवपाक निमित्तकं पार्वणं, तथा आर्द्रास्थ सूर्ये नवोदक पार्वणम् । तथा गृहस्य छदिक्रियेयांनित्यं पार्वणम् । तथा-आश्विनापरपक्षे अष्टम्यां तथा त्रयोदश्यां, तथा गजच्छायायां नित्यम् । एतच्च पक्षश्राद्धाकरणेपि कर्त्तव्यम् ।

किन्तु-आरब्ध पक्षश्राद्धेन पक्षपार्वणेनैव प्रसङ्गा देतन्निर्वाहम् । तेन यजमानस्य ज्येष्टपुत्र सत्वेपि त्रयोदश्यां गजच्छायायां प्रतिपदादि, एवमेव पार्वणानुष्ठानमिति । यत्तु—गजच्छायायाः काम्यत्वमुक्तम् तत्फल प्रदत्त मात्रेण मघायुक्त माघ्याः शतभिग्युक्त फाल्गुनामावास्याया इवेति, एतानि नित्यपार्वणानि ।

काम्य पार्वणानि तु आश्विनापरपक्षादौ तिथिषु विहितानि तानिच नेह तन्यन्ते । नैमित्तिकपार्वणानि सूर्योपरागे चन्द्रोपरागे गङ्गादितीर्थ प्राप्तौ च

तत्तत्तीर्थप्राप्ति निमित्तके पार्वणेऽर्घावाह्नेन भवतः तेन विश्वेदेवा स इति ऊश-न्तस्त्वेति वाजसनेयिनां न भवतः ।

पार्वणश्राद्ध न्तु सर्वेषां श्राद्धानां प्रकृतिभूतं स्वतस्तदुत्तर मन्यानि प्रस्तूयन्ते । तथा हि पार्वणविकृतिभूतं श्राद्धमेकोद्दिष्टम् । तच्च-साम्वत्सरिके श्राद्धैकादशाहश्राद्धमासिकश्राद्ध, सपिण्डनश्राद्ध पित्रादि ब्रह्मपुराणीय षोड़शश्राद्ध अस्थिसञ्चयनश्राद्धरूपम् अत्रापि सपिण्डनश्राद्ध नरसिंहाकारम् , तत्र च मुख्य-मेकोद्दिष्टम् । पार्वण न्तु गौणम् । तच्च प्रेतभागे एकोद्दिष्टवत् । पित्रादि भागे पार्वणवत् । तस्य तु आरम्भे रोहिणपर्यन्तं कालः । रोहिण न्तु न लंघयेदित्येकोद्दिष्टेऽभिधानात् । पिण्डदाने पिण्ड पितृयज्ञः प्रकृतिः स च साग्नौ-करणः पितृ पितामह प्रपितामह पिण्डदानरुपः तेच त्रयः पिण्डा अग्नौकरण शेषमात्र द्रव्यकाः ।

पार्वणे तु पित्रादि त्रयपिण्डाः अग्नौकरण शेष परिवेषण शेषोभय द्रव्यकाः पार्वणे तु मातामहादिपिण्डाः परिवेषण शेषमात्र द्रव्यकाः । अग्नौकरणस्य पित्रादिपिण्डकाङ्गत्वं पिण्ड पितृयज्ञ एव वक्तव्यम् ।

अथाभ्युदयिक प्रयोगः ।

तत्र —दक्षिणोत्तर क्रमेण द्वादशस्थानेषु प्रत्येकमासादितव्यं प्रत्यासनम् ज्वलित दीपदेश मागत्याचम्योदङ्मुख उपविश्य शंख चक्रधरं द्विभुजं पीतकौशेय द्विवाससं फुट पद्माङ्कं ध्यायेत् । ततः कुशोदकेनश्राद्धीय द्रव्याणि सिञ्चेत् , ततः कुशादिकमादाय ओं अद्यामुकमासीयामुकपक्षोयामुकतिथौ अमुक कर्माङ्गभूत माभ्युदयिकश्राद्ध महङ्करिष्ये, इति सङ्कल्पः निमित्तसप्तमी सहित वाक्यदान कर्त्तव्यः ।

यत्तु— "नान्दीमुखे विवाहे च प्रपितामहपूर्वकम् ।
वाकय मुच्चारये द्विद्वानन्यत्र पितृपूर्वकम्" ।

इति वचनवलात् । कन्यादानवाक्यं यथा प्रपितामहपूर्वकं क्रियते, आभ्युदयिक सङ्कल्प वाक्यमपि तथैव कार्यम् अन्यत्र तु पार्वणादौ पितृपूर्वकमेव सङ्कल्पवाक्ये प्रयोक्तव्यमितिवदन्ति ।

तन्न। एतद्वाक्यस्य कल्पतरु पारिजातरत्नाकरादावलिखनेन निर्मूल-त्वावधारणात्। समूलत्वे हि इदमेववाक्यं पार्वणादिसङ्कल्पेप्रमाणम्। तत्कथं शिष्टाचारप्राप्तः सङ्कल्पइति सर्वत्र निवन्धार आहुः। कथ म्वा अमुकपार्वण महङ्करिष्ये इति सङ्कल्पवाक्यंलिखन्तः श्रीदत्तोपाध्यादयस्तत्र पुरुष त्रयोल्लेख माहुः।

कन्यादानवाक्ये यत्प्रपितामहपूर्वकत्वं तत्पैतामह पौत्रीमनुक्रमेदिति तत्प्रकर-णस्थ वाक्यवलादिति। अथ—परकीयभूमौकरणे इदानीमेवभूस्वाम्यन्नदानम्—परकीय गृहेयस्तु स्वान् पितृ न्तर्पयेज्जड़ इत्यनेन तत्प्रारब्ध प्रवृत्तेरेव तद्भू-स्वामिभ्यस्तदानीमेव श्राद्धीय द्रव्याग्रदानाधिकारेसिद्धे विलम्वे वीजाभा-वात्। ततस्तदानीमेव दानंसमर्थस्य क्षेपायोगात्। अग्नौकरण सन्निधाने तु तद्दाने अनङ्ग्व्यवायोप्यधिक इति जपे होमे च दक्षिणानामिकायां कुशत्रय धारणं लिखितमेव प्राक्। ततो गायत्रीं देवताश्च इति च त्रिजपेत्। ओं अद्य विश्वेदेवा इदमासनं वो नम इतिकुशत्रयरूपमासनं दक्षिण आरभ्य कुशत्रय यवजलै रुत्सृजेत्।

तत ओं अद्यामुकगोत्रे मातरमुकदेवि नान्दीमुखि इदमासन न्ते स्वधा, एवं पितामही प्रपितामहीभ्यामपि दद्यात्। ओं अद्यामुकगोत्र पितरमुकशर्मन्ना-न्दीमुख मिदमासन न्ते स्वधा। एव मेव पितामहादि पञ्चभ्योपि दद्यात्। ओं विश्वेदेवा इत्यनेनावाह्य—ओं यवोसीति यवान् विकीर्य ओं विश्वेदेवा शृणुतेमं हव मिति। ओं आगच्छन्तु महाभागा इति च पठेत्।

ओं उशन्तस्तेत्यादिना मातृ न् पितृ श्चावाह्य—ओं अपहता असुरा रक्षांसि वे दिषद इति यवान् भूमौ विक्षप्य ओं आयन्तुनः पितरः सोम्यास इति जपित्वा अर्घकरणं देवपूर्वकम्। सर्वेष्वर्घपात्रेषु पवित्रं धृत्वा—ओं शन्नोदेवी रित्यादि पठित्वा देवार्घ्येषु जलन्दत्वा ओं यवोसीति यवान् क्षिपेत्। मात्रा-द्यर्घपात्रेषु तु—"ओं यवोसि सोमदेवत्यो गोसवोदेव निर्मितः प्रत्नमद्भिः पृक्तः स्वधया पितृ न् लोकान् प्रीणाहिनः स्वाहेति प्रत्येकं प्रक्षिपेत्। ततष्प्रत्येकं गन्धं पुष्पं क्षिपेत्। ततः प्रथमं देवार्घपात्रं वामहस्ते कृत्वा—तत्रस्थं पवित्रं

भोजनपात्रे निधाय तदुपरि किञ्चिज्जलं दत्वा—ओं यादिव्या आप: पयसेति पठित्वा कुशत्रय यव जलान्यादाय—ओं विश्वेदेवा एषवोर्घोनम: ।

एवमेव—पित्रादि देवेभ्यो मातामहादि देवेभ्योपि दद्यात् । ततो मात्रर्घपात्र मालभ्य पूर्ववत्कृत्वा यादिव्या इति पठित्वा कुशादीन्यादाय ओं अद्यामुकगोत्रे मातरमृकदेवि नान्दीमुख्येषु तेर्घः स्वाहेति दद्यात् । एवमेव पितामही प्रपितामह्योरपि ग्रहणादिसर्वं पूर्ववत्कृत्वा ओं अद्यामुकगोत्र पितरमुकशर्मन्नान्दीमुख एषतेर्घ: स्वाहा ।

एवमेव वृद्धप्रमातामहान्तेभ्यो दद्यात् । ततष्पितार्घपात्रसंस्थं पवित्रादि मात्रर्घपात्रे निधाय नतष्प्रपितामहीपात्रस्थं मात्रर्घपात्रे निधाय एवमेव पित्राद्यर्घपात्राणांजलादि मेलनंकृत्वा एवं मातामहादिपात्राणां मेलनादि कृत्वा ओं मातृभ्यो नान्दीमुखीभ्य: स्थानमसीति मातुरर्घपात्रं न्यूब्जीकुर्यात् । तत स्तदुपरि पितामह्या स्तदुपरि प्रपितामह्या अर्घ तुष्णीं न्यूब्जी कुर्यात् । ततष्पितृभ्यो नान्दीमुखेभ्य: स्थानमसीति पितृपात्रं ततस्तदुपरि तूष्णीं पितामहार्घ पात्रं ततस्तदुपरि प्रपितामहार्घपात्रं न्यूब्जी कुर्यात् । एवं मातामहेष्वपि, ततो गन्धादि दानम् । तत्र —क्रम: ओं विश्वेदेवा एतानि गन्ध पुष्पे धप दीप ताम्वूल यज्ञोपव त वासांसि वोनम: ।

एवं पित्रादिव मातामहादि भ्यश्च दद्यात् । ओं अद्यामुकगोत्रे मातरमुकदेवि नान्दीमुखि एतानि गन्ध पुष्प धूप दीप ताम्वूल सिन्दूर वासांसि ते स्वाहा । एवमेव पितामही प्रपितामह्ययोरपि । ओं अद्यामुकगोत्र पितरमुकशर्मन्नान्दीमुख एतानि गन्ध पुष्प धूप दीप ताम्वूल यज्ञोपवीत वासांसि ते स्वाहा । एवमेव पितामहादि पञ्चभ्योपि दद्यात् । ततष्पानीयेन सर्वासनानि भोजनपात्रे सहितानि चतुष्कोण मण्डलं वेष्टयेत् ।

ततस्सजलपुटकादौ हस्तेनैव सघृतमन्नं ओं अग्नये कव्यवाहनाय स्वाहा, ओं सोमाय पितृमते स्वाहा इत्याहुतिद्वयं जुहुयात् । भूस्वाम्यन्नं प्रागेवोक्तम्, ततोहुतशेषमन्नं देवपूर्वं सर्वपात्रेषु किञ्चित्किञ्चिद्दत्वा पित्रादिक पिण्डार्थं किञ्चिदवशेषयेत्, ततोन्यदन्नं यथासम्भवं सर्वपात्रेषु परिविष्य घृतं जलञ्च

तत्रोपनीय पात्रमालभेत्। तत्र—क्रमः उत्तानपाणिभ्यां प्रथमं देवपात्रं स्पृष्ट्वा ओं पृथिवीतेपात्रमिति पठित्वा—ओं इदं विष्णुरिति। ओं विष्णोहव्यं रक्ष, ओं इदमन्न मित्यन्ने, ओं इमाआप—इत्यप्सु, इदं हविरिति घृते अङ्गुष्ठमारोप्य ओं यवोसि यवयेति अन्नोपरि यवान्विकीर्य ओं अद्य विश्वेदेवा इदमन्नं सोपकरणं वो नम कुशत्रय यव जलै र्द्द्यात्।

यद्येकमेकपात्रं भवति तदा वामेनपाणिना पात्र मत्यजन्नेव ओं इदं विष्णुरित्यादि पठित्वा यवक्षेपण पर्यन्तंकृत्वा पूर्ववदेव पित्रादि देवेभ्यो मातामहादि देवेभ्यश्च दद्यात्। भिन्नपात्रपक्षे ओं पृथिवीत इत्यादीनां सर्वेषा मावृत्तिः।

ततो मातृपात्र मुत्तानाभ्यामेव पाणिनां स्पृष्ट्वा ओं पृथिवीत इत्यादि ओं इदं विष्णुरित्यादि जपित्वा—"ओं कृष्णकव्यमिदं रक्षमदीयम्" ओं इदमन्न मित्यन्ने, ओं इमाआप इत्यप्सु, ओं इदं हविरिति घृतादौ क्वचिदङ्गुष्ठमारोप्य ओं अपहता इत्यन्नोपरि यवान्विकीर्य ओं अद्यामुकगोत्रे मातरमुकदेवि नान्दीमुखि इदमन्नं सोपकरणं ते स्वाहा। एवं पात्रालम्भादिपूर्वकं पितामही प्रपितामहीभ्यामपि दद्यात्। एवं पात्रमालभ्य ओं पृथिवीत इत्यादि पूर्वं पठित्वा ओं अद्यामुकगोत्र पितरमुकशर्मन्नान्दीमुख इदमन्नं सोपकरणं ते स्वाहा इति पित्रेन्न मुत्सृजेत्।

एवमेव पितामहादि पञ्चभ्योपि दद्यात्। ततो गायत्रीं त्रिर्जपित्वा मधुमधु मध्विति ततोन्नहीनमिति च ततो गायत्रीं त्रिः कुशेषूपविश्य, ततो मधु मधु मध्विति च जपेत ततः पुरुषसूक्तानि पवित्राणि च जपेत्, ततष्प्रागग्र कुशत्रयं भूमावास्तीर्य जलेनाभ्युक्ष्य जलप्रोक्षितं सयव घृतमन्नं।

"ओं अनग्नि दग्धाश्च ये जीवा ये प्रदग्धाकुलेमम।
भूमौदत्तेन तृप्यन्तु तृप्तायान्तु पराङ्गतिम्।"

इति मन्त्रेण कुशोपरि विकरेत्, तत आचम्य हरिं स्मृत्वा त्रिर्गायत्रीं मधु मधु मध्विति च जपेत्। ततः पूर्वाभिमुखीभूय चतुरस्रां पिण्डयोग्यांभूमिं परिष्कृत्य उत्तरोत्तरक्रमेण स्थानत्रये प्रादेशमात्रं परिमाय तत्र—प्रागग्र दर्भपिञ्जलीमूलेन ओं अपहता असुरा रक्षांसि वे दिषद इति मन्त्रेण रेखात्रयं कुर्यात्।

ततष्प्रत्येकं रेखात्रयोपरि—

"ओं ये रूपाणि प्रतिमुञ्चमाना असुराःसन्त स्वधयाचरन्ति ।
परा पुरो निपुरो ये भरन्त्यग्निष्ठाम् लोकान् प्रणुदात्यस्मात् ।"

इत्यङ्गारान् भ्रामयेत्, तदुपरि प्रत्येकं समूलं कुशत्रयमास्तीर्य—ओं देवताभ्य इति त्रिर्जपित्वा-प्रत्येकमवनेजनं दद्यात्। तत्र-क्रम:-जल जव गन्धपुष्पै र्नव पात्राणि पूरयेत्, एकपात्रं वामहस्तेकृत्वा कुशादीन्यादाय—ओं अद्यामुकगोत्रे मातरमुकदेवि नान्दीमुखि अत्रावने निक्ष्वतेस्वाहा। इति सर्व दक्षिण कुशत्रय मूले दद्यात्। किञ्चिदवशेषयेत् एवमेव पात्रान्तर मादाय तत्कुशमध्ये पितामह्यै तथैव तत्कुशाग्रे प्रपितामह्यै अवनेजनं दद्यात्।

ततश्चतुर्थ पात्रमादाय कुशादींश्चादाय ओं अद्यामुकगोत्र पितरमुकशर्मन्नान्दीमुख अत्रावने निक्ष्व ते स्वाहा । इति मध्यस्थित कुशत्रयमूलेपित्रे तथैव तत्कुशमध्ये पितामहाय कुशाग्रे प्रपितामहायतथैवोत्तरत: स्थित कुशत्रय मूले मातामहाय। तथैव तत्कुशमध्ये प्रमातामहाय, तथैव तत्कुशाग्रे बृद्ध-प्रमातामहाय-अवनेजनं दद्यात्। सर्वपात्रेषु किञ्चिज्जलमवशेषयेत्, ततोयव दधि वदर घृत मधु मिश्रान्नबपिण्डान्निर्माय पित्रादिक त्रिकपिण्डे अग्नौकरणशेषमपि दद्यात्। एकपिण्डं कुशादींश्चआदाय—ओं अद्यामुकगोत्रे मातरमुकदेविनान्दीमुखि एषते पिण्ड स्वाहेति, तत्रावनेजनस्थाने वामान्वारब्ध दक्षिण करेणदेवतीर्थेन पिण्डन्दद्यात्। एवं तत्तदवनेजनस्थाने दद्यात्।

पितामही प्रपितामह्योरपि पिण्डंदद्यात्। एवमेव तदवनेजनस्थाने पित्रेपिण्डन्दद्यात्। एवं पितामह प्रपितामहमातामह प्रमातामह बृद्धप्रमातामहेभ्यः तत्तदवनेजनस्थाने दद्यात्। ततः पितृदर्भमूले करौ प्रोक्ष्य-त्रिराचम्य हरिंस्मृत्वा ओं अत्र मातारोनान्दीमुख्यो मादयध्वं यथाभाग मा वृषायध्व मिति पठित्वा-क्लान्तिपर्यन्तं स्थित्वा उदङ्मुखीभूयश्वासंनियम्य-तेनैवपथा मुखं परावर्तयन् ओं अमीमदन्त मातरो नान्दीमुख्यो यथाभाग मा वृषाइषत्, इतिजपेत्। ततोऽवनेजनावशिष्टजलेन प्रत्यवनेजनन्दद्यात्। तत्र क्रम: पात्रं कुशादींश्चादाय ओं अद्यामुक गोत्रे मातरमुकदेवि नान्दीमुखि अत्रप्रत्यवने निक्ष्व ते स्वाहा इति

मात्रे तत्पिण्डोपरि एवमेव तत्तत्पिण्डोपरि बृद्धप्रपितामह्यन्तेभ्यः प्रत्यवने जनन्दद्यात्, ततो नीवींविश्रंस्य हरिं स्मृत्वा वामेन पाणिनाउर्द्धं तं सूत्रं दक्षिणेनादाय-

ओं नमोवो मातरो नान्दीमुख्यो रसाय ।
नमोवो मातरो नान्दीमुख्यः शोषाय ।
नमोवो मातरो नान्दीमुख्यो जीवाय ।
नमो वो मातरो नान्दींमुख्यः स्वधायै ।
नमो वो मातरो नान्दोमुख्यो घोराय ।
नमो वो मातरो नान्दीमुख्यो मन्यवे ।
नमो वो मातरो नान्दीमुख्यो मातरो गृहान्नो ।

मातरो नान्दीमुख्यो दत्त सतो वो मातरो तान्दीमुख्यो द्वेष्म, ओं एतद्वो मातरो नान्दीमुख्यो वास इति मात्रादि पिण्डत्रयोपरि सूत्रं प्रत्येकं दत्वा—

ओं नमो वः पितरो नान्दीमुख्यो रसाय ।
नमो वः पितरो नान्दीमुखाः शोषाय ।
नमो वः पितरो नान्दीमुखाः जीवाय ।
नमो वः पितरो नान्दीमुखाः स्वधायै ।
नमो वः पितरो नान्दीमुखाः द्वेष्म इति पठित्वा
ओं एतद्वः पितरो नान्दीमुखा वास इत्यनेन—

पित्रादि षट्कोपरि प्रत्येकं सूत्रं दद्यात् । ततः कुषत्रय यव जलान्यादाय—ओं अद्यामुकगोत्रे मातरमुक देवि नान्दीमुखि एतत्ते वास स्स्वाहेति मात्रे सूत्र मुत्सृजेत् ।

एवं बृद्ध प्रमातामहान् तेभ्य उत्सृजेत् । ततो गन्ध पुष्प धूप दीप ताम्वुलैः प्रत्येकं पिण्वानभ्यर्च्य—ओं शिवा आपस्सन्तु इति जलम् । ओं सौमनस्यमस्त्विति पुष्पम् । ओं अक्षतञ्चारिष्ठमस्त्विति—तण्डुलान् । प्रत्येकं पात्रेषु आक्षिप्य-- ओं अद्यामुकगोत्रे मातरमुकदेवि नान्दीमुखि दत्तैतदन्न पानादिभिः प्रीयतामित्यक्षय्योदक मुत्सृजेत् ।

एवं पितामही प्रपितामह्योरपि दद्यात्। ओं अद्यामुकगोत्रः पिताऽमुक शर्मन्नान्दीमुखोदत्तैतदन्न पानादिभिः प्रीयतामिति पिण्डे एव मेव बृद्धप्रमातामहान् तेभ्योपि दद्यात्। तत ओं अघोरा मातरो नान्दीमुखास्सन्तु ओं अघोराः पितरो नान्दीमुखास्सन्तु इति पठेत्।

तत - ओं "गोत्रन्नोवर्द्धताम् दातारोनोऽभि वर्द्धन्ताम् वेदास्सन्तति रेवच।
श्रद्धा च नो मा व्यगमद्वहुदेयञ्च नो अस्तु।
अन्नञ्चनो वहुभवे दतिथींश्च लभेमहि।
याचितारश्च नः सन्तु माचयाचिष्म कञ्चन।
एताःसत्याशिषस्सन्तु"।

इत्याशीष्प्रार्थनम्। ततस्सपवित्र कुशत्रयं प्रत्येकं मात्रादि पिण्डत्रये मातामहादि पिण्डत्रये च धृत्वा—ओं उर्जम्वहन्तीरमृतं धृतं पयष्कीलालं परिश्रुतम्।

स्वधास्थ तर्पय मे मातॄर्न्नान्दीमुखीः पितॄन्नान्दीमुखान् इति मात्रादि पिण्डोपरि पित्रादि पिण्ड षट्कोपरि जलधारान्दद्यात्। ततः पिण्डानाघ्रायोत्थाप्य पिण्डाधारकुशानुल्मूकञ्च वह्नौ निःक्षिपेत्। अर्घपात्राण्युत्तानीकृत्य दक्षिणान्दद्यात्। दक्षिणाद्रव्यं कुशादींञ्चादाय—ओं अद्यविश्वेषां देवानां कृतैतच्छ्राद्ध प्रतिष्टार्थमेतानि द्राक्षामलकमूलानि वनस्पतिदैवतानि यथानामगोत्राय ब्राह्मणाय दक्षिणामहन्ददे।

एवं पित्रादि त्रिक मातामहादित्रिक विश्वेदेव श्राद्धसम्वन्धिनीं दक्षिणान्दद्यात्। ओं अद्यामुकगोत्राथा मातुरमुकदेव्या नान्दीमुख्याः कृतैतदाभ्युदयिक श्राद्धप्रतिप्रतिष्ठार्थ मेतानीत्यादि। एवं पितामही प्रपितामह्योरपि, ओं अद्यामुकगोत्रस्य पितुरमुकशर्मणो नान्दीमुखस्येत्यादि, एवमेव पितामहादि पञ्चक श्राद्धे दक्षिणान्दद्यात्। द्राक्षाद्यभावे यवानेव दक्षिणान्दद्यात्। तत्रवाक्ये-एतान् यवान् प्रजापति दैवतानिति प्रयोगः कार्यः। ततो देवताभ्य इति त्रिर्जपेत्। ततोदीपान्निर्वाप्य, हस्तौ पादौ प्रक्षाल्याचम्य विष्णुंस्मृत्वा-श्राद्धीय द्रव्याणि प्रतिपादयेदिति।

अयमेव हि वैदिक मन्त्र शून्यः स्वाहा—स्थाने नमः शब्दवान् स्त्रीशूद्रयोराभ्युदयिक विधिः। देश काला द्यनुरोधेन यदिपिण्डरहितमाभ्युदयिकं क्रियते

तदा अग्नौकरणम्, अर्घदानम्, आवाहनम्, अवनेजनात्मक नमो वोत्तरं तन्त्रम दक्षिणापर्यन्तं निवर्त्तते।

अथ मातृकापूजा।

तत्र—प्रथमं प्रातःकाले स्नातः सुकलाम्वरधरः आचान्तः कृतनित्यक्रियः पीठादौ स्थापितरक्षिका सप्तदशतये गणपतिसहित षोड़श मातृः मृत्तिकामयीं श्रियं तदभावे श्रियमपि रक्षिकायामेव पूजयेत्। तत्र क्रमः—प्राङ्मुख उपविश्य—ओं अद्य पुत्रोपनयनकर्मणि गणपति श्रीसहित षोड़शमातृरहंपूजयिष्ये, इति सङ्कल्पङ्कुर्यात्।

तत्र—प्रथमरक्षिका मारभ्य—ओं गणपतिरसि, ओं गौर्यसि, ओं पद्मासि, ओं शच्यसि, ओं मेधासि, ओं सावित्र्यसि, ओं विजयासि, ओं जयासि, ओं देवसेनासि, ओं स्वधासि, ओं स्वाहासि, ओं मातरस्थः, ओं लोकमातरस्थः जों हृष्टिरसि, ओं पुष्टिरसि, ओं तुष्टिरसि, ओं आत्मकुलदेवतासि, ओं श्रीरसि, इति नामानि धृत्वा तण्डुलानादाय प्रथमरक्षिकामारभ्य, ओं गणपते इहागच्छ इहतिष्ठ-ओं गौरि इहागच्छ इहतिष्ठेत्यादि प्रत्येक मावाहनस्थापने दत्वा—सर्वत्रैकदैव -

"ओं मनोजुतिर्ज्जुषता माज्यस्य वृहस्पतिर्यज्ञ-
मिमन्तनोत्वरिष्टं यज्ञं समिमन्दधातु।
विश्वेदेवा स इह मादयन्ता मों प्रतिष्ठ"।

गणपति दुर्गा श्रीसहिता गौर्यादि षोड़श मातरः सुप्रतिष्ठिता भवन्तु, अनेन प्रतिष्ठां कुर्यात्! सामगानान्तु ओं वाङ्मनष्प्राणोपानोव्यानश्चक्षुः श्रोत्रं शर्म वर्मभूतिः प्रतिष्ठा, अनेन प्रतिष्ठां कुर्यात्। तत्र एतानि पाद्यादीनि ओं गणपतयेनमः इदं पुष्पं ओं गणपतयेनमः। एतानि गन्ध पुष्प धूप दीप ताम्बूल नैवेद्यानि ओं गणपतये नमः। इदं वस्त्रं वृहस्पतिदैवतं ओं गणपतये नमः। इति पूजयेत्। एवमेव श्री सहिताः षोड़श मातरः पूज्याः। ततो गणपति श्री सहिताः षोड़श मातरः क्षमध्वमिति विसर्जयेत्। ततो घृतेन—"ओं वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्। देवस्त्वा सविता पुनातु

वसोः पवित्रेण शतधारेण सुप्त्वा कामधुक्ष इति मन्त्रेण सप्तदश मुतरोत्तरक्रमेण कुर्यात् ।

अथ—संपात्रक माभ्युदयिकप्रयोगः । गृहद्वारदेशे गोमयोपलिप्तायां पुष्पाक्षतपूजितायां भूमौ यजमानः प्राङ्मुखस्तिष्ठन् स्नातान् यजमान सवर्णेनाहूतान् चतुर्विंशति मष्टौ वा ब्राह्मणान् उत्तराभिमुख स्थितान्— ओं स्वागतमिति पृष्ट्वा— ओं स्व स्वागतमिति तै रुक्ते पीठाद्यासनेषूपविश्यस्वयमुपविश्य पुष्प चन्दन ताम्बूलानि ब्राह्मणयोर्दत्वा— दक्षिण जानुनी तयोः स्पृशन् ओं विश्वेदेव श्राद्धार्थममुक गोत्रौ ऽमुकामुक शर्म्माणौ ब्राह्मणौ युवामह मामन्त्रये, इत्यामन्त्रयेत् । ओं आमन्त्रितौस्व इति प्रति वचनम् ।

अष्टब्राह्मणपक्षे निमन्त्रितयोरेव पित्रादित्रिक् मातामहादित्रिक् सम्बन्धि विश्वेदेव श्राद्धार्थं पूर्वप्रकारेण निमन्त्रिण मात्रादिश्राद्धनिमन्त्रिणेप्येवं चतुर्विंशति ब्राह्मणपक्षे द्वादशस्थानेषु द्वयोर्द्वयोर्न्निमन्त्रणम् एवमपरब्राह्मणयोः पुष्पचन्दनानि दत्वा दक्षिणजानुनी स्पृशन् ओं अद्यामुक गोत्राया मातुरमुकदेव्या नान्दीमुख्या आभ्युदयिक श्राद्धार्थ ममुक गोत्रावमुक शर्माणौ युवासहमामन्त्रये, ओं आमन्त्रितौ स्वः इति प्रतिवचनम् । एवं पितामही प्रपितामह्योः श्राद्धार्थं निमन्त्रणादि, ततः पितृ ब्राह्मणयोः पुष्पादि समर्प्य, दक्षिणजानुनी स्पृशन्, ओं अद्यामुकगोत्रस्य पितुरमुकशर्मणो नान्दीमुखस्याभ्युदयिक श्राद्धार्थममुकगोत्रादि पूर्ववत् ।

एवं पितामह प्रपितामहयोरपि श्राद्धार्थं निमन्त्रणादि, ततोऽपरब्राह्मणयोः पुष्पादि दत्वा, दक्षिणजानुनी स्पृशन्, ओं अद्यामुकगोत्रस्य मातामहस्यामुकशर्मणो नान्दीमुखस्याभ्युदयिक श्राद्धावमुकगोत्रावमुक शर्माणौ ब्राह्मणौ युवामह मा मन्त्रये, ओं आमन्त्रितौ स्व इति प्रतिवचनम् ।

एवं प्रमातामह बृद्धप्रमातामहयोरपि श्राद्धार्थं मामन्त्रणादि इति चतुर्विंशति ब्राह्मणपक्षे विनियुक्तावेव तौ पुनः स्थानद्वये विनियोक्तौ । एवं मातृपक्षे-पितृपक्षे-मातामहपक्षेपीति ।

"तत ओं अक्रोधनैः शौरपरैस्सततं ब्रह्मवादिभिः ।
भवितव्यं भवद्भिश्चमपठः श्राद्धकर्मणि" ।

इति नियमान् श्रावयेत्।

"ओं भवितव्यमिति तैरुक्ते ओं सर्वाय-
मविनिमुक्तैः काम क्रोध विवर्जितैः।
भवितव्यं भवद्भिर्न्नो अद्यतने श्राद्धकर्मणि"।

इत्यभ्यर्थयेत्। ओं भवितव्यमिति प्रतिवचनम्। ततो विनीतस्सन् ओं इदं युवयोः पाद्यमिति प्रत्येकं, इदं वष्पाद्यमित्येकदैव वा जलमुपनीय वारम्वार मभिनन्द्य स्वयमेव तेषां पादौ प्रक्षालयेत्।

ततो द्वादशसु पुटकादिषु जव जल चन्दन पुष्पाणि कृत्वा—ओं विश्वेदेवा एष पादार्घो वो नम इति मात्रादि देव ब्राह्मणयोः कुशत्रय यव जलै रुत्सृज्य दद्यात्।

एवमेवापर विश्वेदेवद्वये पाद्यार्घन्दद्यात्, ओं अद्यामुक गोत्रे मातरमुक-देवि नान्दीमुखि एष पाद्यार्घन्ते स्वाहा। इति यव जल कुशत्रयेणोत्सृज्य मातृ ब्राह्मण पादयोर्द्द द्यात्। एवं पितामही प्रपितामही ब्राह्मणयोरपि पाद्यार्घन्द-द्यात्, ओं अद्यामुकगोत्र पितरमुकशमन्नान्दीमुख एष पाद्यार्घ स्वाहा—इति कुश त्रय जव जलै रुत्सृज्य पितृ ब्राह्मणपादयोर्द्द द्यात्।

एवमेव—पितामहादिभ्यो नाम गोत्राभ्यां पाद्यार्घन्दद्यात्। ओं इदं युव-योराचमनीयमिति ओं इदस्व आचमनीय मिति एकदैव वा जलं निधाय कि-ञ्चिज्जलं विश्राव्य अभिनन्द्याचमनीयन्दद्यात्। तेषु चा चान्तेषु स्वयमाचम्य तानग्रतः कृत्वा श्राद्धस्थानमावृतं प्रविश्य उपविश्य पूर्वकल्पितामन्येषु प्रागग्र दर्भद्वयान्वितेषु, ओं अत्राध्वमिति प्रत्येकं पूर्व तानुपवेशयेत्।

ततष्पादयोरधः पूर्वाभिमुखान् कुशान् दत्वा प्रत्यासनसमीपं दक्षिणपार्श्वे तिलतैलेन दीपन्दत्वा गौरसर्षपादीन् सन्निधाप्य श्राद्धहन्तॄन् काक कुक्कुरादी-नपसार्य्यं उदङ्मुख उपविश्य—शंख चक्रधरं द्विभुजं पीतकौशेय वाससं स्फुट पद्माङ्कुरं विष्णु ध्यायेत्। ततः कुशोदकेन श्राद्धीयद्रव्याणि सिञ्चेत्। ततः कुशादिक मादाय ओं अद्यामुकमासीयामुक पक्षीयामुक तिथावमुकशर्मणः आ-भ्युदयिक श्राद्धमहङ्करिष्य इत्याचाराद्वाक्यंकृत्वा—ओं कुरुष्वेत्यनुज्ञातः

अथ—परकीय भूमौ करणे इदानीमेव भूस्वाम्यन्नदानम् । ओं इदमन्न मेतद्भू स्वामिपितृभ्योनम इति श्राद्धीय द्रव्याग्रभाग मपसव्येन द्विगुणभुक्त कुशत्रय तिल जलै र्भू स्वामि पितृभ्यो दद्यात् । ततस्सव्येन, ओं गायत्री जपमहङ्करिष्ये इति तान् पृच्छेत् , एवं ओं कुरुष्वेति तै रनुज्ञातो जपधर्मेण गायत्रीन्त्रिः, ओं देवताभ्य इति त्रिर्जपित्वा कुशत्रय जव जलान्यादाय ओं विश्वेदेवा इदमासनं वो नम इत्युत्सृज्य अनेनैव क्रमेण पित्रादि मातामहादि सम्वन्धि विश्वेदेवेभ्योप्यासनं दत्वा तत—ओं अद्यामुक गोत्रे मातरमुकदेवि नान्दीमुखि इदमासनन्ते स्वाहा ।

अनेनैव क्रमेण पितामह्यादि अष्टभ्योरपि दद्यात् , ओं विश्वेदेवानावाहयिष्ये, इति देवब्राह्मणान् पृच्छेत्, ओं आवाहयेत्यनुज्ञातः त्रयाणामपि विश्वेदेवानां ज्येष्ठविप्राणा मङ्गुष्ठानि गृहीत्वा ओं विश्वेदेवा स आगत इत्यादिनावाह्य ओं यवोसीति देवपात्रे यवान्विकीर्य ओं विश्वेदेवा श्रृणुते ममिति पठित्वा—ओं आगच्छन्तु महाभागा इति पठित्वा —ओं मातृन्नान्दीमुखीरावाहयिष्ये इति मातृ ब्राह्मणान् पृच्छेत् ।

ओं पितृन्नान्दीमुखान्नावाहयिष्ये । इति पितृ ब्राह्मणान् पृच्छेत्, ओं आवाहयेत्यनुज्ञातः पितामह ब्राह्मणमङ्गुष्ठे गृहीत्वा—ओं उशन्तस्त्वे त्यावाह्य ओं अपहता इत्यादिना दक्षिणावर्त्तं यवान्विकीर्य—ओं आयन्तुन इति जपित्वा द्वादशार्घपात्राणि सपवित्राणि कृत्वा तत ओं शन्नोदेवी रित्यादिना प्रत्येकं जलं देवपात्रत्रये ओं यवोसीति यवान् मात्रादिपात्र नवके ओं यवोसि सोमदेवत्यो गोसवोदेव निर्मितः । प्रत्नमद्भिः पृक्तः नान्दीमुखान् पितृन् लोकान् प्रिणाहिनः स्वाहा इति यवान् प्रक्षिप्य देवपूर्वेषु सर्वेषु गन्ध पुष्पाणि च तुष्णीन्दत्वा प्रथम देवार्घपात्रे वामहस्तेनादाय प्रथमोपदेशितान् प्रदक्षिणकरं तत्पश्चादुपवेशित विप्रकरोपनिधाय कराग्रे यथाग्रं भवति तथा विप्र करयोः पवित्रोपरि ददत्सृजेत् ।

ततष्पवित्रं विप्रहस्तादर्घपात्रे कृत्वा पात्रं भूमौ धारयेत् । एवमेवापर द्वयोरपि दद्यात् , मातादि विप्रकरेण पूर्ववत्पवित्रन्दत्वा, ओं यादिव्या इति पठित्वा, ओं अद्यामुकगोत्रे मातरमुकदेवि नान्दीमुखि एषतेर्घः स्वाहा ईति दत्वा पात्रं भूमौ निधाय अमेनैव क्रमेण पितामह्याद्यष्टभ्योपि दद्यात् । ततः

पितामही पात्रस्थं जल पुष्पाणि मातृपात्रे कृत्वा, प्रपितामही पात्रस्थं च तत्र कुर्यात् । ततो मातृपात्रं गृहीत्वा ओं मातृभ्यो नान्दीमुखीभ्यः स्थानमसीति मातृ ब्राह्मणद्वय दक्षिणपार्श्वे न्यूब्जीकुर्यात्, ततस्तदुपरि पितामहीपात्रं ततस्तदुपरि प्रपितामहीपात्रं न्यूब्जीकुर्यात् । ततष्पितृपात्रं गृहीत्वा—ओं पितृभ्यो नान्दीमुखेभ्यः स्थानमसीति पितृ ब्राह्मणद्वय दक्षिणपार्श्वे न्यूब्जी कुर्यात् । ततस्तदुपरि पितामहपात्रं ततस्तदुपरि प्रपितामहपात्रं न्यूब्जी कुर्यात् ।

एव मातामहेष्वपि, ओं अद्य विश्वेदेवा एतानि गन्ध पुष्प धूप दीप ताम्बूल वासांसि वो नम इति कुशत्रय यव जलैर्द्द्यात् । एवमपर विश्वेदेवेभ्योपि दद्यात् । तत ओं अद्यामुकगोत्रे मातरमुकदेवि नान्दीमुखि एतानि गन्ध पुष्प धूप दीप ताम्बूल सिन्दूरवासांसि ते स्वाहा इति पूर्ववद्दत्वा, अनेनैवक्रमेण पितामह्याद्यष्टभ्योपि दद्यात् ।

तत ओं एषते गन्ध इति प्रत्येक समर्पयेत् ।

तत ओं स्वगन्ध इति प्रतिवचनम् । एवं पुष्पादीनामपि प्रतिपादनं प्रतिवचनञ्चक्रमेण, ततो नीवारचूर्णेन गौरमृत्तिकयाप्रणीताग्नि भस्मना जलेन वा ब्राह्मणान् वेष्टयित्वामण्डलं कृत्वा—ओं अग्नौ करिष्य इति तन्त्रेणैव सर्वान् पृच्छेत् । ओं कुरुष्वेत्यनुज्ञातः । ततस्स घृतमन्न मादाय पितृ विप्रपाणौ जले वा—ओं अग्नये कव्यवाहनाय स्वाहा—ओं सोमाय पितृमते स्वाहा इति मन्त्राभ्यां हुत्वा ततः हुतशेषमन्नं देवपूर्वपात्रेषु परिविष्य पिण्डार्थं किञ्चिदवशेषयेत् ।

ततोन्य दन्नं यथावत्परिविष्य मात्रादि देवपात्रं उत्तान ऋजुहस्ताभ्या मालभ्य, ओं पृथिवीत इति पठित्वा—ओं इदं विष्णुरिति च ओं विष्णो हव्यं रक्ष इति पठित्वा—विप्रद्वयाङ्गुष्ठौ दक्षिणहस्ते नादायान्नोत्सर्गपर्यन्तं वाम पाणिना पात्रमत्यजन्, ओं इदमन्न मित्यन्ने ओं इमाआप इत्यप्सु, ओं इदं हविरिति, सर्वाभि प्रायेण हविर्षिनिवेश्य, ओं यवोसीति अन्नोपरि यवान् प्रक्षिप्य कुशत्रय यव जलान्यादाय, ओं विश्वेदेवा इदमन्नं सोपकरणं वो नमः ।

एवमेवापर देवयोः । ततो मातृपात्र मुत्तानपाणिभ्या मेवालभ्य, ओं पृथिवीत इत्यादि पठित्वा, ओं इदं विष्णुरिति च, ओं विष्णो कव्यं रक्ष इति

पठित्वा, मातृ विप्राङ्गुष्ठौ गृहीत्वा, इदमन्न मित्यादि पूर्ववत् । तत ओं अपहता इत्यादिना यवान्विकीर्य, ओं अद्यामुकगोत्रे मातरमुकदेवि, नान्दीमुखि इदमन्नं सोपकरणं ते स्वाहा । एवं पात्रालम्भादि पूर्वक मितरेभ्योप्यष्टेभ्यः स्व स्व नाम गोत्राभ्या मुत्सृजेत्, आमान्नत्वादिह भोजनधर्मान् सन्ति, ततो गायत्रीं त्रिः मधु मधु मध्विति, ओं अन्नहीन मित्यादि च पठित्वा गायत्रीं त्रिर्जपित्वा, प्रागग्र कुशत्रयोपरि उपविश्य, मधु मधु मध्विति च कृणुष्वपाज इत्यादि पठित्वा, पितामहपात्र सन्निधौ सयव जल घृतं प्रोक्षितमन्नं प्रागग्रेषु दर्भेषु जलोक्षितेषु । ओं अनग्नि दग्धा इत्यादि पठित्वा विकिरेत्, तत आचम्य, हरिंस्मृत्वा पूर्ववद्गायत्रीं मधु मधु मध्विति च जपित्वा शेषमन्नं किंकर्त्तव्यमिति पृष्टे इष्टैस्सह भोक्तव्यमिति तैरुक्ते, ओं पिण्डानहंकरिष्ये, कुरुष्वेत्यनुज्ञातः ।

ततः पूर्वाभिमुखीभूय चतुरस्रा पिण्डयोग्यां भूमिं परिष्कृत्य, उत्तरोत्तरक्रमेण स्थानत्रये प्रादेशमात्रं परिमाय, तत प्रागग्रं दर्भपिञ्जली मूलेन, ओं अपहता इत्यादिना रेखात्रय मुत्तरोत्तरं कुर्यात् । ततः प्रत्येकं रेखात्रयोपरि, ओं ये रूपाणि इत्यादिना अङ्गारान् भ्रामयेत्, तदुपरि प्रत्येकं समूलकुशत्रय मास्तीर्य, ओं देवता च इति त्रिर्जपित्वा प्रत्येक मवनेजनन्दद्यात् । तत्र क्रमः, जल यव पुष्प गन्धैर्नवपात्राणि पूरयित्वा तत्र एकं पात्रं वामहस्ते कृत्वा कुशादीन्यादाय ओं अद्यामुकगोत्रे मातरमुकदेवि नान्दीमुखि अत्र प्रत्यवने निक्ष्व ते स्वाहा । एवमेव अपरेभ्योपरि अवनेजनन्दत्वा किञ्चि दवशेषयेत् ।

ततस्सर्वस्मादन्न मुद्धृत्य व्यञ्जनै रुपसिच्य दधि वदर घृत मधु मिश्रान्नव पिण्डान्निमयि पित्रादि पिण्डत्रये अग्नौकरण शेषान्नमपिदेयम्, स्व स्वावने जन स्थाने दद्यात् । ओं अद्यामुकगोत्रे मातरमुकदेवि नान्दीमुखि एषते पिण्डः स्वाहा । एव मपरे भ्योपिदद्यात् । ततो-लेपभागभुजस्तृप्ति मुद्दिश्य पितृदर्भमूले करं प्रोक्ष्य द्विराचम्य हरिं स्मृत्वा ओं अत्र मातरो नान्दीमुख्यो मादयध्वं यथाभाग मा वृषायध्वमिति पठित्वा उदङ्मुखीभूय स्वासं नियम्य क्लान्ति पर्यन्तं स्थित्वा तेनैव पथा परावर्तमानः— ओं अमीमदन्तमातरो नान्दीमुख्यो यथाभाग मा वृषाइषत् । इति मातृ रुद्दिश्य-पठित्वा-ओं अत्र पितरोनान्दीमुखा मादयध्वं यथाभाग मा वृषायध्व मिति पठित्वा-ओं अमीमदन्ता पितरो नान्दी-

मुखा यथाभाग मा वृषा इषत् इति पठित्वा—ओं अद्यामुकगोत्रे मातरमुकदेवि नान्दीमुखिअत्रावने निक्ष्व ते स्वाहा इतिदत्वा-एवमन्येभ्योपि दद्यात्। ततो नीवीं विशस्यआचम्य हरिं स्मृत्वा—सूत्र मादाय—ओं नमोवो मातरो नान्दी-मुख्यो रसाय नमो वोमातरो नान्दीमुख्यः शोषाय, नमो वोमातरो नान्दीमुख्यो जीवाय, नमो वोमातरो नान्दीमुख्यः स्वधायै, नमो वोमातरो नान्दीमुख्यो घोराय, नमो वोमातरो नान्दीमुख्यो मन्यवे, इति वसन्तादिषड्तुभ्य नमस्कृत्य-नमो वोमातरो नान्दीमुख्यो नमोव इति केवल मातृणान्नमस्कारः।

गृहान्नो मातरो नान्दीमुख्यो दत्त सतोवो मातरो नान्दीमुख्यो द्वेष्म इति मातृभ्यः आशीष्प्रार्थ्य—एतद्वो मातरो नान्दीमुख्योवास इति प्रत्येकं पठित्वा पित्रादि पिण्डेषुषट्सु सूत्रन्दद्यात्। ओं अद्यामुकगोत्रे मातरमुक देवि नान्दीमुखि एतद्वास स्ते स्वाहा।

एवं पितामह्या द्यष्टभ्यो प्युत्सृजेत्। तूष्णीं मात्राद्युद्देशेन गन्ध पुष्प धूप दीप ताम्बूलानि सर्व पिण्डेषु दद्यात्। ओं स्वप्रोक्षितमिति जलेन स्वाग्रां भूमिं प्रोक्ष्य ओंशिवा आपस्सन्तु इति देव पूर्वं विप्राणांकरे—जलं दत्वा, ओं सौमन-स्य मस्त्विति पुष्पाणि, ओं अक्षत ञ्चारिष्ट मस्तु इत्यक्षतान्, सन्त्विति सर्वत्र प्रतिवचनम्। ओं अद्यामुक गोत्रामाता ऽमुकदेवी नान्दीमुखी दत्तै तदन्न पानादि-भिः प्रीयतामिति मातृ विप्रकरे सयव मुदकन्दत्वा—एव मेव पितामह्यादि-भ्योपि तत्तद्विप्रकरे दद्यात्। ओं प्रीयता मिति प्रत्येकंप्रतिवचनम्। ओं अघोरा मातरो नान्दीमुख्यस्सन्तु।

ओं अघोराः पितरो नान्दीमुखास्सन्तु इतिपठेत्, ओं सन्त्विति प्रति-वचनम्। ओं गोत्रन्नोवर्द्धता मिति वदेत्। ओं दाता रोनोऽभिवर्द्धन्तामित्या शिषो याच्याः ओ मस्त्विति तै रुक्ते पिण्डेषु सपवित्रान् कुशानास्तीर्य—ओं नान्दीमुखी र्मातृ र्नमो वाचयिष्ये, ओं नान्दीमुखान्पितृन्, नमो वाचयिष्ये इति पृष्ट्वा - ओंवाच्यता मित्यनुज्ञातः—ओं नान्दीमुख्योमातरो नान्दीमुखाः पितरः पितामहाः प्रपितामहाः मातामहाः प्रमातामहाः वृद्धप्रमातामहाः प्रीयन्ता मित्युक्त, ओं प्रीयन्तामिति तैरुच्यमाने—"ओं ऊर्जम्वहन्ती रमृतं घृतं पयष्की-लालंपरिश्रुतं--स्वधास्थ तर्पयत मे मातृ र्न्नान्दीमुखीः। इति सपवित्र कुशान्त-रित पिण्डानामुपरि वारिधारान्दत्वा--पित्रादीनां, मातामहादीनाञ्चपिण्डेपु

नान्दीमुखानि त्यन्तेनैव पूर्वमन्त्रेणैव वारिधारान्दद्यात् । ततो नम्रीभूय-पिण्डानाघ्रायोत्थाप्य, यत ष्पिण्डा आनीतास्तत्र धृत्वा पिण्डाधारकुशानुलमुकञ्चवह्नौ क्षिपेत् । ततोर्घपात्रा ण्युत्तानींकृत्यओं विश्वेषा न्देवानां कृतैतच्छ्राद्ध प्रतिष्ठार्थमेतानि द्राक्षामलकमूलानि वनस्पतिदैवतानि--अमुकगोत्राभ्या ममुक शर्मभ्यां युवाभ्यां दक्षिणा महन्ददे । इति मात्रादि देव ब्राह्मणयो र्द्दक्षिण हस्ते दद्यात् । ओं स्वस्तीति प्रतिवचनम् ।

एव मेव परदेवयोः प्रत्येकं द्राह्मणथोर्दक्षिणान्दत्वा--ओं अद्यामुक गोत्राया मुकदेव्या नान्दीमुख्याः कृतैतदाम्युदयिक श्राद्धप्रतिष्ठार्थ मेतानीत्यादि । एव मेव—पितामहाद्यष्टभ्यः, तत—ओं विश्वेदेवा प्रीयन्ता मित्युक्त्वा देव ब्राह्मणयोर्ज्जत्नदानं पूर्वं वाचयेत् । ओं प्रीयन्तामिति तै रुक्ते—ओं स्वस्तीति वाचयित्वा—स्वस्त्यस्त्वित्यभिधाय पंक्तिमूर्द्धन्यं पितृब्राह्मण मङ्गुष्ठे गृहीत्वा—वामेनपाणिना गृहीतोदकपात्रः ओं राजे राजेवतवाजिनो धनेषु विप्रा अमृता ऋतज्ञाः । अस्य मध्वष्पितर मादयध्वं तृप्तायात पथिभिर्द्देव यानैः । इति कुशाग्रेण त्रिसर्जयेत् । एवं ब्राह्मणानपि विसर्जयेत् । ततोवहिरा-गत्य—निमन्त्रणु स्थाने मिलितान् सर्वानिवब्राह्मणान्, ओं आमा वाजस्य प्रसवो जगस्यादेमे द्यावा पृथिवी विश्वरूपो आमागन्ताप्सितवा मातरा चामा सोमो अमृतत्वेन गम्याः ।

इति जपित्वा—अष्टौ पादा ननुव्रजेत् ।

तत ष्प्रणिपत्योपविशेत् । तत ओं देवताभ्य इति त्रिर्जपित्वा—गृहं प्रविश्य-दक्षिणपाणिना –दीपं निर्वात्य-हस्तौ पादौ प्रक्षाल्यद्विराचम्य विष्णुं स्मरेदिति । ततो वैश्वदेवाधिकारी चे-तदा-वैश्वदेव वलि कर्मणीकुर्वीत । तदुक्तं मत्स्य पुराणे ।

"निवृत्य प्रणिपत्याथ पर्युक्ष्याग्नि समन्त्रवित् ।
वैश्वदेवं प्रकुर्वीत नैत्तिकं वलि कर्मच" ।

आदित्य पुराणे ।

पितॄन् सन्तर्प्य विधिवत्, वलिन्दद्याद्विधानतः ।
वैश्वदेवं ततः कुर्यात्, पश्चाद्ब्रह्मण भोजनम्" ।

अयञ्च वलि वैश्वदेवयी र्व्युत्क्रमः—शाण्डिल्यान्तर—विषयः—पित्रादि-त्रिक् श्राद्धानन्तरं नित्यश्राद्धमपि न कार्यम् । ब्राह्मोत्र ज्ञातिः

एतदनन्तरं —देवल:—

"ततो ज्ञातिषु तुष्टेषु स्वान् भ्रातृन प्रतिभोजयेत्।

पश्चात् स्वयञ्च पत्नी च पितृशेष मुदाहरेत्"।

उदाहरेत्, अभ्यवहरेत्। पितृशेषं—श्राद्धशेषावशिष्टम्। आपस्तम्वोपि

सर्वत: समवदाय ग्रासावरार्द्ध मश्नीयाद्यथोक्तं सर्वञ्च श्राद्धशेष दत्तत:— ग्रासावरार्द्ध—ग्रासादनूनं यथोक्तं ब्राह्मणानुमतम्। तथा च—श्राद्धशेषान्नं— ग्रासादनूनमित्यर्थ:।

श्राद्धोत्तार—क्रोशं पूरणाध्वगमनं वेदाध्ययनम्, तदहोरात्रे मैथुनं, द्यूतम् आयामः, कलहः दिवास्वप्नं प्रतिग्रहादि दानग्रहणे अनावश्यक होम:। एतानि मानश्राद्धिनोर्द्धयोरपि निषिद्धानि। पित्रादि त्रिक श्राद्धानन्तरं पार्वणमपि न कार्यमिति।

नारदीये—

सङ्क्रान्त्या मुपवासन्तु कृष्णैकादशि वासरे।
चन्द्र सूर्यग्रहे चैव न कुर्यात्पुत्रवान् गृही।
इन्दुक्षयेर्क संक्रान्त्या मेकादश्यां सितेतरे।
चन्द्र सूर्यग्रहे चैव न कुर्यात्पुत्रवान् गृही:
इन्दुक्षयेर्क संक्रान्त्या मेकादश्यां सितेतरे।
उपवासं न कुर्वीत यदीच्छेत्सन्तर्ति ध्रुवाम्।
संक्रान्त्या मुपवासेन पारणेन युधिष्ठिर।
एकादश्यान्तु कृष्णायां ज्येष्ठष्पुत्रो विनश्यति।
शयनी वोधिनीमध्ये या कृष्णैकादशी भवेत्।
सैवोपोष्या गृहस्थेन नान्याकृष्णाकदाचन।
एकादश्यान्न भुंजीत या क्षयोरुभयोरपि।
वनस्थ यति धर्मोयं शुक्लामेव सदागृही"।

अथ-समयाशुद्धिः।

तत्र ऋक्षोच्चय:--

"वापीकूप तड़ाग याग गमनं क्षौरं प्रतिष्ठाव्रतम्।
विद्यामन्दिर कर्णवेधनमहा दानं वनं सेवनम्।

तीर्थस्नान विवाह देवभवनं मन्त्रादि देवेक्षणम् ।
दूरेणैव जिजीविषुः परिहरे दस्तङ्गते भास्करे ।
वाले शुक्रे बृद्धे जीवे शुक्रे जीवे नष्टे ।
वालेजीवे सिंहे सिंहादित्ये र्जीवादित्ये" ।
तथा मलिम्लुचे मासि सुराचार्येति चारगे ।
वापी कूप तड़ागादि, क्रियाः प्रागुदितस्त्यजेत्" ।

नन्दः

"उपनयनं गोदानं परिणयनं गृहप्रवेशनं गमनम् ।
अस्तमितेषु न कुर्यातसुरगुरु भृगुपुत्रचन्द्रेषु" ।

वृहदृक्षोच्चयः—

"अस्ते शुक्रे धनुर्मीने सिंहादित्ये गुरौ तथा ।
चूड़ोद्वाह प्रतिष्ठाञ्च व्रतादीन्नैव कारयेत् ।
अस्तङ्गते भृगुसुते नश्यन्ति समस्त दिग्गतायात्रा ।
वेस्म क्रियाप्रवेशः क्षौरोद्वाहौ परीक्षा च" ।

परीक्षा तप्तमाषादि दिव्यविधिः ।

गुणि सर्वस्वे —

"प्रतिष्ठार्थं परीक्षाञ्च व्रतोद्वाहादिकर्मच।
नष्टे वाले च बृद्धे च न कुर्याद् भृगुनन्दने" ।

राजमार्तण्डे —

"गुर्वादित्ये गुरौसिंहे शुक्रेचास्त मुपागते ।
नाधिष्ठानवतीं पश्ये द्देवता मादितोनरः ।
अनादि देवतां दृष्ट्वा शुचस्युर्नष्ट भार्गवे ।
मलिम्लुचेप्यनावृतं तीर्थस्नानमपि त्यजेत् ।

"अस्ते प्रयाते च भृगौ गुरौ वा सूर्ये निरंशेहि मसौ प्रनष्टे ।
न कूप वाप्यादिक मन्दिरार्थं शुभं प्रदिष्टं धनकीर्त्ति नाशात् ।"

दीपिका—"गुर्वादित्ये गुरौसिंहे नष्टेशुक्रे मलिम्लुचे ।
यांम्यायने हरौसुप्ते सर्वकर्माणि वर्जयेत् ।"

राजमार्त्तण्डः—"अस्तमिते भृगुपुत्रे कन्यामृयते वरस्तु वागीशे।
स्यादुभयोरपि मरणं केतावुदिते करग्रहणे।"

व्यासः—"उदिते दशरात्र न्तु क्षीणे चैव चतुर्द्दश।
वर्जनीयं प्रयत्नेन गुरु शुक्रोदये सदा।"

वशिष्ठः—"वालोदशाहो ऽभ्युदिते परेण पूर्वेणवालो दिवस त्रयं स्यात्।
बृद्ध स्तु पूर्वेण सपक्षमेकं पश्चात् स्थितः पञ्चदिनानि शुक्रः"
भवेत्सन्ध्यागतष्पश्चादस्तमेष्यन् दिनत्रयम्।
दिनानिपञ्चपूर्वेण तत्कृतं कर्मवर्जयेत्।

रत्नमालायाम्—
"प्रागुक्ततः शिशुरहस्तित्रयं सितः स्यात् पश्चाद्दशाह पञ्चदिनानिवृद्धः।
प्राक् पक्षमेव गदितोऽति वशिष्ठमुख्यै र्जीवस्तु पक्षमपिवृद्धशिशु र्विवर्ज्यः।

राजमार्तण्डः—
"वालभृगौपरिणीता स्ववतिच साध्वी भवत्यवद्य मिदम्।
वृद्ध्ये तस्मिन् वन्ध्या सन्ध्या स्ते मृत्य मभ्येति।
वाले च दुर्भगानारी वृद्धे नष्ट प्रजा भवेत्।
नष्टे च मृत्युमभ्येति सर्वमेतद्गुरावपि।"

गर्गः—
"कर्णवेधं तथा क्षौरं विवाहं व्रतमेव च।
गुर्वादित्येन कुर्वीत पुत्र दार धनक्षयात्।"

भोजराजः—
"गुर्वर्क्कयोगसमये शोभन वाल्मीकि गौतमाद्यै श्च।
व्रत यज्ञार्थे ब्रह्मन्नशुभकालाः कीर्तिता मुनिभिः।
गुर्वर्क्क योगेष्ववती विनाशो यद्यं कर्क्षे यवना वदन्ति।
अस्तङ्गते देव वलभ्र वत्सा हारीत पूर्वाश्चरणैक संस्थे।"

बृहद्दृक्षोच्चयः—
"अतीचारगते जीवे वक्रे तत्रैव सिंहगे।
वाले बृद्धे प्रनष्टे च विवाहो न प्रशस्यते।
व्रतोद्वाहं न कुर्वीत जायते मरणं ध्रुवम्।"

दीपिका "अतीचारगतेजीवे शुक्रेचास्त मुपागते ।
व्रतोद्वाहं प्रकुर्वीत जायते मरणं ध्रुवम् ।"

भुजवलभीमे—"अतीचारगतेजीवे वक्रेचैव वृहस्पतौ ।
कामिनी विधवा प्रोक्ता तस्मात्तौ परिवर्जयत् ।
वक्रेचैवातिचारे च वर्जयेत्तदनन्तरम् ।
व्रत यात्रादिकं कार्यं मष्टाविंशति वासरान् ।

एतल्लध्वतीचार विपयम् । नन्दः—
"पक्षो दशाहानि तथा त्रिपक्षी मासत्रिभागः खलु षट्कमासाः ।
एषोतिचारः कथितो ग्रहाणां भौमादिकानामितरस्तुचारः ।"

एतन्मते पक्षत्रयं गुरो रतिचार इति गम्यते । तथा च रत्नाकर शुद्धसमय निर्वचने पूर्वराशि संक्रमिष्यमाणातीचारि गुरुक पक्षत्रये त्युक्तम् । महातीचारे सम्वत्सरं काल लोप इत्याह ।

"अतीचार गतोजीवः पूर्वभन्नैति चेत्पुनः ।
लुप्तः सम्वत्सरोज्ञेयो गर्हितस्सर्वं कर्मसु ।"

वादरायणः—
"कृत्वातिचारं यदिपूर्वराशिं नायातिमन्त्री विवुधाधिपानाम् ।
यानं विवाहं व्रतवन्धगेहं सर्वन्तदाहन्ति मतं मुनीनाम् ।"
"पक्षो दशाहानि तथैवसार्द्धं मासं दशाहं खलु षट्कमासान् ।
भौमादि खेटास्त्वतिचारवक्रे दद्युः फलं पूर्वगृहे यदुक्तम् ।"

शतानन्दः—
"एकाहाधिकवर्षार्वाक् द्वौराशी विचरेद्यदि ।
तत्रातिचारी जीवःस्यात्पूर्वराशिफलप्रदः ।"

एतद्गोचर फलाभिप्रायम् न कालदोषपरमस्ति ।

तथा च—राजमार्तण्डः—

"वराह माण्डव्य पराशरात्रि गर्गाङ्गिरोव्यासमुखा वदन्ति ।
वक्रातिचारे सुरराजमन्त्री यदागतस्तत्र फलन्ददाति ।

वक्रातिचार शीघ्रेण मन्देन गुरुणा तथा ।
न यज्ञ व्रतविवाहादि सिंहे यावद्गतो गुरुः ।
वक्रातिचारिणि गुरौ सिंहे चार्क्कयुते तथा ।
तत स्तत्रन कुर्वीत यात्रोद्वाह व्रतानि च ।
जीवो वक्रातिचारी दिशति फलं यत्र संस्थितिस्तस्य ।
वात्स्यो वदति विवाहे न पूर्व राशेःफलं पुरतः" ।

देवीपुराणे

"सिंह संस्थं गुरुं शुक्रं सर्वारम्भेषु वर्जयेत् ।
आरम्भञ्च न कुर्वीत महाभयकरं भवेत् ।
पुत्र भ्रातृ कलत्राणि हन्याच्छीघ्रन्न संशयः ।
कारको व्रजते नाश सन्तानः क्षीयते चिरात् ।
देवागार तड़ागेषु प्रपोद्यान गृहेषु च ।
सिंहस्थं मकरस्थञ्च गुरुयत्नेन वर्जयेत् ।
यथा--सिंहस्थिते जीवे, तथैव मकरस्थिते ।
देवाराम तडागानि प्रपोद्यानि गृहाणि च ।
विवाहादि महादाने महाभयकरं भवेत्" ।

रत्नावल्याम्

"नीचस्थः सिंहगो वा भवति यदिगुरुः सूर्यरस्मौचनीचः ।
संयुक्तो वा यदिस्याद्दशशतघृणिना क्षीणरुपोथ वालः ।
यात्रा गेहं विवाहं व्रतममरगृहं यज्ञचूड़ादि सर्वम् ।
वापी मुद्यान कूपं न भवति शुभदं यद्यविष्टञ्च लोके ।
सर्वत्रैवस्थितःश्रेष्ठोऽमरराजपुरोहितः ।
नीचस्थोवर्क गृहस्थश्च सर्वकर्म विदूषकः" ।

नीचस्थ--मकरस्थ इत्यर्थः ।

राजमार्तण्डः

"विवाह चूड़ाव्रतकर्णवेध सुरप्रतिष्ठार्य गृहप्रवेशः ।
सुवर्णसंख्या द्यु पयोगविद्याः सितेसुरेज्ये न च शोभनास्युः ।
सिंहे गुरौ परिणीता स्त्री प्रतिमान मात्मजान् हन्ति ।
क्रमशस्त्रिषु पित्र्यादिष्ववशिष्ट गर्गादयष्प्राहुः" ।

व्यासः--

"दृश्यते सिंहिकासूनु,रुदितो गगने यदि ।
यात्रादौ मङ्गलेकार्ये सप्तरात्रं विवर्जयेत्"।

रत्न शतके-

"दर्शना दर्शना द्राहु केतोस्सप्तदिनं त्यजेत् ।
यावत्केतूदय स्तावदशुद्धः समयो भवेत् ।
अरिष्टे त्रिविधोपेते सिंहिका सूनु दर्शने ।
सप्तरात्रं न कुर्वीत व्रतोद्वाहादि मङ्गलम" ।

रत्नसारे

"यदाम्बुवृष्टिः कुलिशं पतत्यधो धराप्रकम्पो सुरकेतुदर्शनम् ।
तदाविवाह व्रतवन्धनानि विवर्जयेत्सप्तदिनानि शास्त्रतः" ।

असुरोराहुः ।

"ग्रहे रविन्दो रवनिप्रकम्पे केतूद्गमोल्का पतनादि दोषः ।
व्रतेदशाहानि वदन्तितज्ज्ञा स्त्रयोदशाहानि वदन्ति केचित्"।

वाक्यमिदं राजादि निवन्धेषु व्रतवन्ध प्रकरणे लिखतिस्म तेन-व्रते व्रतवन्ध इत्यर्थः। तथा--

"एकरात्रं परित्यज्य कुर्यात्पाणिग्रहं ग्रहे ।
प्रयाणे सप्तरात्रन्तु त्रिरात्रे व्रतबन्धने" ।

एतदात्ययिक कार्यपरमिति प्रौढकन्यादि विषयम्वा। कण्ठोक्तौ सप्तरात्रि निषेधात् ।

तथा च रत्नाकरे प्यविशेषेण केत्वाद्यद्भुत दर्शनोत्तरे सप्ताहे त्युक्तम् ।

गर्गः—"दाहन्दिशाञ्चैवधराप्रकम्पे वज्रप्रपाते कुविदारणे च ।
धूमे तथा पांशुचयः प्रपाते न कारयेन्मङ्गलकारि कार्यम् ।
उल्कापाते च निर्घाते तथैवाकाल वर्षणे ।
छिद्रे सूर्ये विनिर्दिष्टे न कुर्यान्मङ्गलक्रियाम् ।
धूमकेतौ समुत्पन्ने ग्रहणे चन्द्रसूर्ययोः ।
ग्रहाणां सङ्करेचैव न कुर्यान्मङ्गलक्रियाम्" ।

"द्वि सूर्य्यम्वा त्रिसूर्य्यम्वा दृष्ट्वागगनमण्डलम्।
रात्रौ शक्रधनुश्चैव मङ्गलानि विवर्जयेत्।
दिग्दाहे दिनमेकञ्च ग्रहे सप्तदिनानि च।
भूकम्पे च समुत्पन्नें त्र्यहानि परिवर्जयेत्।
उल्कापाते त्रिविधसं धूमे पञ्चदिनानि च।
दिनमेकं रजःपाते वर्जयेत्सर्वकर्मसु"।

भोजराजः

"पौषादि चतुरो मासान् ज्ञेयावृष्टिरकालजा।
व्रतयात्रादिकन्तत्र वर्जयेत्सप्तवासरान्।
सर्गस्य पौर्णमास्यादा वष्टकान्ता मकालजाम्।
वृष्टिं केचिदिह प्राहुर्न्न माघे न च फाल्गुने।
एके नैकं दिनं त्याज्यं द्वितीयेन दिनत्रयम्।
तृतीयेन तु सप्ताहं त्यजेदाकाल वर्षणे"।

यात्रायां वराहः

"वृष्टिःकरोति दोषं तावन्नाकाल संभवा राज्ञः।
यावन्न भवति यानें नरपशु चरणाङ्कितावसुधा"।

तदेतेषां समुदाये रत्नाकरे—मलिम्लुच गुरुशुक्रवाल्य वार्द्धकास्तमय सिंह (मकरान्यतम) सङ्क्रमिष्यमानातीचारि गुरुरुप पक्षत्रय वक्रि गुरुकाष्टा-विंशति वासरान् केत्वाद्यद्भुतोत्तर सप्ताह गुर्वादित्य सिंहादित्य पौषादिमास चतुष्टयान्यतमैक द्वित्र्यन्यतमदिनवृत्ताकालिक वृष्ट्युत्तरैक त्रिसप्ताहान्यतम दिनानि निषिद्धा समयस्तदन्य शुद्धसमय इति।

म० म० सन्मिश्रवाचस्पतिविरचितः कृत्यप्रदीपः समाप्तः।

卐

शुद्धिपत्रम्

पृ०	पं०	अशुद्ध	शुद्ध
१	१	नम	नम:
,,	११	यो	पो
,,	७	धो	धौ
,,	१७	ह्ला	ह्‌णा
२	६	स्न	स्त
३	७	या	पा
,,	१३	जं	ळं
,,	१७	भोम	भोज
,,	२०	नं	म्
४	११	सूत्र	मूत्र
,,	१५	म्य	भ्य
,,	१७	ल्पु	प्लु
५	२१	गण्ड	गण्डू
,,	२५	देशो	देशे
६	२	प्रत	प्रात
,,	१७	यं	म्
,,	१६	रिति	इति
,,	२४	ह्ले	ह्‌णे
७	२३	णं	म्
८	५	ज्ज	ञ्ज
,,	२८	णि	क्षि
९	१०	सु	षु
,,	,,	भ	भा
१०	१२	तु	पु
,,	२२	मि:	भि:
,,	२६	तु	पु

पृ०	पं०	अशुद्ध	शुद्ध
११	५	या	प
,,	१३	माव	भाव
,,	१८	पोमि	पोभि
,,	२६	नामौ	नाभौ
,,	७	दो	दा
१३	२५	म	मा
,,	२६	ये	पे
१३	१६	तच्चु	तच्चक्षु
,,	२१	कमण्यां	क्रमण्यां
,,	२५	उदु	उदुत्य
१४	१२	थाने	स्थाने
,,	१५	द	द्य
१५	६	न्तां	ताम्
,,	१५	त्य	प्य
१६	२१	मं	मम्
१७	१०	प्रपिया	प्रपिता
,,	११	स्तर्य	स्तर्प
१७	२२	स्का	स्मा
,,	१४	चाश	शाचा
,,	१७	यनो	यना
१८	४	विक्रमे	विचक्रमे
,,	७	हरि	हिर
,,	११	नः	नमः
१६	१४	भ्यु	भ्य
,,	१७	मनं	मरं
,,	१६	म्वल	म्वूल
,,	२३	क	का
३०	१५	म्य	भ्य

पृ०	पं०	अशुद्ध	शुद्ध
३०	१७	स्वा	स्था
,,	१९	क्षणा	कारिणा
,,	२५	ने	नु
,,	२७	स्व	रस्त्व
,,	२८	कुशा:त्रय	कुशत्रय
२१	८	ञ्ल	ञ्च
,,	१४	चने	चंने
,,	२७	णु	गु
२२	१०	वंस्व	वैस्व
,,	१५	सषप	सर्षप
,,	२९	नि	सि
,,	२४	ल्कि	ल्लि
,,	२५	केच	केत
२३	२४	प	पा
२४	१६	ञ्ल	ञ्च
,,	१८	ञ्ल	ञ्च
२५	१४	द	प
,,	२५	कं	कम्
,,	१४	दत्य	पत्य
२६	२२	ल्य	स्य
२७	९	मि	षि
,,	१८	शाष्त्र	शास्त्र
,,	१५	मश्रा	मप्र
,,	२६	व्या	ण्या
२८	२०	वि	पि
२९	७	या	र्या
,,	२१	लो	लौ
,,	,,	ई	ईं

पृ०	पं०	अशुद्ध	शुद्ध
,,	२३	ररं	रं
३०	११	मं	सं
,,	१२	मं	सं
३१	१६	मा	भा
३२	५	पिवेत	नपिवेत
,,	१५	स्पशेत्	स्पृशेत्
,,	१७	विषत	पियेत
३२	२५	व	द
३३	६	वंश्च	वड़वानलश्च
,,	१३	स्तोन	स्तेन
,,	२९	भ्यो	ष्यो
,,	१८	तस्यः	तस्य
,,	,,	भ	भ
,,	२६	मू	भू
३४	१५	व	वृ
,,	१८	ञ्च	ञ्ज
३६	१०	यो	य
३८	५	प्रहा	प्रह
,,	६	रोत्रो	रात्रौ
,,	७	थ	य
३९	२	संधि	सन्धि
,,	१९	ज्जा	ज्ज
४१	४	मुब	भुव
,,	१२	परु	पर
,,	२२	कृष्णो	कृष्णे
४२	११	दि	हि
४४	७	स	त
,,	२१	जन्द	छन्द
,,	२८	मो	वो

पृ०	पं०	अशुद्ध	शुद्ध
४५	१४	ष्प	स्प
,,	१८	नन्त्रौ	मन्त्रै
,,	२१	स्थावे	स्थाने
,,	२६	ङ्गे	ङ्गौ
,,	,,	रःपु	पुरः
४६	१९	आवो	आरो
४७	३	नसो	नमो
,,	७	त	तु
,,	८	त	तु
,,	१६	शां	क्षां
४८	१२	क	का
,,	२६	प्तु	प्य
४९	१०	प	पं
,,	१८	म्या	भ्या
,,	,,	सु	मु
,,	२२	मा	म
५०	५	मे	से
,,	१२	टि	ठि
,,	१३	म्युश्य	भ्युक्ष्य
५१	२	पूव	पूर्वं
,,	१३	भु	भुं
,,	१९	त्र्यु	त्रय
,,	२१	न्द्ध	द्ध्वं
,,	,,	द्ध्व	
५२	१२	थ	य
,,	१५	दृङे	दृङ्
,,	२३	ने	दे
५३	५	श्च	श्छ

पृ०	पं०	अशुद्ध	शुद्ध
४३	१०	रे	रा
,,	१९	स्प	स्पृ
,,	२०	त्य	त्ये
५५	२	मतु	मातु
,,	२०	श्र	प्र
५६	१८	र्भ	भु॑
५७	१३	सा	मा
,,	१५	स्	म्
५८	४	स्वष्ट	स्विष्ट
,,	२२	पश्मिमा	पश्चिमा
६१	१०	क्षि	ज्ञि
,,	२४	ष्ण	ष्णीं
६३	२०	ज्ज	ञ्ज
६४	२३	मा	भा
६५	२४	न्यु	ण्यु
६६	११	ो	नो
६८	१०	दक्षिङ्	दक्षिणा
६९	१०	म्तु	न्तु
,,	१२	स्वा	स्त्वा
,,	२३	त्य	प्य
,,	२५	त्या	त्पा
७०	२७	म	क
७१	४	मधुम	मधु
,,	१७	र्मे	र्भे
७२	१६	न्नोर्द्ध	न्नोव
७३	४	च्चिल	च्छि
,,	६	पि	वि
,,	११	ष्ये	ष्पे

पृ०	पं०	अशुद्ध	शुद्ध
७३	२१	ख	स्व
,,	२५	ष्ते	स्ते
७४	८	र्मि	र्भि
,,	१४	म्मे	म्भे
७८	२	नार्दीं	नान्दी
७९	३	ये	ने
,,	५	पित	पितु
,,	१९	व्ये	ब्ये
,,	२५	ष्ठ	ष्ट
,,	,,	ल्व	न्व
८०	७	मिः	भिः
,,	१७	सर्घे	सर्वे
,,	२२	न्य	न्या
८१	१३	क	म
,,	१९	थे	ये
,,	२३	दन्यं	दन्नं
८२	११	खि	ख
,,	२७	सव	सर्व
८३	१६	मय	मह
,,	२२	तू	त
८४	१०	ष्पं	ष्पम्
,,	१२	न्व	न्न
,,	१७	न्नी	न्ती
,,	१८	तपयत	तर्पयत
,,	२१	न्यु	ण्यु
८६	१७	भ्मो	म्वो
,,	२३	ल	य
,,	२५	ग्मि	स्मि

पृ०	पं०	अशुद्ध	शुद्ध
८७	१४	नि	ति
,,	२४	हरि	हिर
८९	५	धि	थि
,,	१४	णा	णो
,,	१५	ष्ण	ष्णु
९३	२	पो	तो
,,	९	त्ल	क्ल
,,	१७	यो	या
९४	२१	कङ्क	सङ्क
९५	२२	क्ष	क्षि
९६	१७	व	वी
९८	४	म्	न्
९९	२३	ण्वा	ण्डा
,,	१९	कुष	कुश
१०८	८	द्रा	ब्रा
९६	१६	ष्पे	ष्प
१०८	११	त्न	ल
,,	१६	णु	ण
,,	२८	बद	द्ब्र
,,	२३	त्या	ल्या
९६	१६	धप	धूप

राष्ट्रिय संस्कृत संस्थान
जयपुर परिसर, जयपुर
पुस्तकालय
क्रमांक......18608

कामेश्वरसिंह दरभंगा संस्कृत-विश्वविद्यालय
कामेश्वर-नगर, दरभंगा

बिक्रेतव्य पुस्तकें

क्र. सं.	पुस्तकका नाम	सम्पादक एवं लेखक	मूल्य
१	म० म० महेशठक्कुर संस्कृतग्रन्थमाला-		
(क)	न्यायरत्नाकरः—	स० म० म० उमेश मिश्र	७।
(ख)	कालिदास साहित्यम्	ले० डॉ० आद्याप्रसादमिश्र	२।
(ग)	कालिदासीयोपरूपकाणां समुच्चय:	स० म० म० उमेश मिश्र	५।
२	विद्यापति संस्कृत ग्रन्थावली-		
(क)	हिन्दीअनुवादसहित प्रथमभाग (विभागसार एवं शैवसर्वस्वसार)	स० (१) डॉ० जयमन्त मिश्र (२) डॉ० इन्द्रकान्त झा	७५।
(ख)	द्वितीयभाग (हि. अ स) (शैवसर्वस्वमार प्रमाणभूत पुराणसंग्रह एवं दानवाक्यावली)	स० (१) डॉ० जयमन्त मिश्र (२) पं० आनन्द झा	७५।
३	गोकुलनाथोपाध्याय ग्रन्थावली-		
(क)	रसमहार्णव	सम्पा० (१) प० श्री धर्मनाथ झा (२) कुमुदनाथ मिश्र	६।
(ख)	आलोकमंगलविचार	स० ,, ,,	२०।
(ग)	मासमीमांसा	स० प० धर्मनाथ झा	६।
(घ)	अनुमितिदीधितिविद्योत	स० (१) प० श्रीधर्मनाथ झा (२) प० श्रीरामसेवकझा	७।
(ङ)	गोकुलनाथग्रन्थगुच्छ (दिक्कालनिरूपणम्, रूढ़िव्याख्यारहस्यम् मिथ्यात्वनिरूपणञ्च	स० ,, ,,	७।
(च)	कुण्ड कादम्बरी	स० (१) पं०श्री धर्मनाथ झा (२) पं०श्री कुमुदनाथ मिश्र संशोधक श्रीरामचन्द्र झा	२०।
४	म० म० वाचस्पतिग्रन्थावली-		
(क)	कृत्यप्रदीप:	स० (१) डॉ० जयमन्त मिश्र (२) प० धर्मनाथ झा संशोधक पं०श्री कृष्णानन्द झा	२४
५.	मीमांसाश्लोकवार्तिक (हन्दी अनुवादसहित)	अनु. विद्यावाचस्पति श्रीदुर्गाधर झा	१५०।
६.	ध्वनिकल्लोलिनी (हिन्दी अनुवादसहित)	ले० अनु० श्री आनन्दझा	२५।

७	म. म. शशिनाथ निवन्धावली-	सं० विद्यावाचस्पति रामचन्द्र मिश्र	३०।
८	समासशक्तिदीपिका—	ले. महावैयाकरण-दीनबन्धु झा	५।
९	विज्ञानं समाजश्च— (संस्कृत अनुवाद)	ले. डॉ सरयूप्रसाद गुप्त सं. विद्यावाचस्पति रामचन्द्र मिश्र	२५।
१०	मेघदूतम्— (जगद्धरीयरसदीपिनी व्याख्योपेत)	सं. प. श्रीहृषीकेश झा	१२।
११	उपसृष्टधात्वर्थसंग्रह—	लें० म. बै. दीनबन्धु झा सं० डॉ शशिनाथ झा	६।
१२	सुभाषितावली— (हिन्दी अनुवादसहित)	विद्यावाचस्पति श्री उपेन्द्र झा	१२।
१३	नियमावली एवं पाठ्यग्रन्थावली-	प्रकाशक:-का० सिं० द०- सं० वि० वि० दरभंगा।	७।
१४	रघुबंशमहाकाव्य (मूलमात्रम् सम्पूर्णम्)	सं० वि० वा० श्रीरामचन्द्रमिश्र	४।
१५	हरविजयम् (प्रथम सग) सटीक	,, ,,	१।
१६	मेघदूत (मूलमात्रम्)—	,, ,,	०,५०
१७	मिथिला महात्म्यम्—	सं० प० श्रीधर्मनाथ झा	५रु०
१८	अभिनन्दनमाला=	सं० प० श्री रामचन्द्र मिश्र	६।
१९	छन्दोगानां विवाहपद्धति:— (सानुवाद)	सं० प० श्री तेजनाथ झा	५।
२०	मिथिला का इतिहास—	ले० डॉ रामप्रकाश शर्मा	७५।
२१	स्मृति साहस्री—	ले० रमाकर	१५।
२२	लौकिक न्यायरत्नाकर—	सं० प० श्रीरामचन्द्र झा	४५।

विशेष: – प्रकाशन की कीमत कुलसचिव कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय, कामेश्वरनगर, दरभंगा के पदनाम से (K S. D. S. शाखा दरभंगा) बैंक ड्राफ्ट द्वारा पहले ही प्रेषणीय है। आदेश के उपरान्त प्रोफोरमा देयक भेजा जायगा।

(२) प्रमाणित थोक ग्राहक को २५ % कमीशन दी जाती है।

अथवा

प्रकाशन मूल्य की राशि अग्रिम भेज कर किसी निकटस्थ बैंक के माध्यम से भी मगवाया जा सकता है।

विशेष:— त्रैमासिक शोध पत्रिका "विश्वमनीषा" १५। वार्षिक (विगत ६ वर्षों से संचालित) चन्दा भेजने पर प्राप्त है।

राष्ट्रिय संस्कृत संस्थान
जयपुर परिसर, जयपुर
पुस्तकालय
क्रमांक..........

प्राप्ति स्थान –
प्रकाशन विभाग
का० सिं० द० सं० वि० दरभंगा